पुरश्चरण(प्रयोग)काण्डे शिवमन्त्रानुष्ठानप्रकरणं द्वितीयम्॥ २॥

शिवमन्त्रपुरश्चरणप्रकरणम्

कैलासाद्रिनिभं शशाङ्कशकलस्फूर्जज्जटामण्डितं नासालोकनतत्परं त्रिनयनं वीरासनाध्यासितम्।
मुद्राटङ्ककुरङ्गजानुविलसत्पाणिं प्रसन्नाननं कक्षाबद्धभुजङ्गमं मुनिवृतं वन्दे महेशं परम्॥ १॥
अथ वक्ष्ये महेशस्य मन्त्रान्सर्वार्थसिद्धिदान्। यैः पूर्वमृषयः प्राप्ताः शिवसायुज्यमञ्जसा॥ २॥

मङ्गलाचरण—कैलास पर्वत के समान खण्डचन्द्रमा की चमक, जटाओं से मण्डित (शोभित), नासिकाग्र पर दृष्टियुक्त त्रिनेत्र वाले, वीरासन में संस्थित, कुरङ्ग जानुसदृश हाथों में मुद्रा तथा टङ्क धारण किये हुए, प्रसन्न मुखमण्डल वाले, कक्षाओं में भुजङ्गों को लिपटाए हुए, मुनियों से घिरे हुए परमश्रेष्ठ महेश की वन्दना करता हूँ। अब भगवान् शङ्कर के सभी सिद्धिदायक मन्त्र, जो कि शिवजी के सायुज्य में ऋषियों ने प्राप्त किये थे, उन सबका वर्णन करता हूँ॥ १-२॥

तत्रादौ शिवस्य सर्वमन्त्रारम्भप्रयोगः—शिवालयादिषु यथावज्जपस्थानं प्रकल्प्य पूर्वदिने प्रायश्चित्तादि कृत्वा आरम्भदिने प्रातर्नित्यावश्यकं समाप्य स्वासने प्राङ्मुख उदङ्मुखो वा शिवसन्निधौ उपविश्य भस्मत्रिपुण्ड्रं रुद्राक्षधारणं च कुर्यात्। ततः आचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य मम सर्वपापनिवृत्तिपूर्वकममुककामनासिद्ध्यये श्रीसदाशिवप्रीतये शिवस्यामुकमन्त्रजपपुरश्चरणं करिष्ये तदङ्गत्वेन भूतशुद्धिं प्राणप्रतिष्ठां मातृकान्यासं श्रीकण्ठादिकलान्यासं च करिष्ये इति च सङ्कल्प्य पूर्वोक्तपद्धतिमार्गेण बहिर्मातृकान्यासान्तं कृत्वा श्रीकण्ठादिकलामातृकान्यासं कुर्यात्। तद्यथा—अस्य श्रीकण्ठादिकलान्यासस्य दक्षिणामूर्तिर्ऋषिः। गायत्रीछन्दः। अर्धनारीश्वरो देवता। हलो बीजानि। स्वराः शक्तयश्चतुर्विध-पुरुषार्थसिद्ध्यर्थे न्यासे विनियोगः। ॐ दक्षिणामूर्तिऋषये नमः शिरसि॥ १॥ ॐ गायत्रीछन्दसे नमः मुखे॥ २॥ ॐ अर्धनारीश्वरदेवतायै नमः हृदये॥ ३॥ ॐ हलबीजाय नमः गुह्ये॥ ४॥ ॐ स्वरशक्तये नमः पादयोः॥ ५॥ इति ऋष्यादिन्यासः। ॐ ह्सां अङ्गुष्ठाभ्यां नमः॥ १॥ ॐ ह्सीं तर्जनीभ्यां नमः॥ २॥ ॐ ह्सूं मध्यमाभ्यां नमः॥ ३॥ ॐ ह्सैं अनामिकाभ्यां नमः॥ ४॥ ॐ ह्सौं कनिष्ठिकाभ्यां नमः॥ ५॥ ॐ ह्सः करतलकरपृष्ठाभ्यां नमः॥ ६॥ इति करन्यासः॥ ॐ ह्सां हृदयाय नमः॥ १॥ ॐ ह्सीं शिरसे स्वाहा॥ २॥ ॐ ह्सूं शिखायै वषट्॥ ३॥ ॐ ह्सैं कवचाय हुं॥ ४॥ ॐ ह्सौं नेत्रत्रयाय वौषट्॥ ५॥ ॐ ह्सः अस्त्राय फट्॥ ६॥ इति षडङ्गन्यासः।

अथ ध्यानम्—

पाशाङ्कुशवराक्षस्त्रक्पाणिशीतांशुशेखरम्। त्र्यक्षं रक्तसुवर्णाभमर्द्धनारीश्वरं भजे॥ १॥
बन्धूककाञ्चननिभं रुचिराक्षमालां पाशाङ्कुशौ च वरदं निजबाहुदण्डैः।
बिभ्राणमिन्दुशकलाभरणं त्रिनेत्रमर्धाम्बिकेशमनिशं वपुराश्रयामः॥ २॥

इति ध्यात्वा श्रीकण्ठाद्यान् न्यसेत्।

ॐ ह्सौं अं श्रीकण्ठेशपूर्णोदरीभ्यां नमो मस्तके॥ १॥ 'प्रणवमादौ सर्वत्र'। ॐ ह्सौं आं अनन्तेशविरजाभ्यां नम आननवृत्ते॥ २॥ ॐ ह्सौं इं सूक्ष्मेशशाल्मलीभ्यां नमः दक्षिणनेत्रे॥ ३॥ ॐ ह्सौं ईं त्रिमूर्तिलोलाक्षिभ्यां नमो वामनेत्रे॥ ४॥ ॐ ह्सौं उं अमरेशवर्तुलाक्षीभ्यां नमो दक्षकर्णे॥ ५॥ ॐ ह्सौं ऊं अर्घीशदीर्घघोणाभ्यां नमो वामकर्णे॥ ६॥ ॐ ह्सौं ऋं भारभूतीशदीर्घमुखीभ्यां नमो दक्षनासापुटे॥ ७॥ ॐ ह्सौं ॠं तिथीशगोमुखीभ्यां नमो

वामनासापुटे॥ ८॥ ॐ ह्सौं लृं स्थाण्वीशदीर्घजिह्साभ्यां नमो दक्षगण्डे॥ ९॥ ॐ ह्सौं लॄं हरेशकुण्डोदरीभ्यां नमः वामगण्डे॥ १०॥ ॐ ह्सौं एं झिण्टीशोर्ध्वकेशीभ्यां नमः ऊर्ध्वोष्ठे॥ ११॥ ॐ ह्सौं ऐं भौतिकेशविकृतमुखीभ्यां नमः अधरोष्ठे॥ १२॥ ॐ ह्सौं ओं सद्योजातेशज्वालामुखीभ्यां नमः ऊर्ध्वदन्तपङ्क्तौ॥ १३॥ ॐ ह्सौं औं अनुग्रहेशोल्का-मुखीभ्यां नमः अधोदन्तपङ्क्तौ॥ १४॥ ॐ ह्सौं अं अक्रूरेशश्रीमुखीभ्यां नमः शिरसि॥ १५॥ ॐ ह्सौं अः महासेनेशविद्यामुखीभ्यां नमः मुखमध्ये॥ १६॥ ॐ ह्सौं कं क्रोधीशमहाकालीभ्यां नमः दक्षस्कन्धे॥ १७॥ ॐ ह्सौं खं चण्डेशसरस्वतीभ्यां नमः दक्षकूर्परे॥ १८॥ ॐ ह्सौं गं पञ्चान्तकेशसर्वसिद्धिगौरीभ्यां नमः दक्षमणिबन्धे॥ १९॥ ॐ ह्सौं घं शिवोत्तमेशत्रैलोक्यविद्याभ्यां नमः दक्षाङ्गुलिमूले॥ २०॥ ॐ ह्सौं ङं एकरुद्रेशमन्त्रशक्तिभ्यां नमः दक्षाङ्गुल्यग्रे॥ २१॥ ॐ ह्सौं चं कूर्मेशात्मशक्तिभ्यां नमः वामस्कन्धे॥ २२॥ ॐ ह्सौं छं एकनेत्रेशमूलमातृकाभ्यां नमः वामकूर्परे॥ २३॥ ॐ ह्सौं जं चतुराननेशलम्बोदरीभ्यां नमः वामस्कन्धे॥ २४॥ ॐ ह्सौं झं अजेशद्रविणीभ्यां नमः वामाङ्गुलिमूले॥ २५॥ ॐ ह्सौं ञं सर्वेशनागरीभ्यां नमः वामाङ्गुल्यग्रेषु॥ २६॥ ॐ ह्सौं टं सोमेशखेचरीभ्यां नमः दक्षपादमूले॥ २७॥ ॐ ह्सौं ठं लाङ्गलीशमञ्जरीभ्यां नमः दक्षजानुनि॥ २८॥ ॐ ह्सौं डं दारुकेशरूपिणीभ्यां नमः दक्षगुल्फे॥ २९॥ ॐ ह्सौं ढं अर्धनारीशवीरिणीभ्यां नमः दक्षपादाङ्गुलिमूले॥ ३०॥ ॐ ह्सौं णं उमाकान्तेश-काकोदरीभ्यां नमः दक्षाङ्गुल्यग्रे॥ ३१॥ ॐ ह्सौं तं आषाढीशपूतनाभ्यां नमः वामोरुमूले॥ ३२॥ ॐ ह्सौं थं दण्डीशभद्रकालीभ्यां नमः वामजानुनि॥ ३३॥ ॐ ह्सौं दं अत्रीशयोगिनीभ्यां नमः वामगुल्फे॥ ३४॥ ॐ ह्सौं धं मीनेशशङ्खिनीभ्यां नमः वामपादाङ्गुलिमूले॥ ३५॥ ॐ ह्सौं नं मेषेशतर्जनीभ्यां नमः वामपादाङ्गुल्यग्रे॥ ३६॥ ॐ ह्सौं पं लोहितेशकालरात्रिभ्यां नमः दक्षकुक्षौ॥ ३७॥ ॐ ह्सौं फं शिखीशकुब्जिनीभ्यां नमः वामकुक्षौ॥ ३८॥ ॐ ह्सौं बं छगलाण्डेशकपर्दिनीभ्यां नमः पृष्ठे॥ ३९॥ ॐ ह्सौं भं द्विरण्डेशवज्राभ्यां नमः नाभौ॥ ४०॥ ॐ ह्सौं मं महाकालेशजयाभ्यां नमः उदरे॥ ४१॥ ॐ ह्सौं यं त्वगात्मभ्यां वालीशसुमुखेश्वरीभ्यां नमः हृदये॥ ४२॥ ॐ ह्सौं रं असृगात्मभ्यां भुजङ्गेशरेवतीभ्यां नमः दक्षांसे॥ ४३॥ ॐ ह्सौं लं मांसात्मभ्यां पिनाकीशमाधवीभ्यां नमः ककुदि॥ ४४॥ ॐ ह्सौं वं मेदसात्मभ्यां खड्गीशवारुणीभ्यां नमः हृदयादिवामांसे॥ ४५॥ ॐ ह्सौं शं अस्थ्यात्मभ्यां केशवायवीभ्यां नमः हृदयादिदक्षकराग्रान्तम्॥ ४६॥ ॐ ह्सौं षं मज्जात्मभ्यां श्वेतेशरक्षोविदारिणीभ्यां नमः हृदयादिवाम-कराग्रान्तम्॥ ४७॥ ॐ ह्रीं सं शुक्रात्मभ्यां भृग्वीशसहजाभ्यां नमः हृदयादिवामपादाग्रान्तम्॥ ४८॥ ॐ ह्सौं हं प्राणात्मभ्यां लकुलीशलक्ष्मीभ्यां नमः हृदयादिदक्षपादान्तम्॥ ४९॥ ॐ ह्सौं ळं शक्त्यात्मभ्यां शिवेशव्यापिनीभ्यां नमः हृदयादिनाभ्यन्तम्॥ ५०॥ ॐ ह्सौं क्षं परमात्मभ्यां संवर्तकेशमायाभ्यां नमः हृदयादिशिरोऽन्तम्॥ ५१॥ एवं श्रीकण्ठादिकलान्यासं कृत्वा ध्यायेत्।

अत्र रुद्राः स्मृता रक्ता धृतशूलकपालकाः। शक्तयो रुद्रपीठस्थाः सिन्दूरारुणविग्रहाः॥
रक्तोत्पलकपालाभ्यामलङ्कृतकराम्बुजाः।

इति ध्यात्वा मूलमन्त्रेण प्राणायामं कुर्यात्। इति श्रीकण्ठादिन्यासः। अयं न्यासः सर्वशिवमन्त्रेषु ज्ञेयः।

सभी शिवमन्त्रों की सामान्य अनुष्ठान-विधि—शिवालय आदि पवित्र स्थान में भली-भाँति मन्त्रजप के लिये स्थान का चयन करके जपारम्भ के पूर्व दिन में प्रायश्चित्त आदि कर्मों को सम्पन्न कर लेना चाहिये। फिर अनुष्ठानारम्भ दिवस को प्रातः शीघ्र जागकर प्रातः के आवश्यक कृत्यों को शीघ्रता से सम्पन्न करके अपने आसन पर पूर्वमुख अथवा उत्तरमुख में शिवजी के सान्निध्य में बैठकर भस्म, त्रिपुण्ड्र तथा रुद्राक्ष धारण कर लेना चाहिये। फिर आचमन एवं प्राणायाम करके देश-काल का सङ्कीर्तन करके 'मम सर्वपापनिवृत्तिपूर्वकं अमुककामनासिद्ध्यये श्रीसदाशिवप्रीतये शिवस्य अमुकमन्त्रजपपुरश्चरणं करिष्ये। तदङ्गत्वेन भूतशुद्धिं, प्राणप्रतिष्ठां, मातृकान्यासं, श्रीकण्ठादिकलान्यासं च करिष्ये' इस प्रकार का सङ्कल्प करके पूर्वोक्त पद्धतिमार्ग से बहिर्मातृका न्यास करके फिर श्रीकण्ठादि कलामातृका न्यास करना चाहिये।

श्रीकण्ठादि कलामातृका न्यास—इसके लिये सर्वप्रथम 'अस्य श्रीश्रीकण्ठादिकलान्यासस्य दक्षिणामूर्ति ऋषिः गायत्रीछन्दः अर्धनारीश्वरो देवता, हलो बीजानि, स्वराः शक्तयः चतुर्विधपुरुषार्थसिद्ध्यर्थे न्यासे विनियोगः' कहकर विनियोग का जल छोड़े। ऋष्यादि न्यास—फिर मूल में लिखे 'ॐ दक्षिणामूर्तिऋषये नमः शिरसि॥ १॥' इत्यादि पाँच मन्त्रों से ऋष्यादि न्यास करे। करन्यास—फिर मूलोक्त 'ॐ ह्सां अङ्गुष्ठाभ्यां नमः॥ १॥' इत्यादि छः मन्त्रों से करन्यास करे। हृदयादि षडङ्ग न्यास—फिर 'ॐ ह्सां हृदयाय नमः' इत्यादि मूल में लिखित छः मन्त्रों से हृदयादि षडङ्ग न्यास कर लेना चाहिये। ध्यान—फिर उसके आगे मूल में लिखित 'पाशाङ्कुशवराक्षस्रक्०' इत्यादि दो श्लोकों को बोलकर शिव का ध्यान करना चाहिये। ध्यानोपरान्त फिर श्रीकण्ठादिन्यास करे। उसके लिये मूल में लिखित 'ॐ ह्सौं अं श्रीकण्ठेशपूर्णोदरीभ्यां नमो मस्तके०' इत्यादि इक्यावन मन्त्रों से श्रीकण्ठादि कलान्यास करे। पुनः 'अत्र रुद्राः स्मृता रक्ता०' इत्यादि श्लोकों द्वारा ध्यान करके मूल मन्त्र के द्वारा प्राणायाम करना चाहिये। यह श्रीकण्ठादि कलान्यास सभी शिवमन्त्रों के अनुष्ठान में करना चाहिये (ऐसा नियम है)।

शिवपञ्चाक्षरमन्त्रपुरश्चरणप्रयोगः

तत्र मन्त्रन्यासः। अस्य श्रीशिवपञ्चाक्षरमन्त्रस्य वामदेव ऋषिः। पङ्क्तिश्छन्दः। सदाशिवो देवता। ॐ बीजम्। नमः शक्तिः। शिवायेति कीलकम्। चतुर्विधपुरुषार्थसिद्ध्यर्थे न्यासे विनियोगः। ॐ वामदेवऋषये नमः शिरसि॥ १॥ ॐ पङ्क्तिच्छन्दसे नमः मुखे॥ २॥ ॐ श्रीसदाशिवदेवतायै नमः हृदये॥ ३॥ ॐ बीजाय नमः गुह्ये॥ ४॥ ॐ नमः शक्तये नमः पादयोः॥ ५॥ ॐ शिवाय कीलकाय नमः सर्वाङ्गे॥ ६॥ इति ऋष्यादिन्यासः।

अथ करन्यासः—ॐ ॐ अङ्गुष्ठाभ्यां नमः॥ १॥ ॐ नं तर्जनीभ्यां नमः॥ २॥ ॐ मं मध्यमाभ्यां नमः॥ ३॥ ॐ शिं अनामिकाभ्यां नमः॥ ४॥ ॐ वां कनिष्ठिकाभ्यां नमः॥ ५॥ ॐ यं करतलकरपृष्ठाभ्यां नमः॥ ६॥

अथ हृदयादिन्यासः—ॐ ॐ हृदयाय नमः॥ १॥ ॐ नं शिरसे स्वाहा॥ २॥ ॐ मं शिखायै वषट्॥ ३॥ ॐ शिं कवचाय हुम्॥ ४॥ ॐ वां नेत्रत्रयाय वौषट्॥ ५॥ ॐ यं अस्त्राय फट्॥ ६॥

अथ पञ्चमूर्तिन्यासः—ॐ नं तत्पुरुषाय नमः इति तर्जन्याम्॥ १॥ ॐ मं अघोराय नमः मध्यमायाम्॥ २॥ ॐ शिं सद्योजाताय नमः कनिष्ठिकायाम्॥ ३॥ ॐ वां वामदेवाय नमः अनामिकायाम्॥ ४॥ ॐ यं ईशानाय नमः इत्यङ्गुष्ठे॥ ५॥ ॐ नं तत्पुरुषाय नमः मुखे॥ १॥ ॐ मं अघोराय नमः हृदये॥ २॥ ॐ शिं सद्योजाताय नमः पादयोः॥ ३॥ ॐ वां वामदेवाय नमः गुह्ये॥ ४॥ ॐ यं ईशानाय नमः मूर्ध्नि॥ ५॥

अथ वक्त्रन्यासः—ॐ नं तत्पुरुषाय नमः पूर्ववक्त्रे॥ १॥ ॐ मं अघोराय नमः दक्षिणवक्त्रे॥ २॥ ॐ शिं सद्योजाताय नमः पश्चिमवक्त्रे॥ ३॥ ॐ वां वामदेवाय नमः उत्तरवक्त्रे॥ ४॥ ॐ यं ईशानाय नमः इत्यूर्ध्ववक्त्रे॥ ५॥

शिवपञ्चाक्षर मन्त्र (ॐ नमः शिवाय) की पुरश्चरण-विधि—सर्वप्रथम 'अस्य श्रीशिवपञ्चाक्षरमन्त्रस्य वामदेव ऋषिः पङ्क्तिः छन्दः, सदाशिवो देवता, ॐ बीजम्, नमः शक्तिः, शिवायेति कीलकं, चतुर्विधपुरुषार्थसिद्ध्यर्थे न्यासे विनियोगः' कहकर जल छोड़े। यह न्यासार्थ विनियोग है। फिर मूल में लिखे 'ॐ वामदेवाय नमः शिरसि' इत्यादि छः मन्त्रों से ऋष्यादि न्यास करे। फिर 'ॐ ॐ अङ्गुष्ठाभ्यां नमः' इत्यादि छः मन्त्रों से करन्यास करे। फिर उसी से आगे मूल में लिखे 'ॐ ॐ हृदयाय नमः' इत्यादि छः मन्त्र पढ़ते हुए हृदयादि षडङ्गों का न्यास करे। फिर 'ॐ नं तत्पुरुषाय नमः' इत्यादि पाँच मन्त्रों से पञ्चमूर्तिन्यास करना चाहिये। फिर उसके आगे मूल में लिखित 'ॐ नं तत्पुरुषाय नमः' इत्यादि पाँच मन्त्रों से मुखादिन्यास करे। तदुपरान्त 'ॐ नं तत्पुरुषाय नमः' इत्यादि पाँच मन्त्रों से क्रमशः पूर्व-दक्षिण-पश्चिम-उत्तर तथा ऊर्ध्वमुख—इन पाँच वक्त्रों में न्यास करना चाहिये।

अथ गोलकन्यासः—ॐ ॐ नमः हृदये॥ १॥ ॐ नं नमः वक्त्रे॥ २॥ ॐ मं नमः दशांसे॥ ३॥ ॐ शिं नमः वामांसे॥ ४॥ ॐ वां नमः दक्षिणोरौ॥ ५॥ ॐ यं नमः वामोरौ॥ ६॥ इति प्रथमन्यासः॥ १॥ **ॐ ॐ नमः कण्ठे॥ १॥**

ॐ नं नमः नाभौ ॥ २ ॥ ॐ मं नमः दक्षिणपार्श्वे ॥ ३ ॥ ॐ शिं नमः वामपार्श्वे ॥ ४ ॥ ॐ वां नमः पृष्ठे ॥ ५ ॥ ॐ यं नमः हृदये ॥ ६ ॥ इति द्वितीयो न्यासः ॥ २ ॥ **ॐ ॐ नमः मूर्ध्नि ॥ १ ॥ ॐ नं नमः मुखे ॥ २ ॥ ॐ मं नमः दक्षिणनेत्रे ३ ॥ ॐ शिं नमः वामनेत्रे ॥ ४ ॥ ॐ वां नमः दक्षिणनासापुटे ॥ ५ ॥ ॐ यं नमः वामनासापुटे ॥ ६ ॥** इति तृतीयो न्यासः ॥ ३ ॥ **ॐ नं नमः हस्ताङ्गुल्यग्रेषु ॥ १ ॥ ॐ मं नमः हस्ताङ्गुलीमूलेषु ॥ २ ॥ ॐ शिं नमः मणिबन्धयोः ॥ ३ ॥ ॐ वां नमः कूर्परयोः ॥ ४ ॥ ॐ यं नमः बाहुमूलयोः ॥ ५ ॥** इति चतुर्थो न्यासः ॥ ४ ॥ **ॐ नं नमः पादाङ्गुल्यग्रेषु ॥ १ ॥ ॐ मं नमः पादाङ्गुलीमूलेषु ॥ २ ॥ ॐ शिं नमः गुल्फयोः ॥ ३ ॥ ॐ वां नमः जानुनोः ॥ ४ ॥ ॐ यं नमः जङ्घयोः ॥ ५ ॥** इति पञ्चमो न्यासः ॥ ५ ॥ **ॐ ॐ नमः शिरसि ॥ १ ॥ ॐ नं नमः गुह्ये ॥ २ ॥ ॐ मं नमः हृदये ॥ ३ ॥ ॐ शिं नमः कुक्षिद्वये ॥ ४ ॥ ॐ वां नमः ऊरुद्वये ॥ ५ ॥ ॐ यं नमः पादद्वये ॥ ६ ॥** इति षष्ठो न्यासः ॥ ६ ॥ **ॐ ॐ नमः हृदये ॥ १ ॥ ॐ नं नमः वक्त्राम्बुजे ॥ २ ॥ ॐ मं नमः टङ्के ॥ ३ ॥ ॐ शिं नमः मृगे ॥ ४ ॥ ॐ वां नमः अभये ॥ ५ ॥ ॐ यं नमः वरे ॥ ६ ॥** इति सप्तमन्यासः ॥ ७ ॥ **ॐ ॐ नमः वक्त्रे ॥ १ ॥ ॐ नं नमः अंसयोः ॥ २ ॥ ॐ मं नमः हृदये ॥ ३ ॥ ॐ शिं नमः पादद्वये ॥ ४ ॥ ॐ वां नमः ऊरुद्वये ॥ ५ ॥ ॐ यं नमः जठरे ॥ ६ ॥** इत्यष्टमन्यासः ॥ ८ ॥ **ॐ नं तत्पुरुषाय नमः मूर्ध्नि ॥ १ ॥ ॐ मं अघोराय नमः भाले ॥ २ ॥ ॐ शिं सद्योजाताय नमः उदरे ॥ ३ ॥ ॐ वां वामदेवाय नमः अंसयोः ॥ ४ ॥ ॐ यं ईशानाय नमः हृदये ॥ ५ ॥** इति नवमन्यासः ॥ ९ ॥

ॐ नमोस्तु स्थाणुभूताय ज्योतिर्लिङ्गामृतात्मने। चतुर्मूर्तिवपुःस्थायाभाषिताङ्गाय शम्भवे ॥ १ ॥

इति व्यापकं न्यसेत् ॥ १० ॥ एवं दश न्यासान्कृत्वा पार्वतीपतिं ध्यायेत्।

गोलक न्यास—इसमें एक-एक करके दश न्यास किये जाते हैं। मूल में लिखित 'ॐ ॐ नमः हृदये' इत्यादि छः मन्त्रों से प्रथम न्यास करे। फिर उसके आगे लिखे 'ॐ ॐ नमः कण्ठे' इत्यादि छः मन्त्रों से द्वितीय न्यास करे। फिर उससे आगे 'ॐ ॐ नमः मूर्ध्नि' इत्यादि छः मन्त्र से तृतीय न्यास सम्पन्न करना चाहिये। फिर 'ॐ नं नमः हस्ताङ्गुल्यग्रेषु' इत्यादि छः मन्त्र मूल में लिखे हैं, उनसे चतुर्थ न्यास करे। फिर उससे आगे मूल में लिखित 'ॐ नं नमः पादाङ्गुल्यग्रेषु' इत्यादि छः मन्त्र बोलकर पञ्चम न्यास करना चाहिये। फिर आगे लिखे 'ॐ ॐ नमः शिरसि' इन छः मन्त्र से छठा गोलक न्यास करे। फिर 'ॐ ॐ नमः हृदये' इत्यादि जो छः मन्त्र हैं, उनसे सातवाँ गोलक न्यास करना चाहिये। पुनः 'ॐ ॐ नमः वक्त्रे' इत्यादि छः मन्त्र पढ़कर आठवाँ गोलक न्यास सम्पन्न करे। फिर उसके आगे 'ॐ नं तत्पुरुषाय नमः मूर्ध्नि०' इत्यादि छः मन्त्रों से क्रमशः नवम न्यास सम्पन्न करना चाहिये। सबके पश्चात् फिर मूलोक्त 'ॐ नमोस्तु स्थाणुभूताय ज्योतिर्लिङ्गामृतात्मने। चतुर्मूर्तिवपुःस्थाया भाषिताङ्गाय शम्भवे ॥' इन मन्त्र से व्यापक न्यास करे। इस प्रकार दश न्यासों (गोलक न्यासों) को सम्पन्न कर फिर शिवजी का ध्यान करना चाहिये।

अथ ध्यानम्—

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम्।
पद्मासीनं समन्तात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं विश्वाद्यं विश्ववन्द्यं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥ १ ॥

इति ध्यात्वा मानसोपचारैः सम्पूज्य शङ्खं विना अर्घ्यस्थापनादि पूर्ववत्कृत्वा पीठपूजां कुर्य्यात्। तद्यथा शैवे पीठे— 'ॐ मण्डूकादिपरतत्त्वान्तदेवताभ्यो नमः' इति पूर्वोक्तपीठदेवताः सम्पूज्य स्वाग्र्यादिप्रादक्षिण्येन ॐ वामायै नमः ॥ १ ॥ ॐ ज्येष्ठायै नमः ॥ २ ॥ ॐ रौद्र्यै नमः ॥ ३ ॥ ॐ काल्यै नमः ॥ ४ ॥ ॐ कलविकरिण्यै नमः ॥ ५ ॥ ॐ बलविकरिण्यै नमः ॥ ६ ॥ ॐ बलप्रमथिन्यै नमः ॥ ७ ॥ ॐ सर्वभूतदमन्यै नमः ॥ ८ ॥ (मध्ये) ॐ मनोन्मन्यै नमः ॥ ९ ॥ इति पीठशक्तीः पूजयेत्। ततः 'ॐ नमो भगवते सकलगुणात्मशक्तियुक्तायाऽनन्ताय योगपीठात्मने नमः' इति मन्त्रेणासनं दत्त्वा तत्र 'ॐ नमः शिवाय' इति मूलमन्त्रेण मूर्तिं प्रकल्प्य 'अथवा स्वर्णमयीं संस्थाप्य' आवाहनादिपुष्पान्तैरुपचारैः [पूर्वोक्तमन्त्रैः] सम्पूज्य पुष्पाञ्जलिं दत्त्वा आवरणपूजां कुर्यात्। तद्यथा कर्णिकायाम् ईशान्याम्—ॐ ईशानाय

नमः ॥ १ ॥ पूर्वे—ॐ तत्पुरुषाय नमः ॥ २ ॥ दक्षिणे—ॐ अघोराय नमः ॥ ३ ॥ पश्चिमे—ॐ वामदेवाय नमः ॥ ४॥ उत्तरे—ॐ सद्योजाताय नमः ॥ ५ ॥ इति पञ्चमूर्त्तीः पूजयेत्॥ इति प्रथमावरणम्॥ १ ॥

पुनः ईशानादिषु—ॐ निवृत्त्यै नमः ॥ १ ॥ ॐ प्रतिष्ठायै नमः ॥ २ ॥ ॐ विद्यायै नमः ॥ ३ ॥ ॐ शान्त्यै नमः ॥ ४॥ ॐ शान्त्यतीतायै नमः ॥ ५ ॥ इति कलाः पूजयेत्। इति द्वितीयावरणम्॥ २ ॥

ततः पूर्वादिदिक्षु—ॐ सूर्याय नमः ॥ १ ॥ ॐ इन्दवे नमः ॥ २ ॥ ॐ क्षित्यै नमः ॥ ३ ॥ ॐ तोयाय नमः ॥ ४॥ ॐ अग्नये नमः ॥ ५ ॥ ॐ पवनाय नमः ॥ ६ ॥ ॐ आकाशाय नमः ॥ ७ ॥ ॐ यज्वने नमः ॥ ८ ॥ इत्यष्टमूर्तीः पूजयेत्। इति तृतीयावरणम्॥ ३ ॥

ततः पूर्वादिपत्रेषु—ॐ अनन्ताय नमः ॥ १ ॥ ॐ सूक्ष्माय नमः ॥ २ ॥ ॐ शिवोत्तमाय नमः ॥ ३ ॥ ॐ एकनेत्राय नमः ॥ ४ ॥ ॐ एकरुद्राय नमः ॥ ५ ॥ ॐ त्रिमूर्त्तये नमः ॥ ६ ॥ ॐ श्रीकण्ठाय नमः ॥ ७ ॥ ॐ शिखण्डिने नमः ॥ ८ ॥ इति विघ्नेशान् पूजयेत्। इति चतुर्थावरणम्॥ ४ ॥

तद्बाह्ये उत्तरादिक्रमेण—ॐ उमायै नमः ॥ १ ॥ ॐ चण्डेश्वराय नमः ॥ २ ॥ ॐ नन्दिने नमः ॥ ३ ॥ ॐ महाकालाय नमः ॥ ४॥ ॐ गणेशाय नमः ॥ ५ ॥ ॐ वृषभाय नमः ॥ ६ ॥ ॐ भृङ्गरिटये नमः ॥ ७ ॥ ॐ स्कन्दाय नमः ॥ ८ ॥ इति गणान् पूजयेत्। इति पञ्चमावरणम्॥ ५ ॥

तद्बाह्ये भूपुरे पूर्वादिक्रमेण—ॐ इन्द्राय नमः ॥ १ ॥ ॐ अग्नये नमः ॥ २ ॥ ॐ यमाय नमः ॥ ३ ॥ ॐ निर्ऋतये नमः ॥ ४॥ ॐ वरुणाय नमः ॥ ५॥ ॐ वायवे नमः ॥ ६॥ ॐ कुबेराय नमः ॥ ७॥ ॐ ईशानाय नमः ॥ ८॥ ईशानपूर्वयोर्मध्ये—ॐ ब्रह्मणे नमः ॥ ९ ॥ निर्ऋतिपश्चिमयोर्मध्ये—ॐ अनन्ताय नमः ॥ १० ॥ इति दिक्पालान् पूजयेत्। इति षष्ठावरणम्॥ ६ ॥

तद्बाह्ये पूर्वादिषु तत्तत्समीपे—ॐ वज्राय नमः ॥ १ ॥ ॐ शक्त्यै नमः ॥ २ ॥ ॐ दण्डाय नमः ॥ ३ ॥ ॐ खड्गाय नमः ॥ ४ ॥ ॐ पाशाय नमः ॥ ५ ॥ ॐ अङ्कुशाय नमः ॥ ६ ॥ ॐ गदायै नमः ॥ ७ ॥ ॐ त्रिशूलाय नमः ॥ ८ ॥ ॐ पद्माय नमः ॥ ९ ॥ ॐ चक्राय नमः ॥ १० ॥ इत्यायुधानि सम्पूजयेत्। इति सप्तमावरणम्॥ ७ ॥

एवमावरणपूजां कृत्वा धूपदीपादिप्रार्थनान्तं तत्तन्मन्त्रेण सम्पूजयेत्। ततस्तन्मनाश्चतुर्विंशतिलक्षात्मकं जपपुरश्चरणं कृत्वा जपान्ते तद्दशांशेन वा चतुर्विंशतिसहस्रमन्त्रैः पायसं त्रिमधुप्लुतं हुत्वा तद्दशांशेन दुग्धमिश्रजलेन तर्पणं कृत्वा तद्दशांशतो मार्जनं तद्दशांशेन शुद्धान्विप्रांश्च पायसादिना भोजयेत्। एवंकृते सिद्धो मन्त्रो भवति। तत्सिद्धमन्त्रेण सर्वार्थान्साधयेत्। तथा च शारदातिलके अष्टादशे पटले—

ततः सिद्धो भवेन्मन्त्रः साधकाभीष्टसिद्धिदः। इत्थं सम्पूजयेद्देवं सहस्रं नित्यशो जपेत्॥ १ ॥
सर्वपापविनिर्मुक्तः प्राप्नुयाद्वाञ्छितां श्रियम्। द्विसहस्रं जपेद्रोगान्मुच्यते नात्र संशयः॥ २ ॥
त्रिसहस्रं जपेन्मन्त्रं दीर्घमायुरवाप्नुयात्। सहस्रवृद्ध्या प्रजपेत्सर्वान्कामानवाप्नुयात्॥ ३ ॥
आज्यान्वितैस्तिलैः शुद्धैर्जुहुयाल्लक्षमादरात्। उत्पातजनितान्क्लेशान्नाशयेन्नात्र संशयः॥ ४ ॥
शतलक्षं जपेत्साक्षाच्छिवो भवति मानवः।


इति शिवपञ्चाक्षरमन्त्रप्रयोगः।

ध्यान मन्त्र—मूल में लिखित 'ॐ ध्यायेन्नित्यं महेशं रजतगिरिनिभम्०' इत्यादि श्लोक से महेश का ध्यान कर मानसोपचारों से उनकी पूजा कर शङ्ख का उपयोग अर्घ्य में न करते हुए श्री शिवजी को विशेषार्घ्य प्रदान करे। फिर पूर्व से ही निर्मित शैवपीठ की पूजा अग्रलिखित विधि से करे। पीठ पर शिवयन्त्र चित्र के अनुसार बनाये तथा उसके अनुसार मन्त्र बोलते हुए पीठ का पूजन सम्पन्न करना चाहिये। यन्त्र में भीतर दो त्रिभुजों के परस्पर काटने से षड्दल कमल बनता है; उसके मध्य भाग में मूर्ति रखते हैं। षड्दल कमल के बाहर वृत्त बनाते हैं। वृत्त के

बाहर अष्टदल कमल होता है तथा उसके बाहर की ओर एक सम चतुर्भुज चतुर्द्वारयुक्त बनाते हैं। इस प्रकार इस यन्त्रपीठ में सात आवरण होते हैं तथा उसके बाह्यभाग को भूपुर कहा जाता है। सभी मन्त्रों के अनुष्ठान में इसका पूजन होता है। पूजन में दिशाओं एवं आवरणों का ध्यान रखना चाहिये।

शैव यन्त्रपीठ-पूजन—सर्वप्रथम 'ॐ मण्डूकादिपरतत्त्वान्तदेवताभ्यो नमः' कहे। फिर अपने सामने से प्रदक्षिणक्रम से 'ॐ वामायै नमः' इत्यादि नौ मूलोक्त मन्त्रों से पीठ की शक्तियों का पूजन करे। फिर 'ॐ नमो भगवते सकलगुणात्मशक्तियुक्तायाऽनन्ताय योगपीठात्मने नमः' इस मन्त्र से आसन देकर 'ॐ नमः शिवाय' इस मूल मन्त्र से भगवान् शिव की मूर्ति मन में कल्पित कर ले अथवा यदि सम्भव हो तो यन्त्रपीठ के मध्य में स्वर्णमयी शिवप्रतिमा स्थापित कर आवाहन से आरम्भ कर पुष्पाञ्जलि-पर्यन्त पूजन कर फिर यन्त्रपीठ में आवरण पूजा प्रारम्भ करे।

शिवयन्त्रम्



प्रथमावरण पूजा—कर्णिका (कमल का मध्य भाग) प्रथम आवरण है, उसमें ईशान से आरम्भ कर प्रदक्षिणक्रम से 'ईशानाय नमः' इत्यादि पाँच मन्त्रों से प्रणवपूर्वक शिव की पञ्चमूर्तियों का पूजन करे।

द्वितीयावरण पूजा—फिर पुनः ईशानादि दिशाओं में 'ॐ निवृत्त्यै नमः' इत्यादि पाँच मन्त्रों से पञ्चकलाओं का पूजन द्वितीयावरण में करना चाहिये।

तृतीयावरण पूजा—फिर तृतीय आवरण में (जो कि द्वितीय आवरण के बाहर होता है) पूर्व आदि दिशाओं में (चारो कोणों सहित कुल आठ दिशाओं में) मूल में लिखित 'ॐ सूर्याय नमः' इत्यादि आठ मन्त्रों से शिव की आठ मूर्तियों की पूजा करे।

चतुर्थ आवरण पूजा—फिर चौथे आवरण में पूर्वादि दिशाओं में कमल के पत्रों (पङ्खुड़ियों) पर प्रदक्षिणक्रम से 'ॐ अनन्ताय नमः' आदि मूलोक्त मन्त्रों से आठ विघ्नेशों की पूजा करे।

पञ्चम आवरण की पूजा—फिर चतुर्थावरण के बारह की ओर उत्तर दिशा से आरम्भ कर 'ॐ उमायै नमः' इत्यादि आठ मन्त्रों से आठ गणों की पूजा करे।

भूपूर में पूजा—यह छठा आवरण है। इसमें पूर्वादि दिशाओं में क्रम से 'ॐ इन्द्राय नमः' इत्यादि दश मन्त्रों से दश दिक्पालों की पूजा करे।

फिर उसके बाहर सातवें आवरण में पूर्वादि दश दिशाओं में 'ॐ वज्राय नमः' इत्यादि दश मन्त्रों से दिक्पालों के आयुधों की पूजा करनी चाहिये। फिर धूप-दीपादि एवं बलिदान भी दिक्पालों को करे। फिर मन लगाकर चौबीस लाख मन्त्र (ॐ नमः शिवाय) का जप करके जपान्त में उसका दशांश होम, उसका दशांश तर्पण, उसका दशांश मार्जन, फिर उसका दशांश ब्राह्मणभोजन कराने से मन्त्र सिद्ध हो जाता है। हवन में पायस को त्रिमधु (घी-शक्कर तथा शहद) में मिलाकर होम करना चाहिये। इस सिद्ध मन्त्र को अपनी कामनापूर्ति-हेतु प्रयोग करना चाहिये। शारदातिलक के अठारहवें पटल के अनुसार सिद्ध मन्त्र का प्रतिदिन सहस्रवृद्धि (प्रथम दिन एक हजार, द्वितीय दिन दो हजार, तृतीय दिन तीन हजार) इस प्रकार क्रम से जप करने से सभी मनोकामनाएँ पूरी होती हैं। आदरपूर्वक घृतयुक्त काले तिलों से एक लाख आहुति देने से उत्पातजनित क्लेश नष्ट होते हैं, इसमें सन्देह नहीं है। यदि सौ लाख (शत लक्ष) का जप कर ले तो मनुष्य साक्षात् शिव हो जाता है।

शिवाष्टाक्षरमन्त्रप्रयोगः

अथ अष्टाक्षरीशिवमन्त्रप्रयोगः शारदातिलके। तत्र मन्त्रस्वरूपम्—'ह्रीं ॐ नमः शिवाय ह्रीं' इत्यष्टाक्षरो मन्त्रः। अस्याष्टाक्षरमन्त्रस्य वामदेव ऋषिः। पङ्क्तिच्छन्दः। उमापतिर्देवता। सर्वेष्टसिद्धये जपे विनियोगः।

अथ ऋष्यादिन्यासः—ॐ वामदेवऋषये नमः शिरसि॥ १॥ ॐ पङ्क्तिच्छन्दसे नमः मुखे॥ २॥ ॐ उमाकान्तदेवतायै नमः हृदये॥ ३॥

अथ करन्यासः—ॐ ॐ अङ्गुष्ठाभ्यां नमः॥ १॥ ॐ नं तर्जनीभ्यां नमः॥ २॥ ॐ मं मध्यमाभ्यां नमः॥ ३॥ ॐ शिं अनामिकाभ्यां नमः॥ ४॥ ॐ वां कनिष्ठिकाभ्यां नमः॥ ५॥ ॐ यं करतलकरपृष्ठाभ्यां नमः॥ ६॥

अथ हृदयादिन्यासः—ॐ ॐ हृदयाय नमः॥ १॥ ॐ नं शिरसे स्वाहा॥ २॥ ॐ मं शिखायै वषट्॥ ३॥ ॐ शिं कवचाय हुम्॥ ४॥ ॐ वां नेत्रत्रयाय वौषट्॥ ५॥ ॐ यं अस्त्राय फट्॥ ६॥ ततो ध्यानम्—

बन्धूकाभं त्रिनेत्रं शशिशकलधरं स्मेरवक्त्रं वहन्तं हस्तैः शूलं कपालं वरदमभयदं चारुहारं नमामि।
वामोरुस्तम्भगायाः करतलविलसच्चारुरक्तोत्पलाया हस्तेनाश्लिष्टदेहं मणिमयविलसद्भूषणायाः प्रियायाः॥ १॥

अष्टाक्षरी शिवमन्त्र-प्रयोग—'ह्रीं ॐ नमः शिवाय ह्रीं' यह अष्टाक्षर मन्त्र है। सर्वप्रथम 'अस्याष्टाक्षरमन्त्रस्य वामदेव ऋषिः। पङ्क्तिश्छन्दः। उमापतिः देवता। सर्वेष्टसिद्धये जपे विनियोगः' ऐसा कहकर विनियोग के लिये जल छोड़ना चाहिये। तदनन्तर 'ॐ वामदेवऋषये नमः शिरसि॥ १॥ ॐ पङ्क्तिच्छन्दसे नमः मुखे॥ २॥ ॐ उमाकान्देवतायै नमः हृदये॥ ३॥' इन मन्त्रों से ऋष्यादि का न्यास करे। इसको पश्चात् 'ॐ ॐ अङ्गुष्ठाभ्यां नमः॥ १॥ ॐ नं तर्जनीभ्यां नमः॥ २॥ ॐ मं मध्यमाभ्यां नमः॥ ३॥ ॐ शिं अनामिकाभ्यां नमः॥ ४॥ ॐ वां

कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ यं करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥' इन छः मन्त्रों से करन्यास करे। पुनः 'ॐ ॐ हृदयाय नमः ॥ १ ॥ ॐ नं शिरसे स्वाहा ॥ २ ॥ ॐ मं शिखायै वषट् ॥ ३ ॥ ॐ शिं कवचाय हुम् ॥ ४ ॥ ॐ वां नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ यं अस्त्राय फट् ॥ ६ ॥' इन छः मन्त्रों से हृदयादि न्यास करे। फिर मूल में लिखित 'बन्धूकाभं त्रिनेत्र०' इत्यादि मन्त्र से श्रीशिवजी का ध्यान करे।

ततः प्राक् प्रोक्ते शैवे पीठे पूर्ववत् वामादिनवशक्तीः सम्पूज्य ॐ सकलगुणात्मशक्तियुक्तायानन्ताय योगपीठात्मने नमः इत्यासनं दत्त्वा तत्र उमापतिं पुष्पान्तैरुपचारैः सम्पूज्य आवरणपूजां कुर्यात्। तद्यथा—केसरेषु अग्न्यादिकोणेषु मध्ये दिक्षु च आग्नेय्यां ॐ ॐ हृदयाय नमः ॥ १ ॥ नैर्ऋत्यां ॐ नं शिरसे स्वाहा ॥ २ ॥ वायव्यां ॐ मं शिखायै वषट् ॥ ३ ॥ ईशान्यां ॐ शिं कवचाय हुं ॥ ४ ॥ मध्ये ॐ वां नेत्रत्रयाय वौषट् ॥ ५ ॥ दिक्षु ॐ यं अस्त्राय फट् इति पूजयेत्। इति प्रथमावरणम् ॥ १ ॥ तद्बाह्ये मध्ये पूर्वादिदिक्षु च ॐ हृल्लेखायै नमः ॥ १ ॥ ॐ गगनायै नमः ॥ २ ॥ ॐ रक्तायै नमः ॥ ३ ॥ ॐ करालिकायै नमः ॥ ४ ॥ ॐ महोच्छुष्मायै नमः ॥ ५ ॥ इति द्वितीयावरणम् ॥ २ ॥ तद्बाह्ये पूर्वादिपत्रेषु—ॐ वृषभाय नमः ॥ १ ॥ ॐ क्षेत्रपालाय नमः ॥ २ ॥ ॐ दुर्गायै नमः ॥ ३ ॥ ॐ कार्तिकेयाय नमः ॥ ४ ॥ ॐ नन्दिने नमः ॥ ५ ॥ ॐ विघ्नाय नमः ॥ ६ ॥ ॐ श्यामाय नमः ॥ ७ ॥ ॐ सेनापतये नमः ॥ ८ ॥ इति पूजयेत्। इति तृतीयावरणम् ॥ ३ ॥ ततः पत्राग्रेषु पूर्वादिक्रमेण—ॐ ब्राह्म्यै नमः ॥ १ ॥ ॐ माहेश्वर्य्यै नमः ॥ २ ॥ ॐ कौमार्यै नमः ॥ ३ ॥ ॐ वैष्णव्यै नमः ॥ ४ ॥ ॐ वाराह्यै नमः ॥ ५ ॥ ॐ इन्द्राण्यै नमः ॥ ६ ॥ ॐ चामुण्डायै नमः ॥ ७ ॥ ॐ महालक्ष्म्यै नमः ॥ ८ ॥ इति चतुर्थावरणम् ॥ ४ ॥ तद्बाह्ये भूपुरे इन्द्रादीन् तद्बाह्ये वज्राद्यायुधानि च पूजयेत्। इत्यावरणपूजां कृत्वा धूपदीपादिनमस्कारान्तं कर्म्म समाप्य चतुर्दशलक्षं मन्त्रं जपेत्। जपान्ते चतुर्दशसहस्रं यथाविधि मधुरासिक्तैरारग्वधैः समिद्भिर्होमं कुर्य्यात्। ततः तद्दशांशेन तर्पणं तद्दशांशतो मार्जनं तद्दशांशेन ब्राह्मणभोजनं च कुर्यात्। तथा च शारदातिलके—

मनुलक्षं जपेन्मन्त्रं तत्सहस्रं यथाविधि। जुहुयान्मधुरासिक्तैरारग्वधसमिद्वरैः ॥ १ ॥
एवं यो भजते मन्त्री देवेशं तमुमापतिम्। स भवेत्सर्वलोकानां प्रियः सौभाग्यसम्पदाम् ॥ २ ॥

इत्यष्टाक्षरीशिवमन्त्रप्रयोगः।

शिवयन्त्रपीठ की पूजा—फिर पूर्वकथित शैव पीठ पर वामादि नौ शक्तियों का पूजन करने के उपरान्त 'ॐ सकलगुणात्मशक्तियुक्तायानन्ताय योगपीठात्मने नमः' ऐसा कहकर शिवजी को आसन प्रदान करे। फिर उन उमापति का पुष्पाञ्जलि-पर्यन्त उपचारों से पूजन कर आवरणपूजा करे। बीच में बने अष्टदल कमल की केसरों में, मध्य में तथा आग्नेयादि क्रम से चारो दिशाओं में 'ॐ हृदयाय नमः' इत्यादि पाँच मन्त्रों से पूजा करे। यह प्रथम आवरण है। द्वितीयावरण प्रथम आवरण के बाहर होता है। उसके मध्य में तथा पूर्वादि चार दिशाओं में 'ॐ हृल्लेखायै नमः' इत्यादि पाँच मन्त्रों से पूजन करे। फिर उससे बाहर पूर्वादि आठों दिशाओं में 'ॐ वृषभाय नमः' इत्यादि आठ मन्त्रों से पूजा करे। फिर उनके बाहर पत्राग्रों में 'ॐ ब्राह्म्यै नमः' इत्यादि आठ मन्त्रों से पूर्वादि आठों दिशाओं में पूजन करे। यह चतुर्थ आवरण की पूजा है। फिर उसके बाहर भूपुर में इन्द्रादि देवताओं तथा उसके बाहर उनके आयुधों की पूजा करे। फिर अष्टाक्षरी मन्त्र का चौदह लाख जप करे। जप की समाप्ति पर जप का दशांश हवन अमलतास की समिधाओं को मधुरासिक्त (शर्करा या मधु में लपेटकर) कर करे। होम का दशांश तर्पण, फिर उसका दशांश मार्जन तथा मार्जन का दशांश ब्राह्मणभोजन कराये। जैसा कि शारदातिलक में कहा है—मन्त्र को चौदह लाख की सङ्ख्या में जप कर विधिपूर्वक अमलतास की मधुरासिक्त समिधाओं से होम करे। इस प्रकार से जो मन्त्र जापक उन देव उमापति को भजता है, वह लोकप्रिय होकर सौभाग्य तथा सम्पत्ति को प्राप्त करता है।

त्र्यक्षरमृत्युञ्जयमन्त्रप्रयोगः

अथ त्र्यक्षरीमृत्युञ्जयमन्त्रप्रयोगः। अस्य श्रीत्र्यक्षरात्मकमृत्युञ्जयमन्त्रस्य कहोलऋषिर्गायत्रीछन्दः। मृत्युञ्जयो महादेवो देवता। जूँ बीजम्। सः शक्तिः। सर्वेष्टसिद्ध्यर्थे जपे विनियोगः। ॐ कहोलऋषये नमः शिरसि॥ १॥ ॐ गायत्रीछन्दसे नमः मुखे॥ २॥ ॐ मृत्युञ्जयदेवतायै नमः हृदये॥ ३॥ ॐ जूँ बीजाय नमः गुह्ये॥ ४॥ ॐ सः शक्तये नमः पादयोः॥ ५॥ इति ऋष्यादिन्यासः। अथ करन्यासः—**ॐ सां अङ्गुष्ठाभ्यां नमः॥ १॥ ॐ सीं तर्जनीभ्यां नमः॥ २॥ ॐ सूं मध्यमाभ्यां नमः॥ ३॥ ॐ सैं अनामिकाभ्यां नमः॥ ४॥ ॐ सौं कनिष्ठिकाभ्यां नमः॥ ५॥ ॐ सः करतलकरपृष्ठाभ्यां नमः॥ ६॥** एवं हृदयादिन्यासं कुर्यात्। अथ ध्यानम्—

चन्द्रार्काग्निविलोचनं स्मितमुखं पद्मद्वयान्तःस्थितं मुद्रापाशमृगाक्षसूत्रविलसत्पाणिं हिमांशुप्रभम्।
कोटीरेन्दुगलत्सुधाप्लुततनुं हारादिभूषोज्ज्वलं कान्त्या विश्वविमोहनं पशुपतिं मृत्युञ्जयं भावयेत्॥ १॥

पूर्वोक्ते शैवे पीठे मूलेन मूर्तिं प्रकल्प्य तत्र मृत्युञ्जयं महादेवं पुष्पान्तैरुपचारैः सम्पूज्य आवरणपूजां कुर्यात्।

त्र्यक्षरी मृत्युञ्जय मन्त्र की प्रयोगविधि—'अस्य श्रीत्र्यक्षरात्मकमृत्युञ्जयमन्त्रस्य कहोलऋषिः, गायत्रीछन्दः, मृत्युञ्जयो देवता, जूं बीजं, सः शक्तिः, सर्वेष्टसिद्ध्यर्थे जपे विनियोगः' कहकर विनियोग का जल छोड़े। तदनन्तर 'ॐ कहोलऋषये नमः शिरसि॥ १॥ ॐ गायत्री छन्दसे नमः मुखे॥ २॥ ॐ मृत्युञ्जयदेवतायै नमः हृदये॥ ३॥ ॐ जूं बीजाय नमः गुह्ये॥ ४॥ ॐ सः शक्तये नमः पादयोः॥ ५॥' इन पाँच मन्त्रों से ऋष्यादि न्यास करे। इसके बाद 'ॐ सां अङ्गुष्ठाभ्यां नमः' इत्यादि छः मन्त्रों से करन्यास करे। फिर इन्हीं छः मन्त्रों से हृदयादि न्यास भी करना चाहिये। फिर भगवान् मृत्युञ्जय (शिव) का ध्यान मूल में लिखित 'चन्द्रार्काग्निविलोचनं' इत्यादि से करे। मन्त्र का भावार्थ इस प्रकार है—जिनके चन्द्रमा-सूर्य तथा अग्नि—ये तीनों नेत्र हैं, जिनका मुखमण्डल प्रसन्न है, जो दो कमलों के भीतर स्थित हैं; जिनके हाथों में मुद्रा, पाश, मृग, अक्षसूत्र सुशोभित हैं; जिनकी कान्ति चन्द्रमा के समान है, जिनका शरीर करोड़ों चन्द्रमा के अमृत से आप्लुत है; जो हारादि की भूषा से उज्ज्वल हैं; जो अपनी कान्ति से सम्पूर्ण विश्व को विमोहित करते हैं, ऐसे पशुपति मृत्युञ्जय का ध्यान करना चाहिये। तदुपरान्त पूर्ववर्णित शैवपीठ पर मूलमन्त्र (ॐ ह्रीं जूं सः) से मृत्युञ्जय की मूर्ति की कल्पना करे। फिर उसका पुष्पाञ्जलि-पर्यन्त उपचार करे। तदुपरान्त आवरण पूजा करे।

तद्यथा—केशरेषु आग्नेयादिकोणेषु मध्ये दिक्षु च ॐ सां हृदयाय नमः॥ १॥ ॐ सीं शिरसे स्वाहा॥ २॥ ॐ सूं शिखायै वषट्॥ ३॥ ॐ सैं कवचाय हुम्॥ ४॥ ॐ सौं नेत्रत्रयाय वौषट्॥ ५॥ ॐ सः अस्त्राय फट्॥ ६॥ इत्यङ्गानि यजेत्। इति प्रथमावरणम्। तद्बाह्ये इन्द्रादीन् वज्रादींश्च सम्पूजयेत्। ततो धूपादिनमस्कारान्तं समाप्य लक्षत्रयं जपं कुर्यात्। ततस्तद्दशांशेन दुग्धाज्यलोलितैरमृताखण्डैर्होमं कृत्वा तद्दशांशतस्तर्पणमार्जनब्राह्मणभोजनानि पूर्ववत् कृत्वा सिद्धे मन्त्रे प्रयोगान् कुर्यात्।

प्रथमावरण पूजा—भीतर के अष्टदल कमल की केशरों में, आग्नेयादि कोणों में, फिर मध्य में, फिर पूर्वादि दिशाओं में पूजा करके फिर 'ॐ सां हृदयाय नमः' इत्यादि छः मन्त्रों से मूर्ति के हृदयादि छः अङ्गों की पूजा करे। फिर बाहर की ओर इन्द्रादि दिक्पालों एवं उनके आयुधों की पूजा करके धूपादि नमस्कार-पर्यन्त पूजन करे। तदनन्तर 'ॐ हों जूं सः' इस त्र्यक्षरी मृत्युञ्जय मन्त्र का तीन लाख की सङ्ख्या जप करे। फिर जपसङ्ख्या के दशांश दूध-घृतमिश्रित गिलोय के टुकड़ों से होम करे। फिर होम का दशांश तर्पण करे। उसका दशांश मार्जन, फिर उसका दशांश ब्राह्मणभोजन कराये। इस प्रकार मन्त्र सिद्ध हो जाता है, तब उसका विविध काम्यकर्मों में प्रयोग करना चाहिये।

तद्यथा—

दुग्धयुक्तैः सुधाखण्डैर्मन्त्री मासं सहस्रकम्। आराधितेऽग्नौ जुहुयाद्विधिवद्विजितेन्द्रियः॥
सन्तुष्टः शङ्करस्तेन सुधाप्लावितविग्रहः। आयुरारोग्यसम्पत्तियशःपुत्रान् विवर्द्धयेत्॥

सुधावटौ तिला दूर्वा पयः सर्पिःमयो हविः। इत्युक्तैः सप्तभिर्द्रव्यैर्जुहुयात्सप्तवासरम्॥
क्रमाद्दशांशतो नित्यमष्टोत्तरमतन्द्रितः। सप्ताधिकान् द्विजान्नित्यं भोजयेन्मधुरान्वितम्॥
विकारानुगुणं मन्त्री वर्द्धयेद्धोमवासरान्। होतृभ्यो दक्षिणां दद्यादरुणा गाः पयस्विनीः॥
गुरुं सम्प्रीणयेत्पश्चाद्धनाद्यैर्देवताधिया। अनेन विधिना साध्यः कृत्याद्रोहज्वरादिभिः॥
विमुक्तः सुचिरं जीवेच्छरदां शतमञ्जसा। अभिचारे ज्वरे तीव्रे घोरोन्मादे शिरोगदे॥
असाध्यरोगक्ष्वेडादौ महादाहे महाभये। होमोऽयं शान्तिदः प्रोक्तः सर्वसम्पत्प्रदायकः॥

१. दुग्धसिक्त सुधा (गिलोय) के टुकड़ों से जापक द्वारा एक मास तक प्रतिदिन एक सहस्र हवन एक मास-पर्यन्त करने से भगवान् शङ्कर अमृत से आप्लावित विग्रह के साथ सन्तुष्ट होकर साधक के आयु-आरोग्य, सम्पत्ति, यश तथा पुत्रों की वृद्धि करते हैं। गिलोय, वट के अङ्कुर, काले तिल, दूर्वा, पय (गोदुग्ध) तथा घृत—इनसे मिश्रित हवि (इन सात पदार्थों से बना) से लगातार सात दिनों तक उक्त मन्त्र से एक सौ आठ की सङ्ख्या में अतन्द्रित होकर हवन करना चाहिये; फिर उसका दशांश तर्पणादि ब्राह्मणभोजन-पर्यन्त सम्पन्न करे। प्रतिदिन सात-सात ब्राह्मणों की सङ्ख्या बढाता रहे (अर्थात् दिनों के क्रम से ७-१४-२१-२८-३५-४२ तथा ४९—इस प्रकार ब्राह्मणों की सङ्ख्या रखें) तथा मधुर भोजन कराये। यदि रोगादि पीड़ा अधिक हो तो होम के दिन सप्ताह से अधिक बढ़ा दे। फिर होताओं को दक्षिणा तथा लाल रङ्ग की दुधारु गाय का दान करे। फिर गुरु (आचार्य) को देवता मानकर सन्तुष्ट करे। इस विधि से शत्रुता एवं ज्वरादि रोग तथा कृत्या (मूठ) आदि का दुष्प्रभाव शान्त हो जाता है। फिर इन सब कष्टों से मुक्त होकर एक सौ वर्ष की आयु-पर्यन्त जीवित रहे। इस सिद्ध मन्त्र का प्रयोग ज्वर की तीव्रता, घोर उन्माद (पागलपन), तीव्र शिरोरोग, असाध्य रोग, विषाक्तता, महादाह, महाभय आदि में होमपूर्वक करने से शान्ति प्राप्त होती है। यह होम सर्वसम्पत्तिदायक है।

द्रव्यैरेतैः प्रजुहुयात् त्रिजन्मसु यथाविधि। भोजयेन्मधुरैर्भोज्यैर्ब्राह्मणान् वेदपारगान्॥ ९॥
दीर्घमायुरवाप्नोति वाञ्छितां विन्दति श्रियम्। एकादशाहुतीर्नित्यं दूर्वाभिर्जुहुयाद्बुधः॥ १०॥
अपमृत्युजिदेष स्यादायुरारोग्यवर्द्धनः। त्रिजन्मसु सुधावल्लीकाश्मरीबकुलोद्भवैः॥ ११॥
समिद्वरैः कृतो होमः सर्वमृत्युगदापहः। सिद्धान्नैर्विहितो होमो महाज्वरविनाशनः॥ १२॥
अपामार्गसमिद्धोमः सर्वामयविषूदनः॥

प्रणवरचितनालं मन्त्रमध्यार्णपत्रं भृगुविलसितमध्यं पद्मयुग्मं तदन्तः।
कृतवसतिमुमेशं वर्णनिर्यत्सुधार्द्रं कलयतु हृदि नित्यं सर्वदुःखप्रशान्त्यै॥

यन्त्राढ्ये कमले सौम्ये कलशं प्रोक्तवर्त्मना। नवरत्नसमायुक्तं दुकूलाभ्यामलङ्कृतम्॥
आपूर्य सलिलैः शुद्धैस्तस्मिन्देवं प्रपूजयेत्। उपचारैः षोडशभिर्विधानेन विधानवित्॥
अभिषिञ्चेत्प्रियं साध्यं विनीतं दत्तदक्षिणम्। आधिव्याधिमहारोगकृत्याद्रोहनिवारणः॥

मध्ये साध्याक्षराढ्यं ध्रुवमभिविलिखेन्मध्यमं दिग्दलस्थं कोणेष्वन्त्यं मनोस्तत् क्षितिभुवनमथो दिक्षु चन्द्रान् विदिक्षु।
टान्तं यन्त्रं तदुक्तं सकलभयहरं क्ष्वेडभूतापमृत्युव्याधिव्यामोहदुःखप्रशमनमुदितं श्रीप्रदं कीर्तिदायि॥

इति त्र्यक्षरीमृत्युञ्जयमन्त्रप्रयोगः समाप्तः।

इन पूर्वकथित सात द्रव्यों का हवन त्रिजन्मनक्षत्रों (जन्मनक्षत्र, फिर उससे दसवाँ नक्षत्र, फिर उससे दसवाँ अर्थात् उन्नीसवाँ नक्षत्र) में विधिपूर्वक करे तथा वेदपारङ्गत ब्राह्मणों को भोजन कराये तो उस कर्ता को दीर्घ आयु की प्राप्ति होती है तथा मनोवांछित श्री (लक्ष्मी) मिलती है। यदि बुद्धिमान् व्यक्ति नित्यप्रति ग्यारह आहुतियों से होम करता

रहे तो वह अकाल मृत्युओं एवं रोगों से बचा रहेगा (यह होम दैनिक जीवन का अङ्ग होना चाहिये) तथा आयु-आरोग्य की वृद्धि होगी। यदि त्रिजन्मनक्षत्रों पर गिलोय, गम्भारी, मौलसिरि की समिधाओं से होम करे तो सभी प्रकार की मृत्युओं (१. व्यथा, २. भय, ३. दुःख, ४. लज्जा, ५. रोग, ६. शोक, ७. मरण, ८. अपमान—ये आठ प्रकार की मृत्यु होती है) को दूर करता है। सिद्धान्न (खीर, मालपूआ आदि) से किया गया होम महाभयङ्कर रोगों को दूर करता है। अपामार्ग (अज्झाझारा) की समिधाओं से किया गया होम सर्वरोगनाशक है। सभी दुःखों की शान्ति के लिये प्रणव से रचित नाल मन्त्र के मध्य वर्ण का पत्र, भृगु विलसित मध्य, दो कमलों के भीतर जिनका निवास है उन अमृत से आर्द्र वर्ण के मृत्युञ्जय शिव का नित्य हृदय में ध्यान करना सभी दुःखों को शान्त करता है। यन्त्र से युक्त अष्टदल कमल पर कलश स्थापित कर उसमें नवरत्न डालकर पूर्णपात्र रखकर दुकूल (वस्त्र) से लपेटकर उसमें जल भरकर उसमें देव (मृत्युञ्जय) की षोडशोपचार पूजा करे। फिर उनका अभिषेक करे तो इच्छापूर्ति हो जाती है। ब्राह्मणों को विनीत भाव से दक्षिणा दे। यह विधान आधि-व्याधि तथा महान् शत्रुता एवं विद्रोह का निवारण करता है। कृत्या का भी दुष्प्रभाव दूर होता है। यह अभिषेक लक्ष्मी एवं कीर्तिप्रद कहा गया है।

त्र्यम्बकमन्त्रप्रयोगः

शारदातिलके—

त्रयम्बकं मन्त्रमभिधास्याम्यनुष्टुभम्। यं भजन्तं नरं कालः स्वयं वीक्षितुमक्षमः॥ १॥


तत्रादौ पूर्वोक्तशिवपञ्चाक्षरमन्त्रवत् श्रीकण्ठादिन्यासान्तं कृत्वा अस्य त्र्यम्बकमन्त्रस्य वसिष्ठऋषिरनुष्टुप् छन्दस्त्र्यम्बकः पार्वतीपतिर्देवता त्र्यं बीजं बं शक्तिः कं कीलकं सर्वेष्टसिद्ध्यर्थे जपे विनियोगः। अथ ऋष्यादिन्यासः—ॐ वशिष्ठऋषये नमः शिरसि॥ १॥ ॐ अनुष्टुप्छन्दसे नमः मुखे॥ २॥ ॐ त्र्यम्बकदेवतायै नमः हृदये॥ ३॥ ॐ त्र्यं बीजाय नमः गुह्ये॥ ४॥ ॐ बं शक्तये नमः पादयोः॥ ५॥ ॐ कं कीलकाय नमः सर्वाङ्गे॥ ६॥ अथ करन्यासः—ॐ त्र्यम्बकं अङ्गुष्ठाभ्यां नमः॥ १॥ ॐ यजामहे तर्जनीभ्यां नमः॥ २॥ ॐ सुगन्धिम्पुष्टिवर्धनं मध्यमाभ्यां नमः॥ ३॥ ॐ उर्वारुकमिव बन्धनात् अनामिकाभ्यां नमः॥ ४॥ ॐ मृत्योर्मुक्षीय कनिष्ठिकाभ्यां नमः॥ ५॥ ॐ मामृतात् करतलकरपृष्ठाभ्यां नमः॥ ६॥ अथ हृदयादिषडङ्गन्यासः—ॐ त्र्यम्बकं हृदयाय नमः॥ १॥ ॐ यजामहे शिरसे स्वाहा॥ २॥ ॐ सुगन्धिम्पुष्टिवर्धनं शिखायै वषट्॥ ३॥ ॐ उर्वारुकमिव बन्धनात् कवचाय हुं॥ ४॥ ॐ मृत्योर्मुक्षीय नेत्रत्रयाय वौषट्॥ ५॥ ॐ मामृतात् अस्त्राय फट्॥ ६॥ अथाङ्गन्यासः—ॐ त्र्यं नमः पूर्वमुखे॥ १॥ ॐ बं नमः पश्चिममुखे॥ २॥ ॐ कं नमः दक्षिणमुखे॥ ३॥ ॐ यं नमः उत्तरमुखे॥ ४॥ ॐ जां नमः उरसि॥ ५॥ ॐ मं नमः कण्ठे॥ ६॥ ॐ हें नमः मुखे॥ ७॥ ॐ सुं नमः नाभौ॥ ८॥ ॐ गं नमः हृदि॥ ९॥ ॐ धिं नमः पृष्ठे॥ १०॥ ॐ पुं नमः कुक्षौ॥ ११॥ ॐ ष्टिं नमः लिङ्गे॥ १२॥ ॐ वं नमः गुदे॥ १३॥ ॐ धं नमः दक्षिणोरुमूले॥ १४॥ ॐ नं नमः वामोरुमूले॥ १५॥ ॐ उं नमः दक्षिणोरुमध्ये॥ १६॥ ॐ वां नमः वामोरुमध्ये॥ १७॥ ॐ रुं नमः दक्षिणजानुनि॥ १८॥ ॐ कं नमः वामजानुनि॥ १९॥ ॐ मिं नमः दक्षिणजानुवृत्ते॥ २०॥ ॐ वं नमः वामजानुवृत्ते॥ २१॥ ॐ बं नमः दक्षिणस्तने॥ २२॥ ॐ धं नमः वामस्तने॥ २३॥ ॐ नां नमः दक्षिणपार्श्वे॥ २४॥ ॐ मृं नमः वामपार्श्वे॥ २५॥ ॐ त्यों नमः दक्षिणपादे॥ २६॥ ॐ मुं नमः वामपादे॥ २७॥ ॐ क्षीं नमः दक्षिणकरे॥ २८॥ ॐ यं नमः वामकरे॥ २९॥ ॐ मां नमः दक्षिणनासायाम्॥ ३०॥ ॐ मृं नमो वामनासायाम्॥ ३१॥ ॐ तां नमः मूर्ध्नि॥ ३२॥ इत्यक्षरन्यासः। अथ पदन्यासः—ॐ त्र्यम्बकं शिरसि॥ १॥ ॐ यजामहे भ्रुवोः॥ २॥ ॐ सुगन्धिं नेत्रयोः॥ ३॥ ॐ पुष्टिवर्द्धनं मुखे॥ ४॥ ॐ उर्वारुकं गण्डयोः॥ ५॥ ॐ इव हृदये॥ ६॥ ॐ बन्धनात् जठरे॥ ७॥ ॐ मृत्योः लिङ्गे॥ ८॥ ॐ मुक्षीय हृदये॥ ९॥ ॐ मा जान्वोः॥ १०॥ ॐ अमृतात् पादयोः॥ ११॥ इति पदन्यासं कृत्वा ध्यायेत्—

हस्ताभ्यां कलशद्वयामृतरसैराप्लावयन्तं शिरो द्वाभ्यां तौ दधतं मृगाक्षवलये द्वाभ्यां वहन्तं परम्।
अङ्के न्यस्तकरद्वयामृतघटं कैलासकान्तं शिवं स्वच्छाम्भोजगतं नवेन्दुमुकुटं देवं त्रिनेत्रं भजे॥ १॥

त्र्यम्बक मन्त्र-प्रयोग—जो मनुष्य इस त्र्यम्बक नामक अनुष्टुप् छन्द में रचित मन्त्र को (त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्) जपता है, उस पर काल भी अपनी दृष्टि डालने में समर्थ नहीं होता है। सर्वप्रथम पूर्वकथित शिवपञ्चाक्षर मन्त्र की भाँति कण्ठादि न्यास करके फिर विनियोग का जल 'अस्य त्र्यम्बकमन्त्रस्य वसिष्ठ ऋषिरनुष्टुप् छन्दः त्र्यम्बकः पार्वतीपतिर्देवता त्र्यं बीजं वं शक्तिः कं कीलकं सर्वेष्टसिद्ध्यर्थे जपे विनियोगः' कहकर विनियोग-हेतु भूमि पर जल छोड़े। फिर मूल में लिखे हुए 'ॐ वसिष्ठऋषये नमः शिरसि' इत्यादि छः मन्त्रों से ऋष्यादि न्यास करे। तदुपरान्त मूलोक्त 'ॐ त्र्यम्बकं अङ्गुष्ठाभ्यां नमः' इत्यादि छः मन्त्रों से करन्यास करे। तत्पश्चात् 'ॐ त्र्यम्बकं हृदयाय नमः' इत्यादि मूल में लिखित छः मन्त्रों से हृदयादि छः अङ्गों में न्यास करे। तदनन्तर अङ्गन्यास करना चाहिये। इसे अक्षरन्यास अथवा अक्षराङ्गन्यास भी कहते हैं। मूलोक्त 'ॐ त्र्यं नमः पूर्वमुखे' इन बत्तीस मन्त्रों से यह अङ्गन्यास करना चाहिये। फिर मूलोक्त 'ॐ त्र्यम्बकं शिरसि' इत्यादि एकादश मन्त्रों को पढ़कर पदन्यास करना चाहिये।

तदनन्तर 'हस्ताभ्यां कलशद्वया०' इत्यादि श्लोक से त्र्यम्बक का ध्यान करना चाहिये। (श्लोक का भावार्थ—'अमृतरस के दो कलशों को दोनों हाथों में लिये हुए शिर पर उड़ेलते हुए, दो हाथों में मृगाक्षवलय को उत्कृष्टतापूर्वक धारण किये, करद्वय से अमृतघट को अपने अङ्क पर लिये कैलाशपति शिव, जो कि स्वच्छ कमल पर बैठे एवं नये चन्द्रमा का मुकुट बाँधे हैं, उन त्रिनेत्र का ध्यान करता हूँ।')

त्र्यम्बकयन्त्रम्



एवं ध्यात्वा पञ्चाक्षरोदिते पूर्वोक्ते पीठे मूलमन्त्रेण मूर्तिं प्रकल्प्य तत्र वृषभध्वजं त्र्यम्बकं देवं पाद्यादिपुष्पान्तैरुपचारैः सम्पूज्य आवरणपूजां कुर्यात्। तत्र प्रथमावरणे आग्नेयादिषट्कोणेषु हृदयादिषडङ्गानि पूजयेत्॥ १॥ द्वितीयावरणे ॐ अर्कमूर्तये नमः॥ १॥ ॐ इन्दुमूर्तये नमः॥ २॥ ॐ वसुधामूर्तये नमः॥ ३॥ ॐ तोयमूर्तये नमः॥ ४॥ ॐ वह्निमूर्तये नमः॥ ५॥ ॐ वायुमूर्तये नमः॥ ६॥ ॐ आकाशमूर्तये नम॥ ७॥ ॐ यजमानमूर्तये नमः॥ ७॥ इति मूर्तीरष्टौ पूजयेत्॥ २॥ तृतीयावरणे तद्बाह्ये पूर्वादिषु ॐ रमायै नमः॥ १॥ ॐ राकायै नमः॥ २॥ ॐ प्रभायै नमः॥ ३॥ ॐ ज्योत्स्नायै नमः॥ ४॥ ॐ पूर्णायै नमः॥ ५॥ ॐ ऊषायै नमः॥ ६॥ ॐ पूरण्यै नमः॥ ७॥ ॐ सुधायै नमः॥ ८॥ इत्यष्टौ शक्तयः पूज्याः॥ ३॥ चतुर्थावरणे तद्बाह्ये ॐ विश्वायै नमः॥ १॥ ॐ विद्यायै नमः॥ २॥ ॐ सितायै नमः॥ ३॥ ॐ प्रह्वायै नमः॥ ४॥ ॐ सन्ध्यायै नमः॥ ६॥ ॐ शिवायै नमः॥ ७॥ ॐ निशायै नमः॥ ८॥ इति शक्तीः पूजयेत्। तद्बाह्ये पञ्चमावरणे ॐ आर्यायै नम॥ १॥ ॐ प्रज्ञायै नमः॥ २॥ ॐ प्रभायै नमः॥ ३॥ ॐ मेधायै नमः॥ ४॥ ॐ शान्त्यै नमः॥ ५॥ ॐ कान्त्यै नमः॥ ६॥ ॐ धृत्यै नमः॥ ७॥ ॐ सत्यै नमः॥ ८॥ इत्यष्टौ पूज्याः। तद्बाह्ये षष्ठावरणे ॐ धरायै नमः॥ १॥ ॐ मायायै नमः॥ २॥ ॐ अविन्यै नमः॥ ३॥ ॐ पद्मायै नमः॥ ४॥ ॐ शान्तायै नमः॥ ५॥ ॐ मोघायै नमः॥ ६॥ ॐ जयायै नमः॥ ७॥ ॐ अमलायै नमः॥ ८॥ इत्यष्टौ शक्तयः पूज्याः॥ ६॥ तद्बाह्ये भूपुरे सप्तमावरणे इन्द्रादीन्॥ ७॥ अष्टमावरणे वज्राद्यायुधानि च पूजयेत्॥ ८॥ ततो धूपदीपादिविसर्जनान्तं कर्म कृत्वा लक्षमन्त्रात्मकं पुरश्चरणं कुर्यात्। मन्त्रो यथा—ॐ त्र्यम्बकं य्यजामहे सुगन्धिम्पुष्टिवर्द्धनम्। उर्व्वारुकमिव बन्धनान्मृत्योर्म्मुक्षीय मामृतात्॥ ततो जपान्ते दशांशेन विल्वं १ पलाशं २ खदिरं ३ वटं ४ तिलान् ५ सर्षपान् ६ पायसं ७ दुग्धं ८ दधि ९ दूर्वां च १० एतैर्दशद्रव्यैर्घृतसंप्लुतैर्हुत्वा तद्दशांशेन मूलमन्त्रान्ते ॐ त्र्यम्बकदेवं तर्पयामि इति तर्पणं कृत्वा तद्दशांशेन आत्मानमभिषिञ्चामीत्यभिषिच्य तद्दशांशेन ब्राह्मणान् भोजयेत्।

पीठपूजा—अब प्रधान पीठ पर त्र्यम्बक यन्त्र में आवरण पूजा करनी चाहिये। प्रथमावरण पूजा त्र्यम्बक यन्त्र में भीतर के प्रथम आवरण में षड्दल कमल में आग्नेयादि षट् कोणों में (चित्र देखिये) हृदयादि छः अङ्गों की पूजा मूलोक्त छः मन्त्रों से करे। द्वितायावरण में 'ॐ अर्कमूर्तये नमः' इत्यादि आठ मन्त्रों से शिव की अष्ट शक्तियों की पूजा करे। तृतीयावरण में 'ॐ रमायै नमः' इत्यादि आठ मन्त्रों से यन्त्र पर पूर्वादि आठ दिशाओं में पूजा करे। चतुर्थावरण पूजा उसके बाहरी आवरण में 'ॐ विश्वायै नमः' इत्यादि मन्त्रों से अन्य आठ शक्तियों को पूजे। पञ्चमावरण पूजा उसके बाहर पाँचवें आवरण में 'ॐ आर्यायै नमः' इत्यादि आठ मन्त्रों से करे। फिर उसके बाहर षष्ठ आवरण में 'ॐ धरायै नमः' इत्यादि आठ मन्त्रों से पूजा करे। फिर उसके बाहर सप्तमावरण में दिक्पालों का एवं अष्टमावरण में उनके वज्रादि आयुधों को आठ दिशाओं में पूजे। फिर धूप-दीपादिपूर्वक विसर्जन-पर्यन्त कर्म करके मन्त्र का एक लाख की सङ्ख्या में पुरश्चरण करे। मन्त्र है—'ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वारुकमिव बन्धनात् मृत्योर्मुक्षीय मामृतात्॥' जप (पुरश्चरण) के अन्त में दस सहस्र हवन, एक सहस्र तर्पण, एक सौ मार्जन तथा दस ब्राह्मणों का भोजन कराये। हवन में बेल, खदिर, वट, तिल, सरसों, पायस, दूध, दही, पलाश तथा दूर्वा—इन दश द्रव्यों की आहुति दे।

शारदातिलके—

एवं कृते प्रयोगार्हो जायतेऽयं महामनुः। अयुतं जुहुयाद्बिल्वसमिद्भिः सम्पदे सुधीः॥
जुहुयाद्ब्रह्मवृक्षस्य समिद्भिर्ब्रह्मतेजसे। खादिरैरयुतं हुत्वा कान्तिपुष्टिमवाप्नुयात्॥
वटवृक्षस्य समिधो जुहुयादयुतावधि। धनधान्यसमृद्धः स्यादचिरेणैव साधकः॥
तिलैस्तत्सङ्ख्यया हुत्वा सर्वपापैः प्रमुच्यते। सिद्धार्थैरयुतं हुत्वा शत्रून्विजयते नृपः॥
अनेनैव विधानेन नश्येन्मृत्युरकालजः॥

पायसेन कृतो होमो रक्षाश्रीकीर्तिकान्तिदः। गोदुग्धेन च शुद्धान्नं हुत्वा कृत्यां विनाशयेत्॥
अयमेव मतो होमः शान्तिश्रीसम्पदावहः। दधिहोमेन संवादं कुर्याद्विद्वेषिणोर्मिथः॥
प्रत्यहं जुहुयान्मन्त्री दूर्वामष्टोत्तरं शतम्। आमयान्निखिलाञ्जित्वा दीर्घमायुरवाप्नुयात्॥
जुहुयाज्जन्मदिवसे पायसान्नैर्घृतान्वितैः। इच्छन्ननिन्दितां लक्ष्मीमारोग्यमतुलं यशः॥
गव्यदुग्धघृताक्ताभिर्दूर्वाभिर्जुहुयाद्वशी। सविंशतिशतं सम्यक् स्वजन्मदिवसे सुधीः॥
आमयैः सकलैर्मुक्तो जीवेद्वर्षशतं सुधीः। काश्मरी समिधस्तिस्रः पयोऽन्नं त्रिशतं पृथक्॥
जुहुयाद्ब्राह्मणानन्ते भोजयेन्मधुरान्वितम्। प्रीणयेद्धनधान्याद्यैरात्मनो गुरुमादरात्॥
अनामयमवाप्नोति दीर्घमायुः श्रिया सह। सघृतेन पयोऽन्नेन हुत्वा पर्वणि पर्वणि॥
राज्यश्रियमवाप्नोति षण्मासान्नात्र संशयः। लाजैर्विशुद्धैर्जुहुयात्कन्याप्त्यै सा वराप्तये॥
क्षीरद्रुमसमिद्धोमाद्ब्राह्मणादीन् वशं नयेत्। स्नात्वा सहस्रं प्रजपेदादित्याभिमुखो मनुम्॥
आधिव्याधिविनिर्मुक्तो दीर्घमायुरवाप्नुयात्। अनेन मनुना सर्वं साधयेदिष्टमात्मनः॥

इति शारदातिलकोक्तत्र्यम्बकमन्त्रपुरश्चरणप्रयोगः।

शारदातिलक में कहा है—इस प्रकार से यह मन्त्र प्रयोगार्थ सिद्ध हो जाता है। सम्पत्ति की प्राप्ति के लिये अयुत (दस सहस्र) की सङ्ख्या में बेलफल की आहुति देनी चाहिये। ब्रह्मतेज की प्राप्ति के लिये ब्रह्मवृक्ष (पलाश) की आहुति प्रशस्त होती है। खदिर (खैर) की समिधा की आहुति से शरीर की कान्ति एवं पुष्टि बढ़ती है। वटवृक्ष की समिधा से अयुत सङ्ख्या में होम इस मन्त्र से करने से शीघ्र ही साधक को धन-धान्य की प्राप्ति हो जाती है। पायस द्वारा इस मन्त्र से होम रक्षा, श्री तथा कीर्ति देता है। तिलों से अयुत सङ्ख्यक होम करने से समस्त पाप नष्ट हो जाते हैं। सरसों से अयुत आहुति देने पर शत्रुओं पर विजय प्राप्त होती है। इसी विधान से अकालमृत्यु भी दूर होती है। त्र्यम्बक मन्त्र के द्वारा गोदुग्ध में शुद्धान्न पकाकर अयुत होम करने से कृत्या (मूठ) को नष्ट किया जाता है। इसी हवन से शान्ति भी प्राप्त होती है तथा सम्पत्ति मिलती है। दही का होम करने से आपस का विद्वेष दूर होता है। साधक यदि प्रतिदिन दूर्वा से हवन करे (१०८ सङ्ख्या में) तो सम्पूर्ण रोगों को जीत कर दीर्घायु प्राप्त करता है। जन्मदिवस पर पायसान्न में घृत मिलाकर होम करने से अनिन्दित लक्ष्मी, आरोग्य तथा अतुल यश प्राप्त होता है। यदि गोदुग्ध में भिगोकर १२० की सङ्ख्या (एक सौ बीस) में अपने जन्मदिवस पर होम किया जाय तो सम्पूर्ण रोगों से रहित होकर पूर्ण एक सौ वर्ष की आयु प्राप्त होता है। गम्भारी की समिधा को तीन की सङ्ख्या में लेकर क्रमशः दूध एवं अन्न के साथ तीन सौ आहुति देकर अन्त में ब्राह्मणों को मधुर भोजन कराये तथा धन-धान्य से अपने तान्त्रिक गुरु या वैदिक आचार्य को प्रसन्न करे तो दीर्घायु, आरोग्य तथा लक्ष्मी प्राप्त होती है। प्रत्येक पर्व (पूर्णिमा-अमावास्या) को घृत-दूध तथा अन्न का होम करने से छः मास में राज्यश्री प्राप्त होती है; इसमें संशय नहीं है। वर को कन्या की प्राप्ति-हेतु तथा कन्या को वर की प्राप्ति के लिये शुद्ध लाजा से होम करना चाहिये। क्षीरीवृक्ष की समिधाओं के होम से ब्राह्मणादि को वश में किया जाता है। स्नान करके प्रतिदिन सूर्य के सम्मुख एक सहस्र जप करने से आधि-व्याधि से रहित होकर दीर्घायु को प्राप्त होता है। इस विधान से अपने सभी मनोरथों को सफल करना चाहिये।

महामृत्युञ्जयपुरश्चरणप्रयोगः

तत्र तावच्छुभेऽह्नि चन्द्रतारादिबलान्विते सुमुहूर्त्ते शिवालयादिषु जपस्थानं प्रकल्प्य तत्र गोमयोपलेपनादिभिः शुद्धिं कृत्वा आसनभूमौ कूर्मसंशोधनं दीपस्थानशोधनं च कुर्य्यात्। पूर्वदिने प्रायश्चित्तम् अयुतगायत्रीजपं च कृत्वा तद्रात्रौ पूर्वोक्तपद्धतिमार्गेण स्वप्नं विचार्य आरम्भदिने प्रातर्नित्यावश्यकं समाप्य स्वासने प्राङ्मुख उपविश्य आचम्य प्राणानायम्य शान्तिपाठं पठित्वा लक्ष्मीनारायणादिदेवान् प्रणमेत्। ततो देशकालौ सङ्कीर्त्य अमुकगोत्रोऽमुकशर्म्मा ममात्मनः श्रुतिस्मृतिपुराणतन्त्रोक्तफलावाप्तये अस्मिन् पुण्याहे मम जन्मराशेः सकाशान्नामराशेः सकाशाद्वा जन्मलग्नाद्वर्ष-लग्नाद्गोचराद्वा चतुर्थाष्टमद्वादशाद्यनिष्टस्थानस्थिताऽमुकग्रहसूचितं सूचयिष्यमाणं च यत्सर्वारिष्टं तद्विनाशार्थं सर्वदा तृतीयैकादशशुभस्थानस्थितवदुत्तमफलप्राप्त्यर्थं (अथवा) अमुकमारकग्रहदशान्तर्दशा तत्सम्बन्धिदशा चोपदशा दिनदशा वा षष्ठाष्टमद्वादशादिनिषिद्धभावाधिपतिदशा तज्जनितपीडाऽल्पायुराधिदेवाधिभौतिकाध्यात्मिकजनित-क्लेशनिवृत्तिपूर्वकायुरारोग्यार्थं परमैश्वर्य्यादिप्राप्त्यर्थं श्रीमहामृत्युञ्जयदेवताप्रीत्यर्थं च अमुकसंख्यया श्रीमहामृत्युञ्जय-मन्त्रजपं विप्रद्वारा कारयिष्ये इति (अथवा) मम जीवच्छरीराऽविरोधेनामुकरोगस्य समूलनाशनेनापमृत्युनिवारणद्वारा क्षिप्रारोग्यार्थं (वा) विषूचिकादिजनमारोपसर्गशान्त्यर्थं (वा) दृष्टिकामार्थम् 'अमुकाभियोगनिवृत्त्यर्थं वा' अमुक-दुःस्वप्ननिरासार्थं अमुकदिग्यात्रानिर्विघ्नपूर्वकसिद्ध्यर्थं (वा) प्रतिसम्मुखशुक्रदोषनिवारणार्थं (वा) काकमैथुन-दर्शनादिसूचितसर्वारिष्टनिवृत्त्यर्थं (वा) पल्लीपतनसरठारोहणामुकदुष्टाङ्गस्फुरणजनिताऽशुभफलविनाशार्थम् (अथवा) अमुकदुष्ट नक्षत्रामुकमृत्युयोगादिदुष्टयोगदुष्टतिथिपापवारदुष्टचन्द्रोत्पन्नज्वराद्यमुकव्याधेर्जीवच्छरीराविरोधेन समूल-नाशार्थम् अमुकसङ्ख्यापरिमितश्रीमहामृत्युञ्जयमन्त्रजपं विप्रद्वाराहं करिष्ये इति (एवं कामनाभेदेन स कल्पो ज्ञेयः)। तदङ्गत्वेन गणपतिपूजनं पुण्याहवाचनं मातृकापूजनं नान्दीश्राद्धमाचार्यजापकवरणं च करिष्ये इति च सङ्कल्प्य पूर्वोक्तपद्धतिमार्गेण जापकवरणान्तं कर्म्म कुर्यात्। इति विप्रद्वारा कारिते पुरश्चरणे प्रकारः। ततो जपकर्ता स्वासने प्राङ्मुख उदङ्मुखो वा उपविश्य धृतरुद्राक्षभस्मत्रिपुण्ड्रः आचम्य प्राणानायम्य, देशकालौ स्मृत्वा मम यजमानस्य वा शरीरे ज्वराद्यमुकरोगनिरासद्वारा सद्य आरोग्यार्थं (वा) अमुककामनासिद्ध्यर्थं श्रीमहामृत्युञ्जयदेवताप्रीत्यर्थं अमुकसङ्ख्या-परिमितश्रीमहामृत्युञ्जयजपं करिष्ये। इति प्रत्याहिकं सङ्कल्प्य ॐ गुरवे नमः। ॐ गणपतये नमः। ॐ इष्टदेवतायै नमः इति नत्वा पूर्वोक्तभूतशुद्ध्यादिश्रीकण्ठादिकलामातृकान्यासान्तं कुर्यात्।

महामृत्युञ्जय पुरश्चरण-प्रयोग—इसके लिये किसी शुभ दिन में तथा शुभ मुहूर्त में जब साधक को चन्द्र एवं तारा का बल प्राप्त हो तब शिवालय आदि में जपस्थान की व्यवस्था करके उस स्थान की भूमि को गोबर से लीपकर शुद्ध कर आसनभूमि पर कूर्म का संशोधन करके दीपस्थान का शोधन करे। जपारम्भ मुहूर्त वाले दिन से एक दिन पूर्व प्रायश्चित्त तथा अयुत (दस सहस्र) गायत्री-जप करके उस रात्रि में पूर्वोक्त पद्धति-मार्ग से स्वप्न का विचार कर आरम्भ दिन में प्रातःकाल के आवश्यक नित्यकर्मों को समाप्त करके अपने आसन पर पूर्वाभिमुख बैठकर आचमन तथा प्राणायाम कर शान्तिपाठ पढ़कर लक्ष्मीनारायण आदि देवताओं को प्रणाम करे। तदनन्तर देश-काल का सङ्कीर्त्तन करके मूल में लिखित सङ्कल्प का नाम गोत्र एवं उद्देश्य के सहित उच्चारण करे। यह विप्र द्वारा कारित पुरश्चरण का प्रकार है।

यजमान द्वारा स्वयं प्रयोग की विधि—इसमें जपकर्ता अपने आसन पर पूर्वाभिमुख अथवा उत्तराभिमुख बैठकर रुद्राक्ष, भस्म तथा त्रिपुण्ड्र धारण कर आचमन तथा प्राणायाम कर देश-काल का स्मरण कर 'मम यजमानस्य वा शरीरे ज्वराद्ययुक्तरोगनिरासद्वारा सद्य आरोग्यार्थं वा अमुककामनासिद्ध्यर्थं श्रीमहामृत्युञ्जयदेवताप्रीत्यर्थं अमुकसङ्ख्यापरिमितश्रीमहामृत्युञ्जयजपं करिष्ये' ऐसा सङ्कल्प प्रतिदिन के लिये करना चाहिये। फिर 'ॐ गुरवे

नमः ॥ १ ॥ ॐ गणपतये नमः ॥ २ ॥ ॐ इष्टदेवतायै नमः ॥ ३ ॥' इन मन्त्रों से गुरुओं को नमस्कार कर पूर्वकथित विधान से भूतशुद्धि आदि श्रीकण्ठादि कला मातृका न्यास-पर्यन्त कर्म करना चाहिये।

जपप्रयोगः

मन्त्रमहोदधौ—

महामत्युञ्जयं वक्ष्ये दुरितापन्निवारणम्। यं प्राप्य भार्गवः शम्भोर्मृतान् दैत्यानजीवयत्॥ १॥

अस्य श्रीमहामृत्युञ्जयमन्त्रस्य वामदेवकहोलवसिष्ठा ऋषयः। पङ्क्तिगायत्र्यनुष्टुभश्छन्दांसि। सदाशिवमहामृत्युञ्जयरुद्रो देवता। ह्रीँ शक्तिः। श्रीँ बीजम्। महामृत्युञ्जयप्रीतये ममाभीष्टसिद्ध्यर्थे जपे विनियोगः। अथ ऋष्यादिन्यासः—**ॐ वामदेवकहोलवसिष्ठऋषिभ्यो नमः मूर्ध्नि॥ १॥ ॐ पङ्क्तिगायत्र्यनुष्टुप्छन्दोभ्यो नमः वक्त्रे॥ २॥ ॐ सदाशिव-महामृत्युञ्जयरुद्रदेवतायै नमः हृदि॥ ३॥ ह्रीं शक्त्यै नमः लिङ्गे॥ ४॥ ॐ श्रीं बीजाय नमः पादयोः॥ ५॥** इति ऋष्यादिन्यासः। अथ करन्यासः—**ॐ हौँ ॐ जूँ सः भूर्भुवः स्वः त्र्यम्बकं ॐ नमो भगवते रुद्राय शूलपाणये स्वाहा अङ्गुष्ठाभ्यां नमः ॥ १ ॥ ॐ हौँ ॐ जूँ सः भूर्भुवः स्वः यजामहे ॐ नमो भगवते रुद्राय अमृतमूर्तये मां जीवय तर्जनीभ्यां नमः ॥ २॥ ॐ हौँ ॐ जूँ सः भूर्भुवः स्वः सुगन्धिम्पुष्टिवर्द्धनम् ॐ नमो भगवते रुद्राय चन्द्रशिरसे जटिने स्वाहा मध्यामाभ्यां नमः ॥ ३ ॥ ॐ हौँ ॐ जूँ सः भूर्भुवः स्वः उर्वारुकमिव बन्धनात् ॐ नमो भगवते रुद्राय त्रिपुरान्तकाय हाँ हीं अनामिकाभ्यां नमः॥ ४॥ ॐ हौँ ॐ जूँ सः भूर्भुवः स्वः मृत्योर्मुक्षीय ॐ नमो भगवते रुद्राय त्रिलोचनाय ऋग्यजुःसाममन्त्राय कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ हौँ ॐ जूँ सः भूर्भुवः स्वः मामृतात् ॐ नमो भगवते रुद्राय अग्नित्रयाय ज्वलज्वल मां रक्ष रक्ष अघोरास्त्राय करतलकरपृष्ठाभ्यां नमः॥ ६॥ इति करन्यासः। एवं हृदयादिन्यासं कुर्यात्।** अथ वर्णन्यासः—**ॐ हौँ ॐ जूँ सः भूर्भुवः स्वः त्र्यं नमः पूर्वमुखे॥ १ ॥ ॐ हौँ ॐ जूँ सः भूर्भुवः स्वः बं नमः पश्चिममुखे॥ २ ॥ ॐ हौँ ॐ जूँ सः भूर्भुवः स्वः कं नमः दक्षिणमुखे॥ ३ ॥ ॐ हौँ ॐ जूँ सः भूर्भुवः स्वः यं नमः उत्तरमुखे॥ ४॥ ॐ हौँ ॐ जूँ सः भूर्भुवः स्वः जां नमः उरसि॥ ५ ॥ ॐ हौँ ॐ जूँ सः भूर्भुवः स्वः मं नमः कण्ठे॥ ६ ॥ ॐ हौँ ॐ जूँ सः भूर्भुवः स्वः हें नमः मुखे॥ ७॥ ॐ हौँ ॐ जूँ सः भूर्भुवः स्वः सुं नमः नाभौ॥ ८ ॥ ॐ हौँ ॐ जूँ सः भूर्भुवः स्वः गं नमः हृदि॥ ९ ॥ ॐ हौँ ॐ जूँ सः भूर्भुवः स्वः धिं नमः पृष्ठे॥ १० ॥ ॐ हौँ ॐ जूँ सः भूर्भुवः स्वः पुं नमः कुक्षौ॥ ११ ॥ ॐ हौँ ॐ जूँ सः भूर्भुवः स्वः ष्टिं नमः लिङ्गे॥ १२ ॥ ॐ हौँ ॐ जूँ सः भूर्भुवः स्वः वं नमः गुदे॥ १३ ॥ ॐ हौँ ॐ जूँ सः भूर्भुवः स्वः धं नमः दक्षिणोरुमूले॥ १४ ॥ ॐ हौँ ॐ जूँ सः भूर्भुवः स्वः नं नमः वामोरुमूले॥ १५ ॥ ॐ हौँ ॐ जूँ सः भूर्भुवः स्वः उं नमः दक्षिणोरुमध्ये॥ १६ ॥ ॐ हौँ ॐ जूँ सः भूर्भुवः स्वः वां नमः वामोरुमध्ये॥ १७॥ ॐ हौँ ॐ जूँ सः भूर्भुवः स्वः रुं नमः दक्षिणजानुनि॥ १८ ॥ ॐ हौँ ॐ जूँ सः भूर्भुवः स्वः कं नमः वामजानुनि॥ १९ ॥ ॐ हौँ ॐ जूँ सः भूर्भुवः स्वः रुं नमः दक्षिणजानुवृत्ते॥ २० ॥ ॐ हौँ ॐ जूँ सः भूर्भुवः स्वः वं नमः वामजानुवृत्ते॥ २१ ॥ ॐ हौँ ॐ जूँ सः भूर्भुवः स्वः बं नमः दक्षिणस्तने॥ २२ ॥ ॐ हौँ ॐ जूँ सः भूर्भुवः स्वः धं नमः वामस्तने॥ २३ ॥ ॐ हौँ ॐ जूँ सः भूर्भुवः स्वः नां नमः दक्षिणपार्श्वे॥ २४॥ ॐ हौँ ॐ जूँ सः भूर्भुवः स्वः मृं नमः वामपार्श्वे॥ २५ ॥ ॐ हौँ ॐ जूँ सः भूर्भुवः स्वः त्यों नमः दक्षिणपादे॥ २६ ॥ ॐ हौँ ॐ जूँ सः भूर्भुवः स्वः मुं नमः वामपादे॥ २७॥ ॐ हौँ ॐ जूँ सः भूर्भुवः स्वः क्षीं नमः दक्षिणकरे॥ २८ ॥ ॐ हौँ ॐ जूँ सः भूर्भुवः स्वः यं नमः वामकरे॥ २९ ॥ ॐ हौँ ॐ जूँ सः भूर्भुवः स्वः मां नमः दक्षिणनासायाम्॥ ३० ॥ ॐ हौँ ॐ जूँ सः भूर्भुवः स्वः मृं नमः वामनासायाम्॥ ३१ ॥ ॐ हौँ ॐ जूँ सः भूर्भुवः स्वः तां नमः मूर्ध्नि॥ ३२ ॥** इत्यक्षरन्यासः॥ **ॐ त्र्यम्बकं शिरसि॥ १॥ ॐ यजामहे भ्रुवोः॥ २॥ ॐ सुगन्धिं नेत्रयोः॥ ३॥ ॐ**


पुष्टिवर्धनं मुखे॥ ४॥ ॐ उर्वारुकं गण्डयोः॥ ५॥ ॐ इव हृदये॥ ६॥ ॐ बन्धनात् जठरे॥ ७॥ ॐ मृत्योः लिङ्गे॥ ८॥ ॐ मुक्षीय ऊर्वोः॥ ९॥ ॐ मा जान्वोः॥ १०॥ ॐ अमृतात् पादयोः॥ ११॥ इति पदन्यासः॥ **ततो मूलेन व्यापकं कृत्वा ध्यायेत्॥ अथ ध्यानम्—**

हस्ताम्भोजयुगस्थकुम्भयुगलादुद्धृत्य तोयं शिरः सिञ्चन्तं करयोर्युगेन दधतं स्वाङ्के सकुम्भौ करौ।
अक्षस्त्रङ्मृगहस्तमम्बुजगतं मूर्द्धस्थचन्द्रस्रवत्पीयूषोन्नततनुं भजे सगिरिजं मृत्युञ्जयं त्र्यम्बकम्॥ १॥

इति ध्यात्वा मुष्टिमुद्रां मृगमुद्रां शक्तिमुद्रां लिङ्गमुद्रां पञ्चमुखां मुद्रां च प्रदर्श्य पीठपूजां कुर्यात्। तद्यथा— 'ॐ मण्डूकादिपरतत्त्वान्त पीठदेवताभ्यो नमः' इति पीठं सम्पूज्य ॐ वामायै नमः॥ १॥ ॐ ज्येष्ठायै नमः॥ २॥ ॐ रौद्रयै नमः॥ ३॥ ॐ काल्यै नमः॥ ४॥ ॐ कलविकरिण्यै नमः॥ ५॥ ॐ बलविकरिण्यै नमः॥ ६॥ ॐ बलप्रमथन्यै नमः॥ ७॥ ॐ सर्वभूतदमन्यै नमः॥ ८॥ मध्ये ॐ मनोन्मन्यै नमः॥ ९॥ इति पीठशक्तीः पूजयेत्। ततः 'ॐ नमो भगवते सकलगुणात्मशक्तियुक्तायाऽनन्ताय योगपीठात्मने नमः' इति मन्त्रेणासनं दत्त्वा तत्र ॐ महीद्यौरित्यादि पूर्वोक्तपद्धतिमार्गेण यथाविधिं पूर्णपात्रान्तं ताम्रकलशं संस्थाप्य तत्त्वायामीति वरुणमावाह्य सम्पूज्य कलशस्य मुखे विष्णुरित्याद्यभिमन्त्र्य 'देवदानवसंवादे' इत्यादि प्रार्थयेत्। ततः कलशोपरि कौशेयवस्त्रं प्रसार्य तत्र अष्टगन्धेन मृत्युञ्जययन्त्रं विलिख्य अथवा ताम्रमयं यन्त्रं संस्थाप्य तन्मध्ये प्रधानदेवत्र्यम्बकप्रतिमां पलसुवर्णरचितां अग्न्युत्तारणपूर्वकं मूलेन संस्थाप्य प्राणप्रतिष्ठां कृत्वा आवाहनादिपुष्पान्तैरुपचारैर्मूलमन्त्रेण सम्पूज्य आवरणपूजां कुर्यात्।

जपप्रयोग (मन्त्रमहोदधि के अनुसार)—अब मैं महामृत्युञ्जय जप को कहता हूँ, जो विपत्तियों का निवारक है, जिसे शुक्राचार्य ने भगवान् शङ्कर से प्राप्त कर दैत्यों को पुनर्जीवित किया था। सर्वप्रथम 'अस्य श्रीमहामृत्युञ्जयमन्त्रस्य वामदेवकहोलवसिष्ठा ऋषयः। पङ्क्तिगायत्रीअनुष्टुप् छन्दांसि। सदाशिवमहामृत्युञ्जयरुद्रो देवता। ह्रीं शक्तिः। श्रीं बीजम्। महामृत्युञ्जयप्रीतये ममाभीष्टसिद्ध्यर्थे जपे विनियोगः' कहकर विनियोग का जल छोड़े। फिर मूल में लिखित 'ॐ वामदेववसिष्ठऋषिभ्यो नमः मूर्ध्नि' इत्यादि पाँच मन्त्रों से ऋष्यादि का न्यास करने के उपरान्त 'ॐ हौं ॐ जूं सः भूर्भुवः स्वः त्र्यम्बकं ॐ नमो भगवते शूलपाणये स्वाहा अङ्गुष्ठाभ्यां नमः' इत्यादि मूल में लिखित छः मन्त्रों से करन्यास करना चाहिये। फिर इन्हीं छः मन्त्रों से क्रमशः हृदयादि छः अङ्गों का न्यास करना चाहिये। इसके बाद फिर 'ॐ हौं ॐ जूं सः भूर्भुवः स्वः त्र्यं नमः पूर्वमुखे' इत्यादि बत्तीस मन्त्रों से मृत्युञ्जय देवता के अङ्गों में वर्णन्यास (अक्षरन्यास) करना चाहिये। तदुपरान्त 'ॐ त्र्यम्बकं शिरसि०' इत्यादि ग्यारह मूलोक्त मन्त्रों से पदन्यास करके फिर मूल मन्त्र से व्यापक करना चाहिये। तदुपरान्त मूल में लिखित 'हस्ताम्भोज०' इत्यादि मन्त्र से भगवान् मृत्युञ्जय का ध्यान करना चाहिये। ध्यान करने के बाद मुष्टिमुद्रा, मृगमुद्रा, शक्तिमुद्रा, लिङ्गमुद्रा, पञ्चमुखमुद्रा—इन पाँच मुद्राओं को क्रमशः प्रदर्शित कर 'ॐ मण्डूकादिपरतत्त्वान्तपीठदेवताभ्यो नमः' इस मन्त्र से पीठपूजा करने के पश्चात् 'ॐ वामायै नमः' इत्यादि नौ मूलोक्त मन्त्रों से पीठशक्तियों की पूजा करनी चाहिये। तदनन्तर 'ॐ नमो भगवते सकलगुणात्मशक्तियुक्तायाऽनन्ताय योगपीठात्मने नमः' इस मन्त्र से पीठ को आसन प्रदान करे। फिर पूर्वोक्त पद्धतिमार्ग से 'महीद्यौः' इत्यादि से पूर्णपात्र-सहित ताम्रकलश का स्थापन तथा पूजन करने के पश्चात् 'कलशस्य मुखे विष्णुः' इत्यादि श्लोकों से कलश की प्रार्थना करके कलश के ऊपर रेशमी वस्त्र लपेटकर अथवा प्रसारित करके उसपर अष्टगन्ध से मृत्युञ्जय यन्त्र का लेखन करना चाहिये अथवा ताम्रनिर्मित मृत्युञ्जय यन्त्र को स्थापित कर देना चाहिये। फिर उस यन्त्र के मध्य में प्रधान देवता त्र्यम्बक की प्रतिमा, जो कि एक पलभार सुवर्ण से बनी हो, अग्नि उत्तारणपूर्वक मूल मन्त्र द्वारा स्थापित करके उसकी प्राणप्रतिष्ठा करके आवाहन से लेकर षोडशोपचार तक पूजन करने के बाद आवरणपूजा करनी चाहिये।

महामृत्युञ्जययन्त्रम्



तद्यथा मध्ये—ॐ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानाम्ब्रह्माधिपतिर्ब्रह्मणोधिपतिब्रह्माशिवोमेअस्तुसदा शिवोम्॥ इति मन्त्रेणेशानम्॥१॥ पूर्वे–ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात्॥ इति तत्पुरुषम्॥२॥ दक्षिणे–ॐ अघोरेभ्योऽथघोरेभ्योघोरघोरतरेभ्यः। सर्वेभ्यः सर्व्वशर्व्वेभ्योनमस्तेअस्तुरुद्ररूपेभ्यः॥ इति अघोरम्॥३॥ पश्चिमे–ॐ वामदेवायनमोज्येष्ठायनमःश्रेष्ठायनमोरुद्रायनमः कालाय नमः कलविकरणायनमोबल विकरणायनमः॥ इति वामदेवम्॥४॥ उत्तरे–ॐ सद्योजातंप्रपद्यामिसद्योजातायवैनमोनमः भवेभवेनातिभवेभवस्वमां भवोद्भवाय नमः॥ इति सद्योजातं च पूजयेत्॥५॥ इति प्रथमावरणम्॥१॥ ततः ईशानादि समीपेषु निवृत्त्याद्याः कलाः क्रमात् संस्थाप्य ॐ निवृत्त्यै नमः॥१॥ ॐ प्रतिष्ठायै नमः॥२॥ ॐ विद्यायै नमः॥३॥ ॐ शान्त्यै नमः॥४॥ ॐ शान्त्यतीतायै नमः॥५॥ इति सम्पूज्य ततः षट्कोणे आग्नेयादिकोणकेसरेषु मध्ये दिक्षु च पूर्वोक्तन्यासक्रमेण हृदयादिषडङ्गानि सम्पूजयेत्। इति द्वितीयावरणम्॥२॥ तद्बहिः पूर्वादिक्रमेण ॐ सूर्यमूर्तये नमः॥१॥ ॐ इन्दुमूर्तये नमः॥२॥ ॐ क्षितिमूर्तये नमः॥३॥ ॐ तोयमूर्तये नमः॥४॥ ॐ अग्निमूर्तये नमः॥५॥ ॐ पवनमूर्तये नमः॥६॥ ॐ आकाशमूर्तये नमः॥७॥ ॐ यज्ञमूर्तये नमः॥८॥ इति तृतीयावरणम्॥३॥ तद्बहिः—ॐ रमायै नमः॥१॥ ॐ राकायै नमः॥२॥ ॐ प्रभायै नमः॥३॥ ॐ ज्योत्स्नायै नमः॥४॥ ॐ पूर्णायै नमः॥५॥ ॐ ऊषायै नमः॥६॥ ॐ पूरण्यै नमः॥७॥ ॐ सुधायै नमः॥८॥ इति चतुर्थावरणम्॥४॥ तद्बहिः ॐ विश्वायै नमः॥१॥ ॐ वन्द्यायै नमः॥२॥ ॐ सितायै नमः॥३॥ ॐ प्रह्सायै नमः॥४॥ ॐ सारायै नमः॥५॥ ॐ सन्ध्यायै नमः॥६॥ ॐ शिवायै नमः॥७॥ ॐ निशायै नमः॥८॥ इति पञ्चमावरणम्॥५॥ तद्बहिः—ॐ आर्यायै नमः॥१॥ ॐ प्रज्ञायै नमः॥२॥ ॐ प्रभायै नमः॥३॥ ॐ मेधायै नमः॥४॥ ॐ शान्त्यै नमः॥५॥ ॐ कान्त्यै नमः॥६॥ ॐ धृत्यै नमः॥७॥ ॐ मत्यै नमः॥ इति

षष्ठावरणम्॥६॥ तद्बहिः ॐ धरायै नमः॥१॥ ॐ उमायै नमः॥२॥ ॐ पावन्यै नमः॥ ॐ पद्मायै नमः॥४॥ ॐ शान्तायै नमः॥५॥ ॐ अमोघायै नमः॥६॥ ॐ जयायै नमः॥७॥ ॐ अमलायै नमः॥८॥ इति सप्तमावरणम्॥७॥ तद्बहिः—ॐ अनन्ताय नमः॥१॥ ॐ सूक्ष्माय नमः॥२॥ ॐ शिवोत्तमाय नमः॥३॥ ॐ एकनेत्राय नमः॥४॥ ॐ एकरुद्राय नमः॥५॥ ॐ त्रिमूर्तये नमः॥६॥ ॐ श्रीकण्ठाय नमः॥७॥ ॐ शिखण्डिने नमः॥८॥ इति अष्टमावरणम्॥८॥ तत उत्तरदिशमारभ्य—ॐ उमायै नमः॥१॥ ॐ चण्डेश्वराय नमः॥२॥ ॐ नन्दिने नमः॥३॥ ॐ महाकालाय नमः॥४॥ ॐ गणेशाय नमः॥५॥ ॐ वृषभाय नमः॥६॥ ॐ भृङ्गिरिटये नमः॥७॥ ॐ स्कन्दाय नमः॥८॥ इति नवमावरणम्॥९॥ तद्बहिः—ॐ ब्राह्म्यै नमः॥१॥ ॐ माहेश्वर्यै नमः॥२॥ ॐ कौमार्यै नमः॥३॥ ॐ वैष्णव्यै नमः॥४॥ ॐ वाराह्यै नमः॥५॥ ॐ इन्द्राण्यै नमः॥६॥ ॐ चामुण्डायै नमः॥७॥ ॐ महालक्ष्म्यै नमः॥८॥ इति दशमावरणम्॥१०॥ तद्बाह्ये चतुरस्त्रे भूपुरे पूर्वादिक्रमेण इन्द्रादिदशदिक्पालान् तद्बाह्ये तत्तत्समीपे वज्राद्यायुधानि च पूजयेत्॥१२॥ इत्यावरणपूजां कृत्वा धूपदीपनैवेद्यताम्बूलदक्षिणानीराजनप्रदक्षिणानमस्कारैर्मूर्तिं पूजयेत्। ततः कृताञ्जलिः।

ॐ मृत्युञ्जय महारुद्र त्राहि मां शरणागतम्। जन्ममृत्युजरारोगैः पीडितं कर्मबन्धनैः॥१॥
तावकस्त्वद्गतप्राणस्त्वच्चितोऽहं सदा मृड। इति विज्ञाप्य देवेशं जपेन्मृत्युञ्जयं परम्॥२॥
इति प्रार्थ्य मध्यन्दिनावधि जपं कुर्यात्।

आवरणपूजा—सर्वप्रथम यन्त्र के मध्य में 'ॐ ईशानः सर्वविद्यानाम्०' इत्यादि मूल में लिखित मन्त्र से ईशान का पूजन, फिर पूर्व में 'ॐ तत्पुरुषाय विद्महे०' इत्यादि मन्त्र से तत्पुरुष का पूजन, फिर दक्षिण में 'ॐ अघोरेभ्यो०' इत्यादि मन्त्र से अघोर का, फिर पश्चिम में 'ॐ वामदेवाय नमः' इत्यादि मूलोक्त मन्त्र से वामदेव का, फिर 'ॐ सद्योजातं प्रपद्यामि०' इत्यादि से उत्तर में सद्योजात का पूजन करे। इस प्रकार से यह मध्य के प्रथम आवरण का पूजन होता है। पुनः ईशानादि पूर्वकथित पाँच स्थानों के समीप मध्य से आरम्भ करके 'ॐ निवृत्त्यै नमः' इत्यादि मन्त्रों से शिवजी के पाँचों मुखों की कलाओं का पूजन द्वितीयावरण में करना चाहिये। द्वितीय आवरण के बाहर तृतीयावरण में पूर्वादि क्रम से 'ॐ इन्दुमूर्तये नमः' इत्यादि ८ मन्त्रों से दिशाओं एवं विदिशाओं में पूजन करने के उपरान्त 'ॐ रमायै नमः' इत्यादि आठ मन्त्रों से चतुर्थावरण में पूजन करे। फिर 'ॐ विश्वायै नमः' इत्यादि आठ मन्त्रों से पञ्चमावरण में क्रम से पूजा करे। षष्ठावरण में 'ॐ आर्यायै नमः' इत्यादि आठ मन्त्रों से पूर्वादि दिशाओं में पूजन करे। फिर 'ॐ धरायै नमः' इत्यादि आठ मन्त्रों से सप्तमावरण में पूर्वादि आठ दिशाओं में पूजन करे। तदनन्तर अष्टमावरण में 'ॐ अनन्ताय नमः' इत्यादि आठ मन्त्रों से पूजन करे। फिर उत्तर दिशा से आरम्भ कर 'ॐ उमायै नमः' इत्यादि आठ मन्त्रों से नवें आवरण में पूजन करे। फिर 'ॐ ब्राह्म्यै नमः' इत्यादि आठ मन्त्रों से नवमावरण के बाहर की ओर उत्तरादिक्रम से दशमावरण में पूजन करना चाहिये। दशमावरण के बाहर भूपुर में पूर्वादि क्रम से (पूर्व-आग्नेय-दक्षिण-नैर्ऋत्य-पश्चिम-वायव्य-उत्तर तथा ईशान में) पूजन करना चाहिये। यह पूजन इन्द्रादि दश दिक्पालों तथा उनके आयुधों का करना चाहिये। इसमें ऊर्ध्व (नौवीं दिशा) की पूजा ईशान तथा पूर्व के बीच में एवं अधः (दशवीं दिशा) की पूजा नैर्ऋत्य तथा पश्चिम में करनी चाहिये। इस प्रकार आवरणपूजा करके धूप, दीप, नैवेद्य, ताम्बूल, दक्षिणा, नीराजन, प्रदक्षिणा तथा नमस्कार-पर्यन्त पूजन करने के उपरान्त मूल में लिखित 'ॐ मृत्युञ्जय महारुद्र त्राहि मां शरणागतम्। जन्ममृत्युजरारोगैः पीडितं कर्मबन्धनैः। तावकस्त्वद्गतप्राणस्त्वच्चित्तोऽहं सदा मृड॥' से प्रार्थना कर महामृत्युञ्जय मन्त्र का जप करना चाहिये।

मन्त्रस्वरूपम्—'ॐ हौं ॐ जूँ सः भूर्भुवः स्वः ॐ त्र्यम्बकं व्यजामहे सुगन्धिम्पुष्टिवर्द्धनम्॥ उर्व्वारुकमिव बन्धनान्मृत्योर्मुक्षीयमामृतात् भूर्भुवः स्वरों जूँ सः हौ ॐ॥५०॥' ततो जपान्ते मालां शिरसि निधाय प्राणानायम्य पुनः षडङ्गन्यासं कुर्यात्। तद्यथा—ॐ हौं ॐ जूँ सः भूर्भुवः स्वः त्र्यम्बकं ॐ नमो भगवते रुद्राय शूलपाणये स्वाहा हृदयाय नमः॥ १॥ ॐ हौं ॐ जूँ सः भूर्भुवः स्वः यजामहे ॐ भगवते रुद्राय अमृतमूर्तये मां जीवय शिरसे स्वाहा॥ २॥ ॐ हौं ॐ जूँ सः भूर्भुवः स्वः सुगन्धिम्पुष्टिवर्द्धनम् ॐ नमो भगवते रुद्राय चन्द्रशिरसे जटिने स्वाहा शिखायै वषट्॥ ३॥ ॐ हौं ॐ जूँ सः भूर्भुवः स्वः उर्वारुकमिव बन्धनात् ॐ नमो भगवते रुद्राय त्रिपुरान्तकाय ह्रां ह्रीं कवचाय हुम्॥ ४॥ ॐ हौं ॐ जूँ सः भूर्भुवः स्वः मृत्योर्मुक्षीय ॐ नमो भगवते रुद्राय त्रिलोचनाय ऋग्यजुःसाममन्त्राय नेत्रत्रयाय वौषट्॥ ५॥ ॐ हौं ॐ जूँ सः भूर्भुवः स्वः मामृतात् ॐ नमो भगवते रुद्राय अग्नित्रयाय ज्वलज्वल मां रक्षरक्ष अघोरास्त्राय अस्त्राय फट्॥ ६॥ इति षडङ्गन्यासं कृत्वा महामृत्युञ्जयकवचं पठित्वा—

गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम्। सिद्धिर्भवतु मे देव त्वत्प्रसादान्महेश्वर॥ १॥

इति प्रार्थ्य ॐ अनेन महामृत्युञ्जयजपाख्येन कर्मणा श्रीमहामृत्युञ्जयः प्रीयतामिति जपमीश्वरार्पणं कुर्यात्। एवं लक्षमन्त्रजपात्मकं पुरश्चरणं कृत्वा जपान्ते दशांशतो दशद्रव्यैर्होमं कुर्यात्। अथ दश द्रव्याणि—

दशद्रव्यैः प्रजुहुयात्तानि बिल्वफलं तिलाः। पायसं सर्प्पिषा दुग्धं दधि दूर्वा च सप्तमी॥
वटात् पलाशात्खदिरात्समिधो मधुराप्लुताः॥

ततो होमान्ते जले देवं मृत्युञ्जयं सम्पूज्य होमदशांशेन मन्त्रान्ते ॐ मृत्युञ्जयं तर्पयामीत्युक्त्वा दुग्धमिश्रजलेन तर्पणं कुर्यात्। ततस्तर्पणदशांशेन मन्त्रान्ते 'आत्मानमभिषिञ्चामि नमः' इति यजमानमूर्ध्न्यभिषेकः। 'होमतर्पणाभिषेकाणां मध्ये यदेव न सम्भवति तत्स्थाने तत्तद्द्विगुणो जपः कार्य्यः' ततोऽभिषेकदशांशतो वाऽष्टोत्तरशतब्राह्मणभोजनम्। एवं कृते सिद्धो मन्त्रो भवेत्।

महामृत्युञ्जय मन्त्र का स्वरूप—'ॐ हौं जूं सः भूर्भुवः स्वः त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्। भूर्भुव स्वरोम् जूं सः हौं ॐ।' यह महामृत्युञ्जय मन्त्र है। इसका जप करना चाहिंये, जप की समाप्ति पर माला को शिर पर लगाकर प्राणायाम करने के उपरान्त मूल में लिखित—'ॐ हौं ॐ जूं सः भूर्भुवः स्वः त्र्यम्बकं ॐ नमो भगवते रुद्राय शूलपाणये स्वाहा हृदयाय नमः' इत्यादि छः मन्त्रों से षडङ्गन्यास करना चाहिये। इसके पश्चात् आगे मूल में छपे मृत्युञ्जय कवच का पाठ कर 'गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम्। सिद्धिर्भवतु मे देव त्वत्प्रसादान्महेश्वर॥' ऐसी प्रार्थना करके 'अनेन महामृत्युञ्जयजपाख्येन कर्मणा श्रीमहामृत्युञ्जयः प्रीयताम्' ऐसा कहकर जप को ईश्वर को समर्पित कर देना चाहिये। इस प्रकार से एक लाख की सङ्ख्या में जप से पुरश्चरण करने के बाद जप की समाप्ति पर उसकी सङ्ख्या का दशमांश (दस सहस्र) होम दश द्रव्यों के द्वारा करना चाहिये। होमार्थ दश द्रव्य हैं—१. बेलफल, २. काले तिल, ३. पायस, ४. घृत, ५. दुग्ध, ६. दधि, ७. दूर्वा, ८. वट की समिधा, ९. खदिर (खैर) की समिधा तथा १०. पलाश की समिधा। इनको शर्करा से प्लावित कर महामृत्युञ्जय जप की सिद्धि के लिये हवन करना चाहिये। होम की समाप्ति पर जल में देव मृत्युञ्जय को पूजकर होम का दशांश महामृत्युञ्जय मन्त्र के अन्त में 'ॐ मृत्युञ्जयं तर्पयामि' लगाकर तर्पण करना चाहिये (तर्पणसङ्ख्या एक सहस्र होती है)। फिर तर्पण का दशांश (एक सौ) मार्जन या अभिषिञ्चन मृत्युञ्जय मन्त्र के अन्त में 'ॐ आत्मानमभिषिञ्चामि' कहकर करना चाहिये। यहाँ तर्पण दुग्धमिश्रित जल से होना चाहिये तथा मार्जन अपने (यजमान के) शिर पर कुश से जल छिड़ककर करना चाहिये।

विशेष—यदि होम, तर्पण तथा मार्जन की व्यवस्था न हो सके तो द्विगुणित सङ्ख्या में जप करना चाहिये। ब्राह्मणभोजन या तो अभिषेक के दशांश (दश की सङ्ख्या में) कराना चाहिये अथवा होमादि न होने पर एक सौ आठ ब्राह्मणों को भोजन कराना चाहिये।

मन्त्रमहोदधौ—

जन्मभे दशमे तस्मात्पुनश्चैकोनविंशके। जुहुयाद्यः सुधावल्ल्याः समिधश्चतुरङ्गुलाः॥
स रोगान्सकलाञ्शत्रून् पराभूय श्रिया युतः। मोदते पुत्रपौत्राद्यैः शतवर्षाणि साधकः॥
समिद्भिः श्रीफलोत्थाभिर्होमः सम्पत्तिसिद्धये। पलाशतरुजाभिस्तु ब्रह्मवर्चससिद्धये॥
वटोत्थाभिर्धनप्राप्त्यै खादिरीभिस्तु कान्तये। तिलैरधर्म्मनाशाय सर्षपैः शत्रुनष्टये॥
पायसेन कृतो होमः कान्तिश्रीकीर्त्तिदायकः। कृत्यामृत्युक्षयकरो दध्ना संवादसिद्धिदः॥
होमसङ्ख्या तु सर्वत्रायुतमानेन कीर्तिता। अष्टोत्तरशतं दूर्वात्रिकहोमाद्रुजां क्षयः॥
स्वजन्मदिवसे यस्तु पायसैर्मधुरान्वितैः। जुहोति तस्य वर्द्धन्ते कमलारोग्यकीर्तयः॥
गुडूचीबकुलोत्थाभिः समिद्भिर्हवनं नृणाम्। जन्मतारात्रये रोगान्मृत्युं चापि विनाशयेत्॥
प्रत्यहं जुहुयाद्दूर्वां अपमृत्युविनष्टये। किंबहूक्तेन सर्वेष्टं प्रयच्छति शिवो नृणाम्॥
अपामार्गसमिद्भिश्च सिद्धान्नैर्ज्वरनष्टये। दुग्धाक्तैरमृताखण्डैर्मासं होमोऽखिलाप्तये॥

इति मन्त्रमहोदधिप्रोक्तो महामृत्युञ्जयमन्त्रपुरश्चरणप्रयोगः समाप्तः॥

काम्य प्रयोग—मन्त्रमहोदधि में कहा गया है—जन्मनक्षत्र में, जन्म से दशम नक्षत्र में तथा जन्म से उन्नीसवें नक्षत्र में जो सुधावल्ली (गिलोय) की चार अङ्गुल की समिधा से होम करता है, वह सम्पूर्ण रोगों एवं शत्रुओं को पराजित करके लक्ष्मी से युक्त हो जाता है। उसकी आयु सौ वर्ष होती है तथा उसके पुत्र तथा पौत्र आनन्दपूर्वक रहते हैं। बेल के काष्ठ की समिधा से होम करने से सम्पत्ति की प्राप्ति होती है। पलास की समिधा के होम से ब्रह्मवर्चस् की प्राप्ति होती है। वटवृक्ष की समिधा से धन-प्राप्ति-हेतु हवन (महामृत्युञ्जय मन्त्र से) करना चाहिये। खैर की समिधाओं से कान्ति प्राप्त होती है। अधर्म (पाप) के नाश के लिये इस मन्त्र से तिलों (काले तिलों) का हवन करना चाहिये। सरसों का हवन साधक के शत्रुओं का नाश करता है। पायस से किया गया हवन कान्ति, श्री तथा कीर्ति देता है। साथ ही कृत्याप्रयोग के दुष्प्रभाव तथा मृत्युभय को दूर करता है। दही के द्वारा किया होम परस्पर बन्द संवाद (बोलचाल) को फिर से चालू कर देता है। इन सबमें होम की सङ्ख्या अयुत (दस सहस्र) रखनी चाहिये। यदि दूर्वा से एक सौ आठ होम किये जायँ तो रोगों का नाश होता है। जो अपने जन्मदिवस पर मीठी पायस (खीर) से होम करता है, उसकी लक्ष्मी, आरोग्य तथा कीर्ति बढ़ती है। जो महामृत्युञ्जय मन्त्र की आहुतियाँ गिलोय तथा मौलसिरी की समिधाओं से जन्म के तीन नक्षत्रों पर देते हैं, उनके रोग तथा मृत्यु नष्ट होते हैं। अपमृत्यु के विनाश के लिये प्रतिदिन दूर्वा से होम करना चाहिये। अधिक क्या कहा जाय; इस मृत्युञ्जय मन्त्र के हवन से भगवान् शङ्कर मनुष्यों के सभी अभीष्ट सिद्ध करते हैं। अपामार्ग (ओंगा = अज्झाझारा = लटजीरा) की समिधाओं से सिद्धान्न के साथ इस मन्त्र का हवन ज्वरों को नष्ट करता है। दूध में डुबोकर गिलोय के टुकड़ों का मृत्युञ्जय मन्त्र से एक मास तक किया गया होम सब कुछ प्राप्त कराता है।

वसिष्ठकल्पोक्तमहामृत्युञ्जयविधानम्

अथ वसिष्ठकल्पोक्तं महामृत्युञ्जयादिविधानं शान्तिरत्ने—

त्र्यम्बकस्य विधानं तु कीर्त्तयिष्ये मुनीश्वराः। यथोक्तविधिना युक्तं संस्मृतं ब्रह्मणा पुरा॥

मृत्युञ्जयस्त्रिधा प्रोक्त आद्यो मृत्युञ्जयः स्मृतः। मृतसञ्जीवनी चैव महामृत्युञ्जयस्तथा॥
मृत्युञ्जयः केवलः स्यात्पुटितो व्याहृतित्रयैः। तारं त्रिबीजं व्याहृत्य पुटितो मृतजीवनी॥
तारं त्रिबीजं व्याहृत्य पुटितैस्तैस्त्रियम्बकः। महामृत्युञ्जयः प्रोक्तः सर्वमन्त्रविशारदैः॥
तत्रैव विशेषः—
प्रणवान्ते प्रसादश्च मतिहारकमेव च। भूरादिव्याहृतयश्च त्र्यम्बकेति च ऋक् ततः॥
विपर्ययेण त्रिबीजं तद्वच्च व्याहृतित्रयः। स्वाहान्तो मनुरेषोऽयं शुक्रेणाराधितः पुरा॥
महामृत्युञ्जय इति विश्रुतो भुवनत्रये। ॐकारैः सहितः षड्भिश्चतुर्दशभिरेव च॥
मृत्युञ्जयं तं विधिवदुपास्येप्सितमाप्नुयात्॥
आदौ प्रासादबीजं तदनु मृतिहरं तारकं व्याहृतींश्च प्रोच्चार्य्य त्र्यम्बकं यो जपति मृतिहरं भूय एवैतदाद्यम्।
कृत्वा न्यासं षडङ्गं स्रवदमृतकरं मण्डलान्तःप्रविष्टं ध्यात्वा योगीशरुद्रं स जयति मरणं शुक्रविद्याप्रसादात्॥

अथ मन्त्रस्वरूपम्—ॐ भूः ॐ भुवः ॐ स्वः ॐ त्र्यम्बकं यजामहे इति ऋक्। ॐ स्वः ॐ भुवः ॐ भूः ॐ ४८ इत्यष्टचत्वारिंशद्वर्णात्मकः केवलमृत्युञ्जयः॥ १॥

ॐ हौं जूं सः ॐ भूर्भुवः स्वः ॐ त्र्यम्बकं यजामहे इति ऋक्। ॐ स्वःभुवःभूः ॐ सः जूं हौं ॐ ५२ इति द्विपञ्चाशद्वर्णात्मको मृतसञ्जीवनी मन्त्रः।

अथ महामृत्युञ्जयमन्त्रः—ॐ हौं ॐ जूँ ॐ सः ॐ भूः ॐ भुवः ॐ स्वः ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम्। उर्वारुकमिव वन्धनान्मृत्योर्मुक्षीय मामृतात् ॐ स्वः ॐ भुवः ॐ भूः ॐ सः ॐ जूं ॐ हौं ॐ स्वाहा ६२ इति द्विपष्टिवर्णात्मको महामृत्युञ्जयः शुक्राराधितो मन्त्रः। एतन्मन्त्रत्रयाणां न्यासध्यानादिपुरश्चरणं च पूर्वोक्तमन्त्रवत् ज्ञेयम्।

वसिष्ठकल्प के अनुसार महामृत्युञ्जय-विधान—शान्तिरत्न ग्रन्थ में कहा गया है—हे मुनीश्वरों! अब मैं ब्रह्माजी द्वारा बताये गये त्र्यम्बक-विधान को कहता हूँ। जैसा उन्होंने प्राचीन काल में बताया था। मृत्युञ्जय तीन प्रकार का होता है—१. मृत्युञ्जय, २. मृतसञ्जीवनी तथा ३. महामृत्युञ्जय। जो केवल तीनों व्याहृतियों (भूर्भुवः स्वः) से पुटित होता है, उसे मृत्युञ्जय कहते हैं। जो तार (प्रणव = ॐ), त्रिबीज (हौं जूं सः) तथा व्याहृतियों से पुटित होता है, वह मृतसञ्जीवनी होता है। जिसमें तार, त्रिबीज तथा व्याहृति से त्र्यम्बकादि मन्त्र को पुटित किया जाता है, वह मन्त्रशास्त्र के विद्वानों में महामृत्युञ्जय कहा गया है। इसमें यह विशेष है कि प्रणव के पश्चात् प्रासाद (हौं) तथा मतिहारक (जूं सः), फिर भूरादि व्याहृतियाँ तथा उनके पश्चात् त्र्यम्बकादि ऋचा लगाकर फिर विपर्यय से तीनों व्याहृतियाँ लगाकर अन्त में स्वाहा लगा देते हैं। इस मन्त्र का आराधन प्राचीन काल में शुक्राचार्य ने किया था। यह तीनों लोकों में महामृत्युञ्जय नाम से विख्यात है। इस मृत्युञ्जय की ओंकार-सहित विधिवत् उपासना करनी चाहिये। इससे अभीष्ट-सिद्धि प्राप्त होती है। प्रारम्भ में प्रासादबीज, फिर मृत्युनाशक तारक, फिर व्याहृतियों को उच्चारित कर जो 'त्र्यम्बकं' इत्यादि को लगाकर जपता है तो उसकी मृत्यु का नाश होता है। मन्त्रजप के पूर्व षडङ्ग न्यास करके मृत्युञ्जय का ध्यान करने वाला इस शुक्राचार्य की विद्या की कृपा से मृत्यु को जीत लेता है॥ १-८॥

मन्त्र का स्वरूप—(१) मृत्युञ्जय मन्त्र—ॐ भूः ॐ भुवः ॐ स्वः ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वारुकमिवबन्धनान्मृत्योर्मुक्षीय मामृतात्। ॐ स्वः ॐ भुवः ॐ भूः। इसमें अड़तालीस वर्ण होते हैं।

(२) मृत्सञ्जीवनी—ॐ हौं जूं सः ॐ भूर्भुवः स्वः ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्। ॐ स्वः, ॐ भुवः ॐ भूः ॐ सः जूं हौं ॐ। यह बावन वर्णों का मृत्सञ्जीवनी मन्त्र होता है।

(३) महामृत्युञ्जय मन्त्र—ॐ हौं ॐ जूं सः ॐ भूः ॐ भुवः ॐ स्वः ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्। ॐ स्वः, ॐ भुवः ॐ भूः ॐ सः ॐ जूं ॐ हौं ॐ स्वाहा। यह बासठ वर्णों (अक्षरों) का महामृत्युञ्जय मन्त्र है, जिसकी आराधना शुक्राचार्य ने की थी।

इन तीनों प्रकार के मन्त्रों का न्यास, ध्यान तथा पुरश्चरण पूर्वोक्त (महामृत्युञ्जय मन्त्र) की भाँति जानना चाहिये।

प्रयोगविशेषो विधानमालायाम्—

ग्रहपीडासु सर्वासु महागदनिपीडने। वियोगे बान्धवानां च जनमार उपस्थिते॥
राज्यभङ्गे धनग्लानौ क्षिप्रमृत्युविनाशने। अभियोगे समुत्पन्ने मनोधर्मविपर्यये॥
मृत्युञ्जयस्य देवस्य विधानं क्रियते बुधैः। राष्ट्रभङ्गे जनक्लेशे महारोगनिपीडने॥
कोटिसंख्यो जपः प्रोक्तो मुनिभिस्तत्त्वदर्शिभिः। सामान्यगदपीडायां दुष्टस्वप्नस्य दर्शने॥
मृत्युञ्जयस्य देवस्य जपो लक्षमितः शुभः। अपमृत्युविनाशाय जपोऽयुतमितः स्मृतः॥
दुर्वार्ताश्रवणे जाप्यं सुहृदामनृते क्षुते। यात्रा यामयुतं कार्य्यं सहस्रं वा समाहितैः॥
पूर्णस्य स्वस्य जाप्यस्य दशांशहवनं मतम्। पायसेन च साज्येन समिद्भिस्तिलसर्पिषा॥
श्रीवृक्षस्य फलैः पत्रैः कमलैः शतपत्रकैः। खर्जूरीभिश्च साज्याभिरन्यैर्यज्ञफलैस्तथा॥
हवनं कारयेद्विद्वान् कृत्वाचार्यार्चनक्रियाम्। ब्राह्मणान् भोजयेत् संयग् दशांशेन यजेत्तथा॥
एवं कृते विधाने च सर्वकर्म्मफलं लभेत्। चिन्तितार्थस्य सिद्धिः स्यान्नात्र कार्य्या विचारणा॥

सिद्ध मन्त्रों के प्रयोग—विधानमाला ग्रन्थ में कहा गया है कि समस्त प्रकार की ग्रहपीड़ाओं में, महान् रोग से पीड़ित होने पर, बान्धवों का वियोग हो जाने पर, महामारी फैलने पर, राज्यभङ्ग होने पर, धन का नाश होने पर, मृत्युभय के उपस्थित होने पर, अभियोग (शासन द्वारा आरोप लगना) लगने पर, मन में चञ्चलता होने पर विद्वानों को मृत्युञ्जय का विधान करना चाहिये। राष्ट्रभङ्ग, महाक्लेश, महामारी-पीड़ा में एक करोड़ जप करना चाहिये। ऐसा तत्त्वदर्शी मुनियों का मत है। सामान्य रोग-पीड़ा तथा दुःस्वप्न-दर्शन होने पर मृत्युञ्जय मन्त्र का एक लाख जप करना शुभ होता है। अपमृत्यु के विनाश के लिये अयुत सङ्ख्या में जप करना चाहिये। दुर्वार्त्ता-श्रवण (बुरी खबर सुनने पर), मित्रों के सम्बन्ध में झूठी अफवाह सुनने पर तथा यात्रा में सङ्कट आने पर भी अयुत (दस सहस्र) की सङ्ख्या में जप करना चाहिये अथवा एक सहस्र जप समाहित चित्त से करना चाहिये। जप पूर्ण होने पर दशांश हवन पायस, घृत, तिल, समिधा, बेल के फल, कोमल बिल्वपत्र, कमल शतपत्रक (गुलाब), खजूरफल आदि से घृत के साथ अथवा अन्य यज्ञीय फलों का हवन करके विद्वान् को पूजन कार्य करना चाहिये। फिर ब्राह्मणभोजन सम्यक् रूप से कराना चाहिये। इस प्रकार के विधान को सम्पन्न करने पर सम्पूर्ण कर्म सिद्ध होते हैं। जो भी मन में सोची हुई इच्छा होती है, वह पूर्ण होती है; इसमें सन्देह नहीं है।

शान्तिरत्ने विशेषः—

आयुःकामो घृतेनाग्नौ जुहुयाल्लक्षसंख्यया। अयुतं वा सहस्रं वा शतमष्टोत्तरं तु वा॥
आरोग्यकामो जुहुयादर्ककाष्ठैर्घृतप्लुतैः। पयसा वापि जुहुयाद्द्रव्येनाज्येन वा पुनः॥
पलाशसमिधो वापि सर्वरोगप्रशान्तये। अच्छिद्रैराम्रपर्णैस्तु यथाक्तैर्जुहुयाज्ज्वरे॥
गुडूचीखण्डकैर्वापि खादिरैर्वा घृतप्लुतैः। प्रमेहे मधुना होमः पयसा वा घृतेन वा॥

औदुम्बरसमिद्भिर्वा होम आमलकेन वा। गुल्मे शाल्मलिहोमः स्यात्तिलैः कृष्णैर्घृतेन वा॥
वर्धमानसमिद्धोमः सद्यः शूलहरो भवेत्।

शान्तिरत्न ग्रन्थ के अनुसार विशेष प्रयोगविधि—आयु की वृद्धि चाहने वाला एक लाख आहुतियाँ अथवा एक अयुत की सङ्ख्या में अथवा एक सहस्र अथवा एक सौ आठ आहुतियाँ घी से दे। आरोग्य चाहने वाले को आक की समिधा को घी में डुबोकर आहुतियाँ देनी चाहिये अथवा दुग्ध से अथवा गोघृत से आहुतियाँ देनी चाहिये। समस्त रोगों की शान्ति-हेतु पलाश-समिधाओं की आहुति दे। ज्वर में छिद्ररहित आम के पत्तों की आहुतियाँ घृत में डुबोकर देनी चाहिये। अथवा ज्वर में गिलोय के टुकड़ों या खैर की समिधाओं को घी में डुबोकर आहुतियाँ देनी चाहिये। प्रमेह रोग में मधु से, दुग्ध से अथवा घृत से आहुतियाँ देकर ऊमर या आँवले से हवन करना चाहिये। शूल रोग में सेमरवृक्ष की समिधाओं से और कृष्ण तिल एवं घी से हवन करना चाहिये। यदि सेमल वृक्ष की समिधाओं से वर्धमानक्रम में होम किया जाय तो शीघ्र ही शूल की पीड़ा नष्ट होती है (प्रथम आहुति में एक समिधा, द्वितीय में दो समिधा, तृतीय में तीन समिधा, चतुर्थ आहुति में चार समिधा से एक साथ होम करना वर्धमानक्रम होता है। इस क्रम से कम से कम १०८ आहुति देनी चाहिये)।

करञ्जसमिधो वापि निर्गुण्डीसमिधोऽपि वा॥
तैलेनाभ्यज्य जुहुयाद्वातरोगप्रशान्तये। शमीसमिद्भिर्जुहुयादतिसारप्रशान्तये॥
शान्त्यर्थमक्षिरोगस्य पलाशसमिधः स्मृताः। उन्मत्तसमिधो हुत्वा अपस्मारात्प्रमुच्यते॥
कुबेराक्षेन्द्रवल्लीभ्यां नेत्रशूलेषु होमयेत्। तैलेनाभ्यज्य जुहुयाद्वज्रखण्डैस्तथैव च॥
मातुलुङ्गगुडूचीनां होमः कामलनाशनः। मधुरत्रयहोमेन शान्तिः स्याद्राजयक्ष्मणाम्॥
होमाच्च फलमूलानां गर्भरोगः प्रशाम्यति। कुष्ठे मसूरिकैर्होमो मधुरत्रयसंयुतैः॥
अथवा तैलसंयुक्तैर्जुहुयाद्गौरसर्षपैः।

वातरोग शान्त करने के लिये करञ्ज की समिधा अथवा निर्गुण्डी की समिधा को तेल में डुबोकर होम करना चाहिये। अतिसार (दस्त) रोग की शान्ति के लिये शमी (छैंकुर=छौंकर) वृक्ष की समिधा से हवन करे। अक्षिरोग (नेत्ररोग) की शान्ति के लिये पलाश की समिधा से होम करते हैं। धतूरे की समिधा का हवन अपस्मार रोग को शान्त करता है। कुबेराक्षी (पाटल वृक्ष) की अथवा इन्द्रवल्ली (इन्द्रायण) की समिधाओं का होम नेत्रशूल की शान्ति के लिये तेल में डुबोकर करना चाहिये अथवा वज्रखण्ड (थूहर वृक्ष के टुकड़ों) को तेल में अभ्यक्त करके होम करना चाहिये। बिजौरा नीबू तथा गिलोय के टुकड़ों का हवन कामला को नष्ट करता है। मधुरत्रय (गुड़, घुंघची तथा सुहागा अथवा समभाग घी, शक्कर तथा मधु का मिश्रण) के हवन के राजयक्ष्मा (फेफड़ों की टी०बी०) शान्त होती है। फलों एवं मूलों का होम गर्भ के रोगों को दूर करता है। मधुरत्रय के साथ मिलाकर मसूर का होम कुष्ठ रोग (चर्मरोग) का नाशक है अथवा तैल मिलाकर श्वेत सर्षप (सफेद सरसों) का हवन करना भी कुष्ठ-नाशक होता है।

ये चान्ये मुखरोगाः स्युः शिरोरोगास्तथैव च॥
ते सर्वे प्रशमं यान्ति तिलैर्होमाद्घृतप्लुतैः। औदराणां तु रोगाणां सर्वेषां शान्तिमिच्छता॥
बिल्ववृक्षसमिद्धोमः कर्त्तव्यो द्विजसत्तम। अधःस्रावे तु जुहुयात्पद्मपत्रैर्घृतप्लुतैः॥
दूर्वाभिर्वा पयोक्ताभिर्जुहुयाच्चन्दनेन वा। अश्वत्थस्य समिद्भिश्च रक्तस्रावे तु होमयेत्॥

अथवा गोघृतेनैव रक्तातीसारशान्तये। अन्यरोगेषु सर्वेषु कण्ठरोगमहोदरे॥
त्रिभिः फलैस्तु जुहुयान्मधुक्षीरघृतप्लुतैः। मधुरत्रयहोमस्तु सर्वरोगोपशान्तये॥
आयुर्वेदेषु यत्प्रोक्तं यस्य रोगस्य भेषजम्। तस्य रोगस्य शान्त्यर्थं तेन तेन च होमयेत्॥

जितने भी मुखरोग तथा शिरोरोग हैं, वे सब घृतमिश्रित कृष्ण तिलों के होम से शान्त हो जाते हैं। जो सम्पूर्ण उदररोगों को शान्त करने का इच्छुक हो, उसे हे द्विजश्रेष्ठ! बिल्व वृक्ष की समिधाओं से होम करना चाहिये। अधःस्राव (रक्तप्रदर, श्वेत प्रदर, अर्श रोग इत्यादि) में कमल के पत्तों को घी में चुपड़ कर होम करते हैं अथवा दूर्वा को घी में आप्लुत कर अधःस्राव की शान्ति के लिये होम किया जाता है; साथ ही चन्दन को घी में मिलाकर अधःस्राव में होम करना चाहिये। रक्तस्राव की शान्ति के लिये अश्वत्थ (पीपल) वृक्ष की समिधा को घृतप्लुत करके होम करना चाहिये। रक्तातिसार की शान्ति-हेतु गोघृत का होम पीपल की समिधाओं के साथ करना चाहिये। अन्य सभी रोगों, कण्ठरोग तथा जलोदर में त्रिफला के तीन फलों को मधु एवं घृत, दूध में प्लुत कर होम करना चाहिये। समस्त रोगों की शान्ति के लिये मधुरत्रय का होम करना चाहिये। आयुर्वेद में जिस रोग की जो औषधि बतायी गयी है, उस औषधि का होम उस रोग की शान्ति के लिये करना चाहिये।

श्रीकामो बिल्ववृक्षस्य समिद्भिरथवा फलैः। पत्रैर्वाप्यस्य जुहुयान्महतीं श्रियमाप्नुयात्॥
विद्यार्थी जुहुयाद्यस्तु रुद्राक्षैर्गोघृतप्लुतैः। विद्यां चायुस्ततो वित्तं लभते नात्र संशयः॥
वृष्टिकामस्तु सम्पूज्य देवदेवं त्रियम्बकम्। अर्घ्यपाद्यादिभिर्देवमब्लिङ्गैरभिषेचयेत् ॥
आपो हिष्ठेति तिसृभिर्हिरण्यवर्णादिभिस्तथा। पावमानानुवाकेन त्र्यम्बकेत्यनया ऋचा॥
वैतसीभिः समिद्भिश्च जुहुयात्पयसाप्लुतैः। अयुतं वा सहस्रं वा जुहुयात्पयसापि वा॥
पुण्याहं वाचयेद्विप्रैर्ब्राह्मणान् भोजयेत्ततः। दशाहाभ्यन्तरे वृष्टिर्भवत्येव न संशयः॥
वृष्टिकामश्चार्द्रवासा वटवृक्षसमुद्भवैः। समिद्भिर्जुहुयान्मन्त्रान्सद्यो वृष्टिमवाप्नुयात्॥
नाभिमात्रे जले स्थित्वा ध्यायन् वै पुष्टिवर्धनम्। जपेत्त्रियम्बकं मन्त्रं महतीं वृष्टिमाप्नुयात्॥
अग्निहोत्रात्समादाय सितं भसितमुत्तमम्। अनया तु ऋचा हुत्वा जले वृष्टिं निवारयेत्॥
पुत्रकामस्तु जुहुयात्पायसं घृतसंयुतम्। चरुशेषं स्वयं भुक्त्वा पुत्रमाप्नोति मानवः॥

इति वसिष्ठकल्पोक्तं मृत्युञ्जयसञ्जीवनीमहामृत्युञ्जयविधानं समाप्तम्।

लक्ष्मी चाहने वाले को बेलवृक्ष की समिधाओं का अथवा फलों तथा पत्तों का होम करना चाहिये। इससे उसे महान् लक्ष्मी की प्राप्ति होती है। जो विद्यार्थी गोघृत में लपेट कर रुद्राक्षों का हवन करता है, उसे विद्या तथा धन की प्राप्ति होती है; इसमें सन्देह नहीं है। वर्षा कराने की इच्छा हो तो त्र्यम्बक देव (शिव) की पूजा अर्घ्य, पाद्य से करके अप् (जल) से उनका अभिषेक करे तथा आपो हिष्ठा० इन ऋचाओं का, 'हिरण्यवर्णादि' ऋचाओं का, पावमान अनुवाक का तथा 'त्र्यम्बकं' इस ऋचा का पाठ कर वेतस् की समिधाओं को दूध में डुबोकर अयुत या सहस्र की सङ्ख्या में हवन करे। विप्रों से पुण्याहवाचन कराये; फिर ब्राह्मणभोजन कराये तो दश दिन के भीतर वृष्टि होती है; इसमें सन्देह नहीं है। अथवा वृष्टि के इच्छुक को गीले वस्त्रों में वटवृक्ष की समिधाओं से मृत्युञ्जय मन्त्र से आहुति देने से तुरन्त वर्षा होती है। नाभिमात्र जल में खड़े होकर पुष्टिवर्धन (शिवजी) का ध्यान करके त्र्यम्बक मन्त्र का जप करे तो घोर वर्षा होती है। अग्निहोत्र की श्वेत भस्म को लेकर 'त्र्यम्बकं यजामहे' इत्यादि ऋचा का जप करे तो वर्षा रुक जाती है। पुत्रकामी व्यक्ति को पायस में घृत मिलाकर हवन करना चाहिये। इसमें जो चरु शेष बचे, उसे स्वयं खाने से पुत्र की प्राप्ति होती है।

महामृत्युञ्जयकवचम्

भैरव उवाच—

शृणुष्व परमेशानि कवचं मन्मुखोदितम्। महामृत्युञ्जयस्यास्य न देयं परमाद्भुतम्॥ १॥
यद्धृत्वा यत्पठित्वा च यच्छ्रुत्वा कवचोत्तमम्। त्रैलोक्याधिपतिर्भूत्वा सुखितोऽस्मि महेश्वरि॥ २॥
तदेव वर्णयिष्यामि तव प्रीत्या वरानने। तथापि परमं तत्त्वं न दातव्यं दुरात्मने॥ ३॥

ॐ अस्य श्रीमहामृत्युञ्जयकवचस्य श्रीभैरवः ऋषिः। गायत्रीछन्दः। श्रीमृत्युञ्जय रुद्रो देवता। ॐ बीजम्। जूं शक्तिः। सः कीलकम्। हौमिति तत्त्वम्। श्रीचतुर्वर्गफलसाधनाय पाठे विनियोगः।

मृत्युञ्जय कवच—श्री भैरव ने कहा—हे परमेश्वरि! आप मेरे मुख से कवच सुनो। यह मृत्युञ्जय का कवच परमाद्भुत है। यह हर किसी को नहीं बताना चाहिये। इस उत्तम कवच को धारण करके (कण्ठस्थ करके) तथा इसे पढ़कर स्वयं को इससे आच्छादित कर मैं (भैरव) तीनों लोकों का अधिपति हूँ। हे वरानने! आपकी प्रसन्नता के लिये इस कवच का वर्णन कर रहा हूँ, किन्तु इसे किसी दुरात्मा व्यक्ति को नहीं देना चाहिये॥ १-३॥

विनियोग—'ॐ अस्य श्री महामृत्युञ्जय कवचस्य श्री भैरव ऋषिः। गायत्री छन्दः। श्री महामृत्युञ्जयरुद्रो देवता। ॐ बीजम्। जूं शक्तिः। सः कीलकम्। हौं इति तत्त्वम्। श्री चतुवर्गफलसाधनाय पाठे विनियोगः' इसको कहकर कवच के विनियोग का जल छोड़ना चाहिए।

चन्द्रमण्डलमध्यस्थे रुद्रमाले विचित्रिते। तत्रस्थं चिन्तयेत्साध्यं मृत्युं प्राप्तोऽपि जीवति॥ १॥
ॐ जूं सः हौं शिरः पातु देवो मृत्युञ्जयो मम। श्रीं शिवो वै ललाटं च ॐ हौं भ्रुवौ सदाशिवः॥ २॥
नीलकण्ठोऽवतान्नेत्रे कपर्दी मेऽवताच्छ्रुती। त्रिलोचनोऽवताद्गण्डौ नासां मे त्रिपुरान्तकः॥ ३॥
मुखं पीयूषघटभृदोष्ठौ मे कृत्तिकाम्बरः। हनुं मे हाटकेशानो मुखं बटुकभैरवः॥ ४॥
कन्धरां कालमथनो गलं गणप्रियोऽवतु। स्कन्धौ स्कन्दपिता पातु हस्तौ मे गिरिशोऽवतु॥ ५॥
नखान्मे गिरिजानाथः पायादङ्गुलिसंयुतान्। स्तनौ तारापतिः पातु वक्षः पशुपतिर्मम॥ ६॥
कुक्षिं कुबेरवरदः पार्श्वौ मे मारशासनः। शर्वः पातु तथा नाभिं शूली पृष्ठं ममाऽवतु॥ ७॥
शिश्नं मे शङ्करः पातु गुह्यं गुह्यकवल्लभः। कटिं कालान्तकः पायादूरू मेऽन्धकघातकः॥ ८॥

मूलकवच प्रारम्भ—चन्द्रमण्डल के मध्य में स्थित विचित्रित रुद्रमाल में साध्य (लक्ष्य) का चिन्तन (ध्यान) करने से मृत्यु को प्राप्त व्यक्ति भी जी उठता है। हे मृत्युञ्जय देव! ॐ जूं सः हौं मेरे शिर की रक्षा करें। श्री शिव ललाट की रक्षा करें तथा ॐ हौं सदाशिव भौंहों की रक्षा करें। नीलकण्ठ नेत्रों की तथा कपर्दी मेरे कानों की रक्षा करें। त्रिलोचन गण्डों (गालों के समीपस्थ कल्ले) तथा त्रिपुरान्तक नाक की रक्षा करें। पीयूषघटभृद् मुख की तथा कृत्तिकाम्बर होठों की रक्षा करें। हाटकेशान मेरे हनु (जबड़ों) की तथा बटुकभैरव मुख की रक्षा करें। कन्धरा (धड़) की रक्षा कालमथन तथा गले की रक्षा गणप्रिय करे। स्कन्धों की रक्षा स्कन्दपिता तथा हाथों की रक्षा गिरीश करे। गिरिजानाथ अङ्गुलियों सहित नखों की रक्षा करें। तारापति स्तनों की तथा पशुपति छाती की रक्षा करें। कुबेरवरद कुक्षि की तथा मारशासन पार्श्वों (पसलियों) की रक्षा करें। शर्व नाभि की तथा शूली मेरी पीठ की रक्षा करें। शङ्कर मेरे शिश्न (लिङ्ग) की तथा गुह्यकवल्लभ गुह्य की रक्षा करें। कटि की कालान्तक तथा अन्धकघातक दोनों ऊरू (घुटनों से ऊपर पैर का भाग) की रक्षा करें॥ १-८॥

जागरूकोऽवताज्जानु जङ्घे मे कालभैरवः। गुल्फौ पायाज्जटाधारी पादौ मृत्युञ्जयोऽवतु॥ ९॥
पादादिमूर्द्धपर्यन्तं सद्योजातो ममावतु। रक्षाहीनं नामहीनं वपुः पात्वमृतेश्वरः॥ १०॥
पूर्वे बलविकरणो दक्षिणे कालशासनः। पश्चिमे पार्वतीनाथ उत्तरे मां मनोन्मनः॥ ११॥
ऐशान्यामीश्वरः पायादाग्नेय्यामग्निलोचनः। नैर्ऋत्यां शम्भुरव्यान्मां वायव्यां वायुवाहनः॥ १२॥
ऊर्ध्वे बलप्रमथनः पाताले परमेश्वरः। दशदिक्षु सदा पातु महामृत्युञ्जयश्च माम्॥ १३॥
रणे राजकुले द्यूते विषमे प्राणसंशये। पायादों जूं महारुद्रो देवदेवो दशाक्षरः॥ १४॥
प्रभाते पातु मां ब्रह्मा मध्याह्ने भैरवोऽवतु। सायं सर्वेश्वरः पातु निशायां नित्यचेतनः॥ १५॥
अर्द्धरात्रे महादेवो निशान्ते मां महोदयः। सर्वदा सर्वतः पातु ॐ जूं सः हौं मृत्युञ्जयः॥ १६॥

जागरूक जानुओं (घुटनों) की तथा कालभैरव जङ्घाओं (पिण्डलियों) की रक्षा करें। जटाधारी गुल्फों (टखनों) की तथा मृत्युञ्जय पैरों की रक्षा करें। पैरों से लेकर शिर-पर्यन्त सद्योजात मेरी रक्षा करें तथा अमृतेश्वर शरीर के रक्षाहीन, नामहीन शेष भाग की रक्षा करें। पूर्व दिशा में बलविकरण, दक्षिण में कालशासन, पश्चिम में पार्वतीनाथ तथा उत्तर में मनोन्मन मेरी रक्षा करें। ईशान कोण (पूर्व+उत्तर का कोना) में ईश्वर मेरी रक्षा करें, अग्निकोण (पूर्व+दक्षिण का कोना) में अग्निलोचन रक्षा करें। नैर्ऋत्य (दक्षिण+पश्चिम) में शम्भु तथा वायव्य (पश्चिम+उत्तर का कोना) में वायुवाहन रक्षा करें। ऊर्ध्व (ऊपर की ओर) में बलप्रमथन एवं पाताल (पैरों के नीचे) में परमेश्वर तथा महामृत्युञ्जय सदैव दशों दिशाओं में मेरी रक्षा करें। युद्ध में, राजकुल (सेना आदि) में, द्यूत (जुआ खेलते समय=चुनाव लड़ते समय), विषम परिस्थिति में, प्राणों का संशय होने पर ॐ जूं महारुद्र दशाक्षर देव देव रक्षा करें। प्रात:काल में ब्रह्मा तथा मध्याह्न में भैरव मेरी रक्षा करें। सायंकाल में सर्वेश्वर तथा रात्रि में नित्य चेतन रक्षा करें। अर्धरात्रि में महादेव निशान्त में महोदय तथा सब समय में सब ओर से 'ॐ जूं सः हों' मृत्युञ्जय रक्षा करें॥ ९-१६॥

इतीदं कवचं पुण्यं त्रिषु लोकेषु दुर्लभम्। सर्वमन्त्रमयं गुह्यं सर्वतन्त्रेषु गोपितम्॥ १७॥
पुण्यं पुण्यप्रदं दिव्यं देवदेवाधिदैवतम्। य इदं च पठेन्मन्त्रं कवचं वाचयेत्ततः॥ १८॥
तस्य हस्ते महादेवि त्र्यम्बकस्याष्टसिद्धयः। रणे धृत्वाचरेद्युद्धं हत्वा शत्रूञ्जयं लभेत्॥ १९॥
जयं कृत्वा गृहं देवि स प्राप्स्यति सुखं पुनः। महाभये महारोगे महामारीभये तथा॥ २०॥
दुर्भिक्षे शत्रुसंहारे पठेत्कवचमादरात्।

इति श्रीमहामृत्युञ्जयकवचम्।

इस प्रकार यह पुण्य कवच तीनों लोकों में दुर्लभ है। यह सर्व मन्त्रमय तथा सभी तन्त्रों में गोपनीय है। यह देवदेवाधिदैवत पुण्य, पुण्यप्रद तथा दिव्य है। जो इस कवच का पाठ करता है (बाँचता है), उसके हाथ में हे महादेवि! त्र्यम्बक की आठ-आठ सिद्धियाँ रहती हैं। इसे रण में धारण करने पर योद्धा युद्ध में शत्रु को मारकर विजय प्राप्त करता है एवं जीत कर घर आकर वह महान् सुख प्राप्त करता है। महाभय में, महारोग में, महामारी के भय में, दुर्भिक्ष (अकाल में) तथा शत्रुसंहार में कवच को आदरपूर्वक पढ़ना चाहिये॥ १७-२१॥

रुद्रजपाङ्गभूतदशाक्षरीरुद्रमन्त्रपुरश्चरणप्रयोगः

अथ रुद्रविधानानि; तत्र तावत् रुद्रजपाङ्गभूतदशाक्षरीरुद्रमन्त्रपुरश्चरणप्रयोगः। सुमुहूर्त्ते शिवालयादिषु जपयोग्यभूमिं प्रकल्प्य पूर्वदिने प्रायश्चित्तं गायत्र्यायुतजपं च कृत्वा प्रारम्भदिने प्रातर्नित्यकर्म्म समाप्य जपस्थाने कूर्मसंशोधनं

दीपस्थानशोधनं च कुर्य्यात्। ततः स्वासने प्राङ्मुख उदङ्मुखो वा उपविश्य भस्मत्रिपुण्ड्रं रुद्राक्षधारणं च कृत्वा, आचम्य, प्राणानायम्य, देशकालौ सङ्कीर्त्य 'अमुकगोत्रोऽमुकशर्मा श्रुतिस्मृतिपुराणागमोक्तफलावाप्तये अस्मिन् पुण्याहे मम सर्वविधपातकनिवृत्त्यर्थं वाऽमुककामनासिद्धये श्रीरुद्रप्रीत्यर्थं रुद्रदशार्णमन्त्रपुरश्चरणं स्वयं ब्राह्मणद्वारा वा करिष्ये' इति सङ्कल्प्य गणपतिपूजनं पुण्याहवाचनं मातृकापूजनं नान्दीश्राद्धमाचार्यजापकवरणं च पूर्ववत्कुर्य्यात्। ततो भद्रंकर्णेभिरिति जपस्थानसमीपमागत्य पूर्वोक्तद्वारपूजां कृत्वा प्रविश्य, स्वासने उपविश्य, आचम्य, प्राणानायम्य, आसनशुद्धिं भूतशुद्धिं स्वप्राणप्रतिष्ठामन्तर्मातृकाबहिर्मातृकान्यासं च पूर्ववत् कृत्वा पञ्चाक्षरोदितं श्रीकण्ठादिकलान्यासं कुर्य्यात्।

रुद्र के विधान—इसमें सर्वप्रथम दशाक्षरी रुद्रमन्त्र के पुरश्चरण की प्रयोगविधि दी जा रही है। शुभ मुहूर्त में शिवालय इत्यादि में जपयोग्य भूमि की व्यवस्था करके पुरश्चरण आरम्भ के एक दिन पूर्व प्रायश्चित्त कर्म तथा एक अयुत (दश सहस्र = १०,०००) गायत्री-जप कर ले। यह पूर्वदिन का कृत्य है। प्रारम्भ के दिन नित्यकर्म को समाप्त करके जपस्थान में कूर्मसंशोधन, दीपस्थानशोधन कर ले। तत्पश्चात् पूर्व या उत्तर की ओर मुख करके अपने आसन पर बैठे। फिर भस्म, त्रिपुण्ड्र तथा रुद्राक्ष-धारण, आचमन, प्राणायाम करके सङ्कल्प करे।

सङ्कल्प—प्रथम देश-काल का उच्चारण कर 'अमुकगोत्रोऽमुकशर्माऽहं श्रुतिस्मृतिपुराणागमोक्तफलावाप्तये अस्मिन् पुण्याहे मम सर्वविधपातकनिवृत्त्यर्थं वाऽमुककामनासिद्धये श्रीरुद्रप्रीत्यर्थे रुद्रदशार्णमन्त्रपुरश्चरणं स्वयं ब्राह्मणद्वारा वा करिष्ये' ऐसा सङ्कल्प करके गणपतिपूजन, पुण्याहवाचन, मातृकापूजन, नान्दीश्राद्ध, आचार्य-जापकवरण पूर्ववत् (प्रथम तथा द्वितीय काण्ड में वर्णित विधि के अनुसार) करे। फिर 'भद्रं कर्णेभिः शृणुयाम देवाः' इत्यादि ऋचा का जप करते हुए जपस्थान के समीप आकर पूर्वकाण्डों में कथित द्वारपूजा करके प्रवेश कर अपने आसन पर बैठकर आचमन, प्राणायाम, भूतशुद्धि, आसनशुद्धि, स्वयं की प्राणप्रतिष्ठा, अन्तर्मातृका न्यास, बहिर्मातृका न्यास का पूर्वकथित विधि से सम्पन्न कर फिर पञ्चाक्षर मन्त्र की पुरश्चरण-विधि में जो श्रीकण्ठकलान्यास कहा है, उसे करे।

अथ रुद्रविधानमन्त्रन्यासः। 'ॐ नमो भगवते रुद्राय' इति दशाक्षरो मन्त्रः। अस्य श्रीरुद्रमन्त्रस्य बौधायन ऋषिः। पङ्क्तश्छन्दः। रुद्रो देवता। ममाभीष्टसिद्ध्यर्थे जपे विनियोगः। ॐ यातेरुद्रशिवातनूरघोरापापकाशिनी॥ तया नस्तन्वाशंतमयागिरिशंताभिचाकशीहि॥१॥ इति शिखायाम्। ॐ अस्मिन्महत्यर्णवेंतरिक्षेभवाऽअधि॥ तेषांᳫंसहस्रयोजनेवधन्वानितन्मसि॥२॥ इति शिरसि। ॐ सहस्राणिसहस्रशोबाह्वोस्तवहेतयः॥ तासामीशानो भगवःपराचीना मुखाकृधि॥३॥ इति ललाटे। ॐहᳫंसःशुचिषद्वसुरंतरिक्षसद्धोतावेदिषदतिथिर्दुरोणसत्॥ नृषद्वरसदृतसद्व्योमसदब्जागोजाऽऋतजाऽअद्रिजाऽऋतंबृहत्॥४॥ इति भ्रुवोर्मध्ये। ॐ त्र्यम्बकंयजामहेसुगन्धिम्पुष्टिवर्द्धनम्। उर्व्वारुक मिव बन्धनान्मृत्योर्मुक्षीयमामृतात्॥५॥ इति नेत्रयोः। ॐ नमःस्रुत्त्यायचपथ्यायचनमःकाट्यायच नीप्यायच। नमः कुल्ल्यायचसरस्यायचनमोनादेयायचवैशन्तायच॥६॥ इति कर्णयोः। ॐ मानस्तोकेतनयेमानऽआयुषिमानोगोषु मानोऽअश्वेषुरीरिषः। मानोवीरान् रुद्रभामिनोव्वधीर्हविष्मन्तःसदमित्त्वाहवामहे॥७॥ इति नासिकायाम्। ॐ अवतत्य धनुष्ट्वᳫंसहस्राक्षशतेषुधे। निशीर्यशल्यानाम्मुखाशिवोनःसुमनाभव॥८॥ इति मुखे। ॐ नीलग्रीवाःशितिकण्ठाः शर्वाअधःक्षमाचराः। तेषांᳫंसहस्रयोजनेवधन्वानितन्मसि॥९॥ इति कण्ठे। ॐ नीलग्रीवाः शितिकण्ठादिवᳫं रुद्राऽउपश्रिताः। तेषांᳫंसहस्रयोजनेवधन्वानितन्मसि॥१०॥ इत्युपकण्ठे। ॐ नमस्तआयुधायानाततायधृष्णवे। उभाभ्यामुत तेनमोबाहुभ्यान्तवधन्वने॥११॥ इति स्कन्धयोः। ॐ यातेहेतिर्मीढुष्टमहस्तेबभूवतेधनुः। तयास्मान्विश्वतस्त्वमयक्ष्मयापरिभुज॥१२॥ इति बाह्वोः। ॐ येतीर्थानिप्रचरन्तिसृकाहस्तानिषङ्गिणः। तेषांᳫंसहस्रयोजनेवधन्वानितन्मसि॥१३॥ इति हस्तयोः। ॐ सद्योजातंप्रपद्यामिसद्योजातायवैनमोनमः। भवेभवेनातिभवेभवस्व

माम्भुवोद्भवायनमः॥१४॥ इत्यङ्गुष्ठयोः। ॐ वामदेवायनमोज्येष्ठायनमः श्रेष्ठायनमोरुद्रायनमः कालायनमः। कलविकरणायनमो बलविकरणायनमो बलायनमोबलप्रमथायनमः सर्वभूतदमनायनमोमनोन्मनायनमः॥१५॥ इति तर्जन्योः। ॐ अघोरेभ्योऽथघोरेभ्योघोरघोरतरेभ्यः। सर्वेभ्यःसर्वशर्वेभ्योनमस्तेअस्तुरुद्ररूपेभ्यः॥१६॥ इति मध्यमयोः। ॐ तत्पुरुषायविद्महेमहादेवायधीमहि। तन्नोरुद्रःप्रचोदयात्॥१७॥ इति अनामिकयोः। ॐ ईशानः सर्व विद्यानामीश्वरःसर्वभूतानाम्ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्माशिवोमेअस्तुसदाशिवोम्॥१८॥ इति कनिष्ठिकयोः। ॐ नमो वःकिरिकेभ्योदेवानाꣳहृदयेभ्योनमोविचिन्वत्केभ्योनमोविक्षिणत्केभ्योनमऽआनिर्हतेभ्यः॥१९॥ इति हृदि। ॐ नमो गणेभ्योगणपतिभ्यश्चवोनमोनमोव्रातेभ्योव्रातपतिभ्यश्चवोनमोनमोगृत्सेभ्योगृत्सपतिभ्यश्चवोनमोनमोविरूपेभ्योविश्व-रूपेभ्यश्चवोनमः॥२०॥ इति पृष्ठे। ॐ नमोहिरण्यबाहवेसेनान्येदिशाञ्चपतयेनमोनमोवृक्षेभ्योहरिकेशेभ्यःपशूनाम्पतये नमोनमःशष्पिञ्जरायत्विषीमतेपथीनाम्पतयेनमोनमो हरिकेशायोपवीतिनेपुष्टानाम्पतयेनमोनमोबभ्लुशाय॥२१॥ इति पार्श्वद्वये। ॐ विज्ज्यन्धनुःकपर्दिनोविशल्योबाणवाँऽउत। अनेशन्नस्ययाऽइषवऽआभुरस्यनिषङ्गधिः॥२२॥ इति जठरे। ॐ हिरण्यगर्भः समवर्त्तताग्रेभूतस्यजातःपतिरेकऽआसीत्। सदाधारपृथिवीन्द्यामुतेमाङ्कस्मैदेवायहविषा विधेम॥२३॥ इति नाभौ। ॐ मीढुष्टमशिवतमशिवोनःसुमनाभव। परमेवृक्षऽआयुधन्निधायकृत्तिम्वसानऽआचरपिनाकम्बिभ्रदा गहि॥२४॥ इति कट्याम्। ॐ येभूतानामधिपतयोविशिखासःकपर्द्दिनः। तेषाꣳसहस्रयोजनेवधन्वानि-तन्मसि॥२५॥ इति गुह्ये। ॐ जातवेदसेसुनवामसोममरातीयतोनिदहातिवेदः। सनःपर्षदतिदुर्गाणिविश्वानावेव-सिन्धुन्दुरितात्यग्निः॥२६॥ इति शिश्ने। ॐ तामग्निवर्णान्तपसाज्वलन्तींवैरोचनींकर्मफलेषुजुष्टाम्। दुर्गांदेवींशरण-महम्प्रपद्येसुतरसितरसेनमः सुतरसितरसे नमः॥१॥ अग्नेत्वंपारया०॥२॥ विश्वानिनोदुर्गहा०॥३॥ पृतनाजित०॥४॥ इति मन्त्रचतुष्टयरूपशिरसा सह॥ इति गुदे। ॐ मानोमहान्तमुतमानोऽअर्भकम्मानऽउक्षन्तमुतमानऽउक्षितम्। मानोवधीः-पितरम्मोतमातरम्मानःप्रियास्तन्वोरुद्ररीरिषः॥२७॥ इति ऊर्वोः। ॐ एषतेरुद्रभागः सहस्वस्राम्बिकयातंजुषस्व स्वाहैषतेरुद्रभागऽ आखुस्तेपशुः॥२८॥ इति जानुनोः। ॐ येपथाम्पथिरक्षयऐलबृदाऽआयुर्युधः। तेषाꣳसहस्रयो-जनेव धन्वानि तन्मसि॥२९॥ इति पादयोः। ॐ अध्यवोचदधिवक्ताप्रथमोदैव्योभिषक्। अहींश्चसर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्योधराचीःपरासुव॥३०॥ इति कवचे। ॐ नमोबिल्मिने च कवचिनेचनमोवर्मिणेचवरूथिनेचनमः। श्रुताय च श्रुतसेनायचनमोदुन्दुभ्यायचाहनन्यायचनमोधृष्णवे॥३१॥ इत्युपकवचम्॥ (कवचाद्विपरीतक्रममुप-कवचम्) ॐ नमोस्तुनीलग्रीवायसहस्राक्षायमीढुषे। अथोयेऽअस्यसत्त्वानोहन्तेभ्योकरन्नमः॥३२॥ इति तृतीयनेत्रे। ॐ प्रमुञ्चधन्वनस्त्वमुभयोरात्र्योर्ज्याम्। याश्चतेहस्तऽइषवः पराताभगवोवप॥३३॥ इत्यस्त्रम्। इति प्रथमो न्यासः। ॐ यऽएतावन्तश्चभूयाꣳसश्चदिशोरुद्रावितस्थिरे। तेषाꣳसहस्रयोजनेवधन्वानितन्मसि॥ इति दिग्बन्धः॥१॥

दशाक्षर मन्त्र—'ॐ नमो भगवते रुद्राय' यह दशाक्षर मन्त्र है। इसके लिये 'अस्य श्रीदशाक्षररुद्रमन्त्रस्य बौधायनऋषिः। पङ्क्तिश्छन्दः। रुद्रो देवता, ममाभीष्टसिद्ध्यर्थे जपे विनियोगः' कहकर विनियोग का जल छोड़े।

फिर मूल में लिखित 'ॐ याते रुद्र शिवा०' इत्यादि मन्त्र से शिखा में, 'ॐ अस्मिन् महत्यर्णवे०' से शिर में, 'ॐ सहस्राणि०' से ललाट में, 'ॐ हंसःशुचि०' से दोनों भौंहों के मध्य में, 'ॐ त्र्यम्बकं०' से दोनों नेत्रों में, 'ॐ नमः स्रुत्याय०' से दोनों कानों में, 'ॐ मानस्तोके०' से नासिका में, 'ॐ अवतत्य०' से मुख में, 'ॐ नीलाग्रीवा०' से कण्ठ में, 'ॐ नीलाग्रीवा०' इत्यादि मूलोक्त द्वितीय मन्त्र से उपकण्ठ में, 'ॐ नमस्त आयुध०' से दोनों स्कन्धों में, 'ॐ याते हेतिर्मीढुष्टम्०' से दोनों बाहुओं में, 'ॐ तीर्थानि०' से दोनों हाथों में, 'ॐ सद्योजातं प्रपद्यामि०' इत्यादि से दोनों अङ्गूठों में, 'ॐ वामदेवाय नमो०' से दोनों तर्जनियों में, 'ॐ अघोरेभ्यो०' से दोनों मध्यमा अङ्गुलियों में, 'ॐ तत्पुरुषाय विद्महे०' से दोनों अनामिकाओं में, 'ॐ ईशानः सर्वविद्यानां०' से दोनों कनिष्ठाओं

में, 'ॐ नमो वः किरिकेभ्यो०' से हृदय में, 'ॐ नमो गणेभ्यो गणपतिभ्यो०' से पृष्ठ में, 'ॐ नमो हिरण्यवाहवे०' से दोनों पार्श्वों (पसलियों) में, 'ॐ विज्यन्धनुः कपर्दिनो०' से जठर में, 'ॐ हिरण्यगर्भः समवर्त्तताग्रे०' से नाभि में, 'ॐ मीढुष्टम शिवतमो०' से कटि (कमर) में, 'ॐ ये भूतानामधिपतयो०' से गुह्य में, 'ॐ जातवेदसे सुनवाम०' से शिश्न (लिङ्ग) में न्यास करे। इसके पश्चात् 'ॐ तामग्निवर्णाम्०', 'ॐ अग्ने त्वं पारया०', 'ॐ विश्वानिनोदुर्गहा०' तथा 'ॐ पृतनाजित०' इन चार मन्त्रों से शिर के साथ गुद में न्यास करे। फिर 'ॐ मानो महान्तमुतमानो०' इत्यादि मन्त्र से दोनों ऊरुओं में, 'ॐ एषते रुद्रभाग०' से जानुओं में, 'ॐ ये पथापथि०' से दोनों पैरों में, 'ॐ नमो बिल्मिने कवचिने०' से उपकवच में, (कवच से विपरीत क्रम में उपकवच), 'ॐ नमोस्तु नीलग्रीवा०' से तृतीय नेत्र में, 'ॐ प्रमुञ्चधन्वनस्त्वमुभयो०' से अस्त्र में न्यास करे। यह प्रथम न्यास होता है। इसके बाद 'ॐ यऽएतावन्तश्च भूया०' इत्यादि मूलोक्त मन्त्र से दिग्बन्धन करे।

अथाक्षरन्यासः—ॐ नमः शिरसि॥ १॥ ॐ नं नमः नासिकायाम्॥ २॥ ॐ मों नमः ललाटे॥ ३॥ ॐ भं नमः मुखे॥ ४॥ ॐ गं नमः कण्ठे॥ ५॥ ॐ वं नमः हृदि॥ ६॥ ॐ तें नमः दक्षस्तने॥ ७॥ ॐ रुं नमः वामस्तने॥ ८॥ ॐ द्रां नमः नाभौ॥ ९॥ ॐ यं नमः पादयोः॥ १०॥ इति दशाङ्गन्यासो द्वितीयः॥ २॥

अक्षरन्यास—'ॐ ॐ नमः' से शिर में, 'ॐ नं नमः' से नाक में, 'ॐ मों नमः' से ललाट (माथे) में, 'ॐ भं नमः' से मुख में, 'ॐ गं नमः' से कण्ठ में, 'ॐ वं नमः' से हृदय में, 'ॐ तें नमः' से दाहिने स्तन या हाथ में, 'ॐ रुं नमः' से वामहस्त या स्तन में (इस स्थान पर ग्रन्थान्तरों में स्तने तथा हस्ते दोनों ही लिखे मिलते हैं), 'ॐ द्रां नमः' से नाभि में तथा 'ॐ यं नमः' से दोनों पैरों में न्यास करना चाहिये। इस प्रकार इस द्वितीय न्यास को दशाङ्ग न्यास कहते हैं।

ॐ सुद्योजातम्प्रपद्यामिसद्योजातायुवैनमोनमः। भुवेभवे नातिंभवेभवस्वुमाम्भुवोद्भवायुनमः॥१॥ इति पादयोर्न्यस्य। ॐ हंसोहंसेति ब्रूयात्। ॐ वामुदेवायुनमोंज्येष्ठायुनमः÷ श्रेष्ठायुनमोंरुद्रायुनमुः कालायुनमुः कलविकरणायनमोबलविकरणायुनमो बलायुनमोबलप्रमथायुनमुः सर्वभूतदमनायुनमोंमुनोन्मोनायुनमः॥२॥ इति ऊर्वोर्न्यस्य हंसोहंसेति ब्रूयात्। ॐ अुघोरेभ्योऽथघोरेभ्योघोरुघोरुतरेभ्युः सर्वेभ्युःसर्व्वशर्व्वेभ्योनमस्तेअस्तुरुद्र-रूपेभ्यः॥३॥ हृदि विन्यस्य हंसोहंसेति ब्रूयात्। ॐ तत्पुरुषायविद्महेमहादेवाय धीमहि। तन्नोंरुद्रःप्रचोदयात्॥४॥ मुखे विन्यस्य हंसोहंसेति ब्रूयात्। ॐ ईशानुःसर्वविद्यानामीश्वरःसर्वभूतानाम्। ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्माशिवोमें अस्तुसदाशिवोम्॥५॥ इति मूर्ध्नि विन्यस्य हंसोहंसेति ब्रूयात्। इति तृतीयो न्यासः। **एवं न्यासत्रयं कृत्वा सम्पुटं कुर्यात्।**

'ॐ सद्योजातं प्रपद्यामि०' इत्यादि मन्त्र से पादों में न्यास करके 'हंसो हंसो' कहे। फिर 'ॐ वामदेवाय०' मन्त्र से ऊरुओं का न्यास कर 'हंसो हंसो' कहे। फिर 'ॐ अघोरेभ्यो०' मन्त्र से हृदयन्यास करके 'हंसो हंसो' कहे। फिर 'ॐ तत्पुरुषाय विद्महे०' मन्त्र से मुखन्यास कर 'हंसो हंसो' ऐसा कहे। फिर 'ॐ ईशानः सर्वविद्यानां०' से मूर्धा का न्यास कर 'हंसो हंसो' कहे। इस प्रकार यह तीसरा न्यास है। तीनों न्यासों को सम्पन्न करके सम्पुट (कृताञ्जलिपुट) करना चाहिये।

तद्यथा कृताञ्जलिपुटः ॐ त्रातारुमिन्द्रमवितारुमिन्द्रर्ठ०हवेहवे सुहवुर्ठ०शूरुमिन्द्रम्। ह्वयामिशक्रम्पुरुहूतमिन्द्रर्ठ० स्वुस्तिनोंमुघवाधात्विन्द्रः÷॥ इति मन्त्रेण प्राच्यामिन्द्रं नमस्कुर्यात्॥१॥ ॐ त्वन्नोऽअग्नेवुरुणस्यव्विद्वान्देवस्युहेडोऽ अवयासिसीष्ठाः। यजिष्ठोवह्नितमुःशोशुचानोविश्वाद्वेषाꣳसिप्रमुमुग्ध्युस्मत्। इत्याग्नेय्यामग्निं प्रणमेत्॥२॥ ॐ सुगन्नुः पन्थाम्प्रदिशन्नऽएहिज्ज्योतिष्मध्येह्यजरन्नआयुः÷अपैतुमृत्युरुमृतम्मऽआगाद्वैवस्वुतोनोऽअभयंकृणोतु॥ इति दक्षिणस्यां यमं प्रणमेत्॥३॥ ॐ असुन्वन्तुमयजमानमिच्छस्तेनस्येत्यामन्विहितस्करस्य। अन्न्यमस्मदिच्छुसातऽइत्या-नमोदेवि-

निर्ऋतेतुभ्यमस्तु॥ इति नैर्ऋत्यां नैर्ऋतिं प्रणमेत्॥४॥ ॐ तत्त्वायामिब्रह्मणा व्वन्दमानस्तदाशास्ते-यजमानोहविर्भिः। अहेडमानोव्वरुणेहबोध्युरुशꣳसमानऽआयुःप्रमोषीः॥ इति पश्चिमायां वरुणं प्रणमेत्॥५॥ ॐ आनो-नियुद्भिःशतिनीभिरध्वरꣳसहस्रिणीभिरुपयाहियज्ञम्। व्वायोऽअस्मिन्त्सवनेमादयस्वयूयम्पातस्वस्तिभिःसदानः॥ इति वायव्यां वायुं प्रणमेत्॥६॥ ॐ वयꣳसोमव्रतेतवमनस्तनूषुबिभ्रतः। प्रजावन्तःसचेमहि॥ इति उदीच्यां कुबेरं प्रणमेत्॥७॥ ॐ तमीशानञ्जगतस्तस्थुषस्स्पतिंधियञ्जिन्वमवसेहूमहेवयम्। पूषानोयथावेदसामसद्वृधे-रक्षितापायुरदब्धःस्वस्तये॥ इति ईशान्याम् ईश्वरं प्रणमेत्॥८॥ ॐ अस्मेरुद्रामेहनापर्वतासोवृत्रहत्येभरहूतौ सजोषाः। यःशꣳसतेस्तुवतेधायि-पज्रऽइन्द्रज्येष्ठाऽअस्माँऽअवन्तु देवाः॥ इत्यूर्ध्वं ब्रह्माणं प्रणमेत्॥९॥ ॐ स्योना पृथिविनोभवानृक्षरानिवेशनी। यच्छानःशर्म्मसप्रथाः॥ इत्यधः पृथिवीं प्रणमेत्॥१०॥

एवं यः सम्पुटं कुर्य्यात् स स्यात् किल्बिषवर्जितः। तं दीप्यमानमीक्ष्यन्ते प्रेतचौराद्युपद्रवाः॥
न पराभवितुं शक्ताः पलायन्ते विदूरतः॥

एवं सम्पुटं कृत्वा चतुर्थं रक्षान्यासं कुर्यात्।

दशों दिशाओं में प्रणाम—१. 'ॐ त्रातारमिन्द्रः' इस मन्त्र से पूर्व दिशा के अधिपति इन्द्र को प्रणाम करे। २. 'ॐ त्वन्नो अग्ने०' इत्यादि मन्त्र से अग्निकोण के अधिपति अग्नि को अग्निकोण में प्रणाम करे। ३. 'ॐ सुगन्नपन्था०' इत्यादि ऋचा से दक्षिण में दिक्पाल यम को प्रणाम करे। ४. 'ॐ असुन्नवन्तं०' मन्त्र से नैर्ऋत्य कोण में उसके स्वामी निर्ऋति को प्रणाम करे। ५. फिर पश्चिम दिशा में उसके अधिपति वरुण को 'ॐ तत्त्वायामि ब्रह्मणा०' इत्यादि मन्त्र से प्रणाम करे। ६. फिर 'ॐ आनो नियुद्भिः०' इत्यादि ऋचा से वायुकोण में उसके अधिपति वायु को प्रणाम करे। ७. फिर 'ॐ वयं सोम०' इत्यादि ऋचा से उत्तर में उसके दिगीश सोम (कुबेर) को प्रणाम करे। ८. फिर ईशान कोण में 'ॐ तमीशानं जगतस्थुष०' इस ऋचा से उसके अधिपति ईश्वर (शिव) को प्रणाम करे। ९. फिर ईशान एवं पूर्व के मध्य में 'ॐ अस्मैरुद्रामेहना०' इत्यादि ऋचा से ब्रह्मा (ऊर्ध्व दिशा के स्वामी) को प्रणाम करे। १०. फिर सबसे अन्त में 'ॐ स्योनापृथिवीनो०' मन्त्र से नैर्ऋत्य तथा पश्चिम के बीच में अधः के स्वामी अनन्त को पृथ्वी में प्रणाम करना चाहिये। जो इस प्रकार सम्पुट (दिशाओं में) प्रणाम करता है, वह पापरहित हो जाता है। उसको प्रकाशित देखकर चोर, प्रेत आदि उपद्रव आँख उठाकर भी नहीं देखते हैं। उसे वे अपराजित जानकर दूर से ही भाग जाते हैं। इस प्रकार से सम्पुट (दिग्रक्षण) करके फिर चौथा न्यास (रक्षान्यास) करना चाहिये।

ॐ मनोजूतिर्ज्जुषतामाज्ज्यस्यबृहस्पतिर्य्यज्ञमिमन्तनोत्वरिष्टंय्यज्ञꣳसमिमन्दधातु। विश्वेदेवासऽइह-मादयन्तामो ३ म्प्रतिष्ठ॥१॥ इति गुह्ये। ॐ अबोध्यग्निःसमिधाजनानाम्प्रतिधेनुमिवायतीमुषासम्। जिह्वाऽइव-प्रवयामुज्जिहानाःप्रभानवःसिस्रतेनाकमच्छ॥२॥ इति जठरानले। ॐ मूर्द्धानन्दिवोऽअरतिम्पृथिव्यावैश्वानर-मृतऽआजातमग्निङ्कविꣳसम्राजमतिथिंजनानामासन्नापात्रंजनयन्तदेवाः॥३॥ इति हृदये। ॐ मर्म्माणितेवर्म्मणा च्छादयामिसोमस्त्वाराजामृतेनानुवस्ताम्। उरोर्व्वरीयोव्वरुणस्तेकृणोतुजयन्तन्त्वानुदेवामदन्तु॥४॥ इति मुखे। ॐ जातवेदायदिवापावकोसि वैश्वानरोयदिवावैद्युतोसिसम्प्रजाभ्योयजमानायलोकं ऊर्जम्पुष्टिं दददभ्यावव‍ृत्स्व॥१॥ ॐ विश्वतश्चक्षुरुतविश्वतोमुखोविश्वतोबाहुरुतविश्वतस्पात्। सम्बाहुभ्यांधमतिसम्पतत्रैर्द्यावाभूमीजनयन्देवऽएकः इति शिरसि॥५॥ इति चतुर्थो न्यासः।

फिर चतुर्थ न्यास (रक्षान्यास) इस प्रकार करे—'ॐ मनोजूति०' इस मूलोक्त मन्त्र से गुह्य में न्यास करे। फिर

'ॐ अबोध्यग्निः' इत्यादि ऋचा से जठराग्नि में न्यास करे (इस न्यास से जापक की भूख तथा पाचन शक्ति नहीं बिगड़ती है)। फिर 'ॐ मूर्धानं दिवो०' ऋचा से हृदय में न्यास करे। 'ॐ मर्माणिते०' इस ऋचा से मुख में न्यास करे। 'ॐ जातवेदाय दिवा पावकोसि०' तथा 'ॐ विश्वतश्चक्षु' इत्यादि दो ऋचाओं से शिर में न्यास करे।

अथ षडङ्गन्यासः पञ्चमः—ॐ यज्जाग्रत इत्यादिशिवसङ्कल्पान्ते ॐ हृदयाय नमः॥१॥ ॐ सहस्रशीर्षा पुरुष इत्यादिपुरुषसूक्तान्ते ॐ शिरसे स्वाहा॥२॥ ॐ अद्भ्यः संभूत इत्याद्युत्तरनारायणान्ते शिखायै वषट्॥ ३॥ ॐ आशुः शिशान इत्यप्रतिरथान्ते कवचाय हुम्॥ ४॥ ॐ विभ्राड्बृहदित्यादिसूक्तान्ते नेत्रत्रयाय वौषट्॥ ५॥ ॐ नमस्ते रुद्रमन्यव इत्यादिशतरुद्रियान्ते अस्त्राय फट्॥ ६॥ इति पञ्चमो न्यासः। **यज्जाग्रत इति षडर्चस्य शिवसङ्कल्प ऋषिस्त्रिष्टुपछन्दः मनो० हृदयन्यासे विनियोगः।**

'ॐ यज्जाग्रतो०' इत्यादि छः ऋचाओं के शिवसङ्कल्पसूत्र को पढ़कर हृदयाय नमः कहकर हृदयन्यास करे। 'ॐ सहस्रशीर्षा०' इत्यादि सोलह ऋचाओं के पूरे पुरुषसूक्त का पाठ करके 'ॐ शिरसे स्वाहा' कहे। फिर 'ॐ अद्भ्यः संभृतं०' इत्यादि पूरे नारायणसूक्त का पाठ कर 'शिखायै वषट्' कहे। फिर 'ॐ आशुः शिशानो०' इत्यादि पूरे अप्रतिरथसूक्त (सत्रह ऋचाएँ) पढ़कर 'ॐ कवचाय हुं' कहे। फिर 'ॐ विभ्राट् बृहत्०' इत्यादि ऋचा से आरम्भ करके पूरा सूर्यसूक्त पढ़कर 'नेत्रत्रयाय वौषट्' कहे। अन्त में 'नमस्ते रुद्रमन्यव०' से आरम्भ कर पूरे शतरुद्रियसूक्त को पढ़कर अन्त में 'अस्त्राय फट्' कहे। यह पाँचवें न्यास की विधि है।

'अस्य श्रीमज्जाग्रत इति षडर्चस्य शिवसङ्कल्प ऋषिः। त्रिष्टुप् छन्दः। मनो देवता। हृदयन्यासे विनियोगः' कहकर हृदयन्यास के विनियोग के लिये जल छोड़ना चाहिये। यह शिवसङ्कल्प सूक्त का विनियोग है। आगे शिवसङ्कल्पसूक्त, पुरुषसूक्त इत्यादि सभी सूक्त दिये जा रहे हैं।

शिवसङ्कल्पसूक्तम्

ॐ यज्जाग्रतोदूरमुदेतिदैवंतदुसुप्तस्यतथैवैतिदूरङ्गज्योतिषाञ्ज्योतिरेकंतन्मेमनःशिवसङ्कल्पमस्तु॥१॥ येनकर्म्माण्यपसोमनीषिणोयज्ञेकृण्वन्तिविदथेषुधीराः। यदपूर्वंयक्षमन्तःप्रजानान्तन्मेमनःशिवसङ्कल्पमस्तु॥२॥ यत्प्रज्ञानमुतचेतोधृतिश्चयज्ज्योतिरन्तरमृतम्प्रजासु। यस्मान्नऽऋतेकिञ्चनकर्म्मक्रियतेतन्मेमनःशिवसङ्कल्पमस्तु॥३॥ येनेदम्भूतम्भुवनम्भविष्यत्परिगृहीतममृतेनसर्व्वम्। येनयज्ञस्तायतेसप्तहोतातन्मेमनःशिवसङ्कल्पमस्तु॥४॥ यस्मिन्नृचःसामयजूꣳषियस्मिन्प्रतिष्ठितारथनाभाविवाराः। यस्मिँश्चित्तꣳसर्व्वमोतम्प्रजानान्तन्मेमनःशिवसङ्कल्पमस्तु॥५॥ सुषारथिरश्वानिवयन्मनुष्यान्नेनीयतेभीशुभिर्व्वाजिनऽइव। हृत्प्रतिष्ठंयदजिरञ्जविष्ठन्तन्मेमनःशिवसङ्कल्पमस्तु॥६॥ इति हृदयाय नमः॥१॥

शिवसंकल्प सूक्त—जो मानवीय मन जागृतावस्था तथा सुप्तावस्था दोनों में ही दूर तक गमन करता है, वह मन शुभ सङ्कल्प करने वाला बने। जिस मन से कर्मानुष्ठान में संलग्न मनीषीजन श्रेष्ठ कर्मों का सम्पादन करते हैं तथा विविध प्रकार के यज्ञों (द्रव्ययज्ञ, तपोयज्ञ, ज्ञानयज्ञ) आदि करते हैं तथा जो प्रत्येक प्राणी की देह में विद्यमान रहता है, वह मन शुभ सङ्कल्पों को करे। जो मन उत्कृष्ट ज्ञान की ज्योति के रूप में मार्गदर्शन करता है, वह मेरा मन शुभ सङ्कल्पों वाला हो। जिस अमरत्वयुक्त मन ने भूत, वर्तमान तथा भविष्यत् काल को परिगृहीत किया है तथा जिससे सप्त होता गुणों से यज्ञ का विस्तार होता है, वह अच्छे सङ्कल्पों को करने वाला हो। जिस मन में वैदिक ऋचाएँ प्रतिष्ठित हैं तथा जिसमें ऋचाएँ, साममन्त्र तथा यजुः इस प्रकार से स्थापित हैं जैसे रथ के पहिये की नाभि में अरे प्रतिष्ठित रहते हैं। जिस मन में मनुष्यों के सम्पूर्ण चित्तों का ज्ञान स्थित है, वह मन शुभ सङ्कल्पों से

युक्त हो। जिस प्रकार से अच्छा सारथी लगाम के नियन्त्रण द्वारा गतिमान् अश्वों को अपने गन्तव्य पथ पर इच्छित स्थान तक इधर-उधर होते हुए ले जाता है, उसी प्रकार यह मानव मन अपने लक्ष्य तक पहुँचता है तथा जरारहित अतिवेगशील मन इस हृदय (शिरोहृदय=मन) में विराजमान है, वह मन सदैव शिव सङ्कल्पवान् हो।

पुरुषसूक्तम्

ॐ सहस्रशीर्षेति षोडशर्चस्य पुरुषसूक्तस्य नारायणऋषिः आद्यानां पञ्चदशानामनुष्टुप् छन्दः यज्ञेनयज्ञमित्यस्य त्रिष्टुप् छन्दः जगद्बीजं पुरुषो देवता शिरोन्यासे विनियोगः। ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्। सभूमिꣳ सर्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम्॥१॥ पुरुषएवेदꣳ सर्वं यद्भूतं यच्च भाव्यम्। उतामृतत्वस्येशानो यदन्नेनातिरोहति॥२॥ एतावानस्यमहिमातो ज्यायाँश्च पूरुषः। पादोस्य विश्वा भूतानि त्रिपादस्यामृतन्दिवि॥३॥ त्रिपादूर्ध्वऽ उदैत्पुरुषः पादोस्येहाभवत्पुनः। ततो विष्वङ्व्यक्रामत्साशनानशने अभि॥४॥ ततो विराडजायत विराजोऽअधिपूरुषः। सजातोऽअत्यरिच्यतपश्चाद्भूमिमथोपुरः॥५॥ तस्माद्यज्ञात्सर्वहुतःसम्भृतम्पृषदाज्यम्। पशूँस्ताँश्चक्रे वायव्यानारण्याग्ग्राम्म्याश्चये॥६॥ तस्माद्यज्ञात्सर्वहुतऽऋचःसामानिजज्ञिरे। छन्दाꣳसि जज्ञिरे तस्माद्यजुस्तस्मादजायत॥७॥ तस्मादश्वाऽअजायन्तयेकेचोभयादतः। गावोहजज्ञिरेतस्मात्तस्माज्जाताऽअजावयः॥८॥ तंय्यज्ञम्बर्हिषिप्रौक्षन्पुरुषञ्जातमग्रतः। तेनदेवाऽअयजन्तसाद्ध्याऽऋषयश्चये॥९॥ यत्पुरुषंव्यदधुः कतिधाव्यकल्प्पयन्। मुखङ्किमस्स्यासीत्किम्बाहूकिमूरूपादाऽउच्च्येते॥१०॥ ब्राह्मणोस्यमुखमासीद्बाहूराजन्न्यःकृतः। ऊरूतदस्ययद्वैश्यःपद्भ्याꣳशूद्रोऽअजायत॥११॥ चन्द्रमामनसोजातश्चक्षोःसूर्य्योऽअजायत। श्रोत्राद्वायुश्चप्राणश्चमुखादग्निरजायत॥१२॥ नाभ्याऽआसीदन्तरिक्षꣳशीर्ष्णोद्यौःसमवर्त्तत। पद्भ्याम्भूमिर्दिशःश्रोत्रात्तथा लोकाँ२ऽअकल्पयन्॥१३॥ यत्पुरुषेणहविषादेवायज्ञमतन्वत। वसन्तोस्यासीदाज्यङ्ग्रीष्मऽइध्मःशरद्धविः॥१४॥ सप्तास्यासन्परिधयस्त्रिः सप्तसमिधःकृताः। देवायद्यज्ञन्तन्वानाऽअबध्नन्पुरुषम्पशुम्॥१५॥ यज्ञेनयज्ञमयजन्त देवास्तानिधर्म्माणिप्रथमान्यासन्। तेहनाकम्महिमानःसचन्तयत्रपूर्वेसाद्ध्याःसन्ति देवाः॥१६॥ इति शिरसे स्वाहा॥२॥

पुरुषसूक्त—इस सहस्रशीर्षा० इत्यादि पुरुषसूक्त के नारायण ऋषि हैं। प्रारम्भ की पन्द्रह ऋचाएँ अनुष्टुप् छन्दों में हैं तथा अन्तिम ऋचा 'यज्ञेन यज्ञमयजन्त देवा' का त्रिष्टुप् छन्द है। जगद् बीज है तथा पुरुष देवता है। इसका विनियोग शिरोन्यास में किया जाता है।

जिनके सहस्रों शिर, सहस्रों नेत्र, सहस्रों पैर हैं, वे विराट् पुरुष इस दस अङ्गुलरूप पृथ्वी को व्याप्त कर उसके बाहर भी स्थित हैं। जो भूतकाल में था, वर्तमान में है तथा भविष्य में भी रहेगा—ऐसा शाश्वत यह पुरुष है। इस अजस्र प्रवहमान जगत् का वही पुरुष स्वामी है। जो जीव अन्न के द्वारा पोषित तथा जीवित रहते हैं, उनका भी यह स्वामी है। इस विराट् पुरुष की महिमा बहुत बड़ी है। इसके एक चरण में ही इस विश्व के सभी प्राणी स्थित हैं तथा शेष तीन चरणों से यह अन्तरिक्ष को आवृत्त किये है। चार चरणों वाले इस विराट् पुरुष के तीन भाग द्युलोक में हैं। इसका एक चरण इस विश्व में पुनः पुनः उत्पन्न होता रहता है। फिर इसने अन्न खाने वाले तथा न खाने वाले विश्व को सब ओर से व्याप्त कर लिया है। उसी विराट् पुरुष से यह ब्रह्माण्ड उत्पन्न हुआ तथा उसी से सभी जीव उत्पन्न हुए हैं। वही देहधारी रूप में सर्वश्रेष्ठ हुआ, जिसने प्रथम भूमि को, फिर सृष्टि को रचा। उस सर्वश्रेष्ठ यज्ञपुरुष से दधियुक्त घृत की प्राप्ति हुई। पशु, वायव्य प्राणी (नभचर) तथा वन्य जीव उत्पन्न हुए। उस विराट् यज्ञपुरुष से ऋचाएँ तथा साम गान प्रकट हुए तथा उसी से छन्द (अथर्ववेद) तथा 'यजुः' प्राप्त हुए। उसी से दोनों ओर दाँत वाले अश्व उत्पन्न हुए तथा गाएँ, भेड़ें, बकरियाँ आदि पशु भी उत्पन्न हुए। मन्त्रद्रष्टा ऋषियों ने उस

पूजनीय यज्ञपुरुष को अभिषिक्त करके यज्ञ को प्राप्त किया और वे यजन कर्म करने लगे। यहाँ पर वर्णित उस पुरुष की कितने प्रकार से कल्पना की गई है ? इसका मुख क्या है ? इसके बाहु कौन हैं ? इसकी ऊरू कौन-सी है ? तथा पैर कौन-से हैं ? यह किस प्रकार बताए गए हैं ? इस विराट् पुरुष का मुख ब्राह्मण, क्षत्रिय बाहु, वैश्य जङ्घा तथा शूद्र चरण हैं। विराट् पुरुष के मन से चन्द्रमा उत्पन्न हुआ है। उसके नेत्रों से सूर्य उत्पन्न हुआ है। उसके कानों से वायु तथा प्राण एवं मुख से अग्नि उत्पन्न हुए। उसकी नाभि से अन्तरिक्ष तथा शिर से द्युलोक उत्पन्न हुआ है। पैरों से भूमि तथा कानों से दिशाओं का प्राकट्य हुआ है तथा लोक भी उसी से उत्पन्न है। जब देवताओं ने उस विराट् पुरुष को हवि मानकर यज्ञारम्भ किया तब उस यज्ञ के घृत से वसन्त ऋतु, समिधा से ग्रीष्म एवं शरद् से हवि हुआ। देवों ने जिस यज्ञ का विस्तार किया, उसमें पुरुषरूपी पशु को बाँधा (नियुक्त किया), उसी से यज्ञ की सात परिधियाँ (सात समुद्र) तथा इक्कीस (छन्द) समिधाएँ हुईं। उस यज्ञपुरुष से देवों ने यज्ञ करना प्रारम्भ किया और श्रेष्ठ धर्मकृत्य का प्रतिपादन किया। यज्ञीय कार्य करने वाले श्रेष्ठ मनुष्य पूर्वकाल के साध्य देवताओं के निवास (स्वर्गलोक) को प्राप्त करते हैं।

उत्तरनारायणसूक्तम्

अद्भ्यः सम्भृतं इति षड्ऋचस्योत्तरनारायणस्य नारायण ऋषिः आद्यानां तिसृणां त्रिष्टुप् छन्दश्चतुर्थ-पञ्चमयोरनुष्टुप् छन्दः आदित्यो देवता शिखान्यासे विनियोगः। अद्भ्यऽसम्भृतऽपृथिव्यैरसाच्चव्विश्वकर्म्मणः-समवर्त्तताग्ग्रे। तस्स्यत्वष्टाव्विदधद्रूपमेतितन्मर्त्यस्यदेवत्वमाजानमग्ग्रे॥१७॥ व्वेदाहमे तम्पुरुषम्महान्तमादित्य-वर्णन्तमसः परस्तात्। तमेवव्विदित्वातिमृत्युमेतिनान्न्यऽपन्थाव्विद्यतेयनाय॥१८॥ प्प्रजापतिश्च्चरतिगर्ब्भेऽअन्तर-जायमानोबहुधाव्विजायते। तस्ययोनिम्परिपश्यन्तिधीरास्तस्मिन्हतस्त्थुर्भुवनानिव्विश्वा॥१९॥ योदेवेभ्भ्यऽआतपति-योदेवानाम्पुरोहितः। पूर्व्वोयोदेवेभ्योजातोनमोरुचायब्राह्मये॥२०॥ रुचम्ब्राह्मञ्जनयन्तोदेवाऽअग्ग्रे तदब्रुवन्। यस्त्वैवम्ब्राह्मणोव्विद्यात्तस्यदेवाऽअसन्वशे॥२१॥ ॐ श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्या-त्तम्। इष्णन्निषाणामुम्मऽइषाणसर्व्वलोकम्मऽइषाण॥२२॥ इति शिखायै वषट्॥३॥

उत्तरनारायण सूक्त—मूल में लिखित विनियोग पढ़कर उसका जल पृथ्वी पर छोड़कर तब मूल सूक्त का पाठ करना प्रारम्भ करना चाहिये।

प्रारम्भ में जो सभी कर्मों (विश्वकर्म) को करने वाला ईश्वर है, उसके कर्म से पृथिवी के ऊपर स्थित जल-रूप रस से यह सब विश्व पोषण को प्राप्त हुआ है। त्वष्टा (विश्वनिर्माता) विश्व को रूपाकार देते हुए आगे बढ़ता है। मर्त्यलोक के मनुष्य को देवत्व भी वही प्रदान करता है—यह मैं जानता हूँ। मैंने उस सूर्य के समान वर्ण वाले प्रकाशमान् महान् पुरुष को जान लिया है। उसको जानकर उसकी उपासना करने वाला साधक मृत्यु को जीत लेता है (जन्म-मरण से रहित हो जाता है)। वह पुरुष अन्धकार से परे है। मुक्ति-प्राप्ति के लिये अन्य कोई मार्ग नहीं है (उस पुरुष को जान लेना ही एकमात्र उपाय है)। जो प्रजा का स्वामी (ईश्वर) सभी प्राणियों के गर्भ (सब पदार्थों के भीतर) विचरण करता है, वह अजन्मा होकर भी अनेक प्रकार से उत्पन्न होता है। उसके मूल स्वरूप को ज्ञानी लोग जानते हैं, उसी में सभी लोक स्थित हैं। जो सभी देवों को प्रकाशित करने वाला (तपाने वाला) तथा सबका अग्रगामी है, जो सभी देवों से पूर्व उत्पन्न हुआ है, उस ब्रह्मतेज को प्रणाम है। ब्रह्मज्ञान को प्रकाशित करने वाले देवों ने प्रारम्भ में ही यह कहा था कि 'जो ज्ञानी इस बात को जानता है, उसके वश में सभी देवता (इन्द्रियाँ) हो जाती हैं।' हे परमात्मन्! सम्पत्ति (श्री) तथा शोभा (लक्ष्मी) तेरी पत्नियाँ हैं तथा दोनों भुजाएँ या पार्श्व अहोरात्र हैं।

नक्षत्र तेरा रूप है, द्युलोक तथा पृथिवी तेरा खुला मुख है। मैंने सोचा कि मैं किसकी इच्छा करूँ? मुझे सभी लोक प्राप्त हों (यह इच्छा करता हूँ)।

अप्रतिरथसूक्तम्

आशुःशिशान इति सप्तदशानामप्रतिरथऋषिस्त्रिष्टुप् छन्दः इन्द्रो देवता कवचन्यासे विनियोगः। ॐ आशुःशिशानोवृषभोनभीमोघनाघनऽक्षोभणश्चर्षणीनाम्। सङ्क्रन्दनोनिमिषऽएकव्वीरः शतꣳसेनाऽअजयत्साकमिन्द्रः॥१॥ सङ्क्रन्दनेनानिमिषेण जिष्णुनायुत्कारेणदुश्च्यवनेनधृष्णुना। तदिन्द्रेणजयततत्सहद्ध्वंय्युधोनरऽइषुहस्तेनव्वृष्णा॥२॥ सऽइषुहस्तैःसनिषङ्गिभिर्व्वशीसꣳस्रष्टासयुधऽइन्द्रोगणेन सꣳसृष्टजित्सोमपाबाहुशर्द्ध्युग्रधन्वाप्रतिहिताभिरस्ता॥३॥ ब्बृहस्पतेपरिदीयारथेनरक्षोहामित्राँ२ऽअपबाधमानः। प्प्रभञ्जन्त्सेनाःप्प्रमृणोयुधाजयन्नस्माकमेद्ध्यवितारथानाम्॥४॥ बलविज्ञायस्स्थविरःप्प्रवीरःसहस्वान्वाजीसहमानऽउग्रः। अभिवीरोऽअभिसत्त्वासहोजाजैत्रमिन्द्ररथमातिष्ठगोवित्॥५॥ गोत्रभिदङ्गोविदंव्वज्रबाहुञ्जयन्तमज्ज्मप्प्रमृणन्तमोजसा। इमꣳसजाताऽअनुवीरयद्ध्वमिन्द्रꣳसखायोऽअनुसꣳरभद्ध्वम्॥६॥ अभिगोत्राणिसहसागाहमानोदयोव्वीरःशतमन्न्युरिन्द्रः। दुश्च्यवनःपृतनाषाडयुद्ध्योस्माकꣳसेनाऽअवतुप्प्रयुत्सु॥७॥ इन्द्रआसान्नेताबृहस्पतिर्दक्षिणायज्ञःपुरऽएतुसोमः। देवसेनानामभिभञ्जतीनाञ्जयन्तीनाम्मरुतोयन्त्वग्रम्॥८॥ इन्द्रस्यव्वृष्णोव्वरुणस्यराज्ञऽआदित्यानाम्मरुताꣳशर्द्धऽउग्रम्। महामनसाम्भुवनच्च्यवानाङ्घोषो देवानाञ्जयतामुदस्थात्॥९॥ उद्धर्षयमघवन्नायुधान्युत्सत्त्वनाम्मामकानाम्मनाꣳसि। उद्वृत्रहन्वाजिनांव्वाजिनान्युद्रथानाञ्जयतांय्यन्तुघोषाः॥१०॥ अस्माकमिन्द्रःसमृतेषुद्ध्वजेष्वस्माकंय्याऽइषवस्ताजयन्तु। अस्माकंव्वीराऽउत्तरेभवन्त्वस्माँ२ऽउदेवाऽअवताहवेषु॥११॥ अमीषाञ्चित्तम्प्रतिलोभयन्तीगृहाणाङ्गान्यप्प्वेपरेहि। अभिप्प्रेहिनिर्दहहृत्सुशोकैरन्धेनामित्रास्तमसासचन्ताम्॥१२॥ अवसृष्टापरापतशरव्येब्रह्मसꣳशिते। गच्छामित्रान्प्रपद्यस्वमामीषाङ्कञ्चनोच्छिषः॥१३॥ प्प्रेताजयतानरऽइन्द्रोवःशर्म्म-यच्छतु। उग्राव्वःसन्तुबाहवोनाधृष्ष्यायथासथ॥१४॥ असौयासेनामरुतःपरेषामभ्येतिनऽओजसास्पर्द्धमाना। ताङ्गूहततमसापव्रतेनयथामीऽअन्न्योऽअन्न्यन्नजानन्॥१५॥ यत्रबाणाःसम्पतन्तिकुमाराविशिखाऽइव। तन्नऽइन्द्रोबृहस्पतिरदितिःशर्म्मयच्छतुव्विश्वाहाशर्म्मयच्छतु॥१६॥ मर्म्माणितेव्वर्म्मणाच्छादयामि सोमस्त्वाराजामृतेनानुवस्ताम्। उरोर्व्वरीयोव्वरुणस्तेकृणोतुजयन्तन्त्वानुदेवामदन्तु॥१७॥ इति कवचाय हुम्॥४॥

अप्रतिरथसूक्त—सर्वप्रथम 'आशुःशिशान इति सप्तदशानमप्रतिरथ ऋषिः त्रिष्टुप्छन्दः इन्द्रो देवता कवचन्यासे विनियोगः' कहकर कवचन्यास के लिये विनियोग का जल छोड़ना चाहिये।

जो इन्द्र शीघ्रकारी तीक्ष्ण शस्त्रों वाला, वृषभ के समान क्रुद्ध होकर घनाघन (दनादन) शत्रुओं का क्षोभण करने वाला, सेनाओं को कम्पित करने वाला, अनिमिष वह अद्वितीय वीर सैकड़ों शत्रुओं को पराजित करता है। हे वीरों! आप लोग अपलक अपने सङ्क्रन्दन के द्वारा शत्रुओं को त्रस्त करने वाले, विविध आक्रामक मुद्राओं से युद्ध में लगने वाले, बाणधारी, अजेय इन्द्र के साथ संलग्न होकर शत्रुओं को पराजित करो। (क्योंकि) वे इन्द्र शत्रुओं को वश में करने वाले बाण तथा खड्गधारी वीरों को सैन्यदल में सम्यक् व्यवस्थित करते हुए सङ्ग्राम में शत्रुओं से युद्ध करके विजयी होने वाले हैं, हम सबकी रक्षा करें। हे बृहस्पते! आप राक्षसों का विनाश करने वाले, रथ द्वारा सर्वत्र भ्रमणकर्ता, शत्रुसेना को भङ्ग करने वाले हैं। वे हमारे प्रमृण (आतङ्कवादी) शत्रुओं को नष्ट करें। हे इन्द्र! आप शस्त्रादि बल के निपुण प्रयोजक, अनुभवी, अतिक्रूर, विजयप्रद बल से युक्त, वेगवान् उग्र, सब ओर से योद्धाओं से घिरे हुए, बली लोगों की सङ्गति से युक्त, अपने बल के लिये प्रसिद्ध विजेता हो; अतः आप युद्ध के लिये अपने रथ पर चढ़ो। हे एक समान जन्मधारी देवों! आप शत्रुविनाशक, वज्रबाहु, विजेता, अपने ओज से

शत्रुओं को नष्ट करने वाले इन्द्र को युद्ध के लिये उत्साहित कीजिये। जो अपने बल से शत्रुप्रदेशों को (उनके अभिगोत्रों = किलों) को तोड़ने वाले इन्द्रदेव हैं, वे युद्ध में हमारी सेना को संरक्षित करें। शत्रुओं के अहङ्कार को ध्वस्त करके विजयी होने वाली देवसेनाओं का नेतृत्व इन्द्र तथा बृहस्पति मिलकर करते हैं तथा इस प्रकार की सेना के पीछे मरुद्गण भी (विजयप्राप्ति के लिये) चलें। फिर सोम शान्ति स्थापित करें। युद्ध के प्राङ्गण में अविचलित मन से शत्रुसेना को दलन करने में समर्थ देवों, आदित्यों, मरुद्गणों, वरुण तथा इच्छानुसार वृष्टि करने वाले इन्द्र की सेना का जयघोष गूँज रहा है। हे ऐश्वर्ययुक्त इन्द्र! आप अपने हथियारों को भली-भाँति तीक्ष्ण करके देवसेना के वीरों का उत्साह बढ़ायें तथा अश्वों की भाँति उन्हें युद्धार्थ शीघ्रगमन के लिये प्रेरित करें। हे शत्रुमर्दक इन्द्र! विजयी रथों के जयनिनाद सब दिशाओं में गूँजें। युद्ध में जब रथों पर ध्वजाएँ फहराने लगें तब इन्द्र तथा हमारे शस्त्र भरपूर क्षमता के साथ उत्तेजित होकर शत्रुसेना पर निर्णायक प्रहार कर विजयी हों तथा हमारी विजयी वीर सेना देवों द्वारा सुरक्षित रहे। हे अध्वे (सिंहवाहिनी सेना)! तू अपनी भयङ्करता से शत्रु की सेना के अङ्गों को छिन्न-भिन्नकर दूर फेंक दे, जिससे वे मोह-शोक के अन्धकार में डूब जायँ। हे मन्त्र से तीक्ष्ण किये शस्त्रों! आप हमारे द्वारा छोड़ने पर शत्रुसेना पर एक साथ प्रहार करके उसे सन्तप्त करें। अनेक शरीरों में प्रविष्ट होकर सभी का विनाश करें, किसी शत्रु को जीवित न छोड़ें। हे वीरों! आप लोग शत्रुसेना पर तीव्रता से आक्रमण कर विजयी हों। आपके नेता इन्द्र आपको विजयसुख प्रदान करें; आपके शस्त्रादि का बल बढ़ें। हे मरुद्गणों! यह सामने से शत्रुवाहिनी अपने मद में चूर होकर हमारी ओर बढ़ रही है; उस सेना को अन्धकार से ढँक दें कि वे आपस में ही एक-दूसरे को न पहिचानते हुए भ्रमित होकर लड़कर मर जायँ। जिस युद्ध में हमारे योद्धाओं के प्रहार इधर-उधर होते हैं, उसमें बृहस्पति, अदिति तथा इन्द्र हमारा कल्याण करें। वीर लोग अपने शरीर के मर्माङ्गों को आहत होने से बचाने के लिये कवच से आच्छादित करते हैं; अतः इन कवचों को वरुण सुदृढ़ता दें तथा राजा सोम अमृत से वीरों को पुष्ट करें, जिससे देव विजयी हों।

विभ्राट्(सूर्य)सूक्तम्

**विभ्राडिति सप्तदशानां विभ्राट् ऋषिर्जगती छन्दः सूर्यो देवता नेत्रन्यासे विनियोगः॥ ॐ व्विभ्राड्वृहत्पिबतु-
सोम्म्यम्मद्ध्वयुर्द्दधद्यज्ञपतावविह्रुतम्। वातजूतोयोऽअभिरक्षतित्मनाप्प्रजाः पुपोष पुरुधाव्विराजति॥१॥ उदुत्यञ्जात-
वेदसन्देवंवुहन्तिकेतवः। दृशेव्विश्श्वायसूर्य्यम्॥२॥ येनापावकचक्षसाभुरण्यन्तञ्जनाँ२ अनु। त्वंव्वरुणपश्श्यसि॥३॥
देव्यावद्ध्वर्य्यूऽआगतठं॰रथेनसूर्य्यत्त्वचा। मद्ध्वायज्ञठं॰समञ्जाथे। तम्प्रत्क्नथायंवेनश्चित्रन्देवानाम्॥४॥ तम्प्रत्क्न-
थापूर्व्वथाव्विश्श्वथेमथाज्ज्येष्ठतातिम्बर्हिषदठंस्वर्व्विदम्। प्रतीचीनंवृजनन्दोहसेधुनिमाशुञ्जयन्तमनुयासुवर्द्धसे॥५॥ अयं-
व्वेनश्चोदयत्पृश्निगर्भाज्ज्योतिर्ज्जरायूरजसोव्विमाने। इममपाठंसंगमेसूर्य्यस्यशिशुन्नविप्प्रामतिभीरिहन्ति॥६॥ चित्रन्दे-
वानामुदगादनीकञ्चक्षुर्म्मित्रस्यव्वरुणास्याग्ग्नेः॥ आप्प्राद्यावापृथिवीऽअन्तरिक्षठं॰सूर्य्यऽआत्माजगतस्त्थुषश्श्च॥७॥
आनऽइडाभिर्व्विदथेसुशस्तिव्विश्श्वानरः सवितादेवऽएतु। अपियथायुवानोमत्सथानोव्विश्श्वञ्जगदभिपित्वेमनीषा॥८॥ यद-
द्यकच्चवृत्रहन्नुदगाऽअभिसूर्य्य। सर्व्वन्तदिन्द्रतेवशे॥९॥ तरणिर्व्विश्श्वदर्शतोज्ज्योतिष्कृदसिसूर्य्य। व्विश्श्वमाभासि-
रोचनम्॥१०॥ तत्सूर्य्यस्यदेवत्वन्तन्महित्वम्मद्ध्याकर्त्तोर्व्विततठं॰सञ्जभार। यदेदयुक्तहरितः सधस्त्थादाद्रात्रीव्वासस्त-
नुतेसिमस्मै॥११॥ तन्मित्रस्यव्वरुणस्याभिचक्षेसूर्य्योरूपङ्कृणुतेद्योरुपस्थे। अनन्तमन्न्यद्द्रुशदस्यपाजः कृष्णमन्न्य-
द्धरितः सम्भरन्ति॥१२॥ बण्णमहाँ२ऽअसिसूर्य्यबडादित्यमहाँ२ऽअसि। महस्तेसतोमहिमापनस्यतेद्धादेवमहाँ२ऽअसि॥१३॥
बट्सूर्य्यश्श्रवसामहाँ२ऽअसिसत्रादेवमहाँ२ऽअसि। मह्नादेवानामसुर्य्यः पुरोहितोव्विभुज्ज्योतिरदाभ्यम्॥१४॥ श्रायन्तऽ-
इवसूर्य्यंविश्श्वेदिन्द्रस्यभक्षत। वसूनिजातेजनमानऽओजसाप्प्रतिभागन्नदीधिम॥१५॥ अद्यादेवाऽउदितासूर्य्यस्य निरठं॰-**

इवसूर्य्यंविश्वेदिन्द्रस्यभक्षत। वसूनिजातेजनमानऽओजसाप्प्रतिभागन्नदीधिम॥१५॥ अद्यादेवाऽउदितासूर्य्यस्य निरꣳ-हसःपिपृतानिरवद्यात्। तन्नोमित्रोवरुणोमामहन्तामदितिःसिन्धुःपृथिवीऽउतद्यौः॥१६॥ आकृष्णेनरजसावर्त्तमानो-निवेशयन्नमृतम्मर्त्यञ्च। हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन्॥१७॥ इति नेत्रत्रयाय वौषट्॥५॥

विभ्राट् सूक्त—सर्वप्रथम विनियोग-हेतु 'विभ्राडिति सप्तदशानां विभ्राड्ऋषिः जगतीछन्दः सूर्यो देवता नेत्रन्यासे विनियोगः' कहकर जल छोड़े।

जो वायुवेग से युक्त, विशेष दीप्तिमान्, पूर्ण ऐश्वर्यशाली, पूर्णायु वाला, यज्ञपति को धारण कर पुष्ट करने वाला तथा अपनी शक्ति से प्रजाओं की सर्वतोभावेन रक्षा करने वाला है, उसी की भाँति तुम भी सोमादि मधुर औषधियों के रस का पान करो। विश्व को दृश्यमान बनाने के लिये उस वेदज्ञ, सबके प्रकाशक, दिव्य गुण-सम्पन्न ईश्वर के अस्तित्व की सिद्धि के लिये किरणें ऊपर की ओर उठती हैं। हे वरुण! आप सबके पापों (दुःखों) के निवारक हैं; हे पवित्र करने वाले पावक! जिस प्रकाश से सबमें पालक (ईश्वर) के तुम दर्शन करते हो, उसी प्रकार से तुम सभी मनुष्यों को देखो। हे दिव्य अध्वर्यू अश्विनी कुमारों! आप सूर्य के समान चमकीले रथ में बैठकर यहाँ आओ और मधुर हवि से सम्यक् रूप से यज्ञ को सम्पन्न करो, जिससे उस प्राचीन यज्ञ की भाँति यह हमारा यज्ञ भी कान्तिमान् तथा दिव्य तेज से समन्वित हो। उस इन्द्र की प्राचीन लोग तथा हमारे पूर्वज एवं आज के लोग स्तुति करते रहे हैं, उसी प्रकार उन स्तुतियों से हे इन्द्र! तू भी बढ़कर प्रसन्न होता है, इसीलिये तुम श्रेष्ठ की स्तुति मैं भी अपने शत्रुओं को जीतने के लिये करता हूँ। परम तेजस्वी देव अन्तरिक्ष से जल को प्रेरित कर वर्षा के रूप में पृथ्वी पर लाते हैं। जलरूप में प्राप्त उस वस्तु को पुत्रजन्म की भाँति सुखद मानकर मनीषी लोग विविध स्तुतियों से सूर्यदेव की वन्दना करते हैं। हे सोमदेव! मर्क नामक असुर के विनाश के लिये आपको नियमानुसार ग्रहण किया गया है। मित्र, वरुण, अग्नि आदि जो कि देवताओं के नेत्ररूप हैं एवं सूर्यदेव अपनी दिव्य किरणों से इस पृथ्वी, द्युलोक तथा अन्तरिक्ष को जगमगाते हैं। उन्हीं देव के लिये यह आहुति समर्पित है। हम सब प्राणियों के हितैषी सविता देव! आप हमारे उत्तम अन्नों से युक्त यज्ञशाला में पधारें। हे सदैव चैतन्यशील देव! आप यहाँ तृप्त होकर सम्पूर्ण जगत् को बुद्धि प्रदान कर तृप्त करें। सूर्य जिस प्रकार अन्धकार को नष्ट करता है, उसी प्रकार से शत्रुओं को नष्ट करने वाले हे इन्द्र! आप जहाँ-कहीं भी उदित होते हैं, वे सब स्थल आपके अधिकार में आ जाते हैं। सूर्यदेव की यह दिव्यता तथा महिमा अत्यन्त व्यापक है, जो संसार के मध्य स्थित होकर विस्तीर्ण नक्षत्रमण्डल का निर्माण तथा समाप्ति करने वाली है। जब वे सूर्यदेव अपनी लाल एवं हरी किरणों को आकाश से समेट कर अपने भीतर धारण करते हैं तब रात्रि इस ब्रह्माण्ड के ऊपर गहन अन्धकार डाल देती है। हे सूर्यदेव! आप संसार को तारने वाले, संसार के दर्शन-योग्य तथा तेजोत्पादक हैं; आप अपनी आभा से संसार को रोचित करते हैं। द्युलोक के गोद में स्थित सूर्यदेव मित्र तथा वरुण का वह रूप प्रकट करते हैं, जिससे वे सब लोगों को सब ओर से देखते हैं। वे शुद्ध, चैतन्य तथा निर्गुण हैं; किन्तु अन्य प्रकार से वे सगुण रूप में प्रकट होते हैं, जिसे सब दिशाएँ धारण करती हैं। हे सूर्यदेव! आप महानतम हैं। हे आदित्य! आपकी महानता से वे सब आपकी स्तुति करते हैं। आप निश्चित महान् हैं। आप धन-सम्पत्ति को प्रकट करने वाले होकर महान् हैं। आप प्राणी-हितैषी, देवों में अग्रगण्य, सर्वव्यापी, अविनाशी, तेजस्वी तथा यज्ञकर्ता हैं। सूर्यप्रकाश से विस्तृत किरणें समस्त भौतिक वस्तुओं को भोगती हैं, उसी भाँति हम सभी भावी पीढ़ियों के लिये सूर्य के तेज को धारण करे। हे देवों! आज के इस सूर्योदय की दिव्य किरणें हमें पापों से बचायें, अपयश से बचायें तथा वरुण, समुद्र, पृथ्वी तथा द्युलोक हमारे मनोरथों को पूरा करे। सविता देव उषःकाल की किरणों के रथ पर सवार होकर अन्तरिक्ष में भ्रमण करते हुए देवों एवं मानवों को कर्म में प्रवृत्त करते हैं। वे समस्त लोकों का निरीक्षण करते हैं॥ १-१७॥

अस्य शतरुद्रियस्याघोर ऋषिः। रुद्रो देवता नमस्तऽइति गायत्रीछन्दो यात इति तिसृणामनुष्टुप् छन्दोऽअध्यवोचदिति तिसृणां पङ्क्तिश्छन्दो नमोस्त्वित्यादि सप्तानामनुष्टुप्छन्दो मान इति द्वयोः कुत्स ऋषिर्जगतीच्छन्द एकरुद्रो देवता नमोहिरण्यबाहव इत्यादीनि यजूꣳषि एकरुद्रो देवता द्रापेऽअन्धसऽइत्युपरिष्टाद्बृहती छन्द इमारुद्रायेति जगतीछन्दो यात इत्यनुष्टुप् छन्दः परिणोमीढुष्टम इति त्रिष्टुप् छन्दो व्विकिरिद्रव्विलोहितसहस्राणिसहस्रश इत्यनुष्टुप् छन्दोऽङ्क असङ्ख्यातेस्यादिदशानामनुष्टुप्छन्दो बहुरुद्रो देवता नमोऽस्त्वित्यादि त्रीणि यजूꣳषि बहुरुद्रदैवत्यानि व्वयꣳसोमेति गायत्रीछन्द एषते इति यजुरवरुद्रमिति पङ्क्तिश्छन्दो भेषजमिति ककुप् छन्दस्त्र्यम्बकमिति द्वे अनुष्टुभावे-तत्तइत्यास्तारपङ्क्तिश्छन्दस्त्र्यायुषमित्युष्णिक् छन्दः। शिवोनामेतियजुर्न्नतँव्विदेति द्वे त्रिष्टुभौ अस्त्रन्यासे विनियोगः। ॐ नमस्तेरुद्रमन्न्यवऽउतोतऽइषवेनमः बाहुब्भ्यामुततेनमः॥१॥ यातेरुद्रशिवातनूरघोरापापकाशिनी। तयानस्तन्न्वा-शन्तमयागिरिशन्ताभिचाकशीहि॥२॥ यामिषुङ्गिरिशन्तहस्तेबिभर्ष्यस्तवे। शिवाङ्गिरित्रताङ्कुरुमाहिꣳसीःपुरुषञ्ज-गत्॥३॥ शिवेनव्वचसात्वागिरिशाच्छाव्वदामसि। यथानःसर्व्वमिज्जगदयक्ष्मꣳसुमनाऽअसत्॥४॥ अद्ध्यवोच-दधिवक्ताप्प्रथमोदैव्व्योभिषक्। अहीꣳश्चसर्व्वाञ्जम्भयन्त्सर्व्वाश्चयातुधान्न्योधराचीः परासुव॥५॥ असौयस्ताम्म्रोऽ-अरुणऽउतबब्भ्रुः सुमङ्गलः। येचैनꣳरुद्राऽअभितोदिक्षुश्रिताःसहस्रशो वैषाꣳहेडऽईमहे॥६॥ असौयोवसर्प्पतिनील-ग्रीवोव्विलोहितः। उतैनङ्गोपाऽअदृश्रन्नदृश्रन्नुदहार्य्यः सदृष्टोमृडयातिनः॥७॥ नमोस्तुनीलग्रीवायसहस्राक्षायमीढुषे। अथोयेऽअस्यसत्त्वानोहन्तेभ्योकरन्नमः॥८॥ प्रमुञ्चधन्वनस्त्वमुभयोरार्त्त्न्योर्ज्ज्याम्। याश्चतेहस्तऽइषवःपराताभग-वोव्वप॥९॥ विज्ज्यन्धनुः कपर्दिनोव्विशल्ल्योबाणवाँऽउत। अनेशन्नस्ययाऽइषवऽआभुरस्यनिषङ्गधिः॥१०॥ याते-हेतिर्म्मीढुष्टमहस्तेबभूवतेधनुः। तयास्मान्विश्वतस्त्वमयक्ष्मयापरिभुज॥११॥ परितेधन्न्वनोहेतिरस्म्मान्वृणक्तुव्विश्वतः। अथोयऽइषुधिस्तवारेऽअस्म्मन्निधेहितम्॥१२॥ अवतत्त्यधनुष्ट्वꣳसहस्राक्षशतेषुधे। निशीर्य्यशल्ल्यानाम्मुखाशिवोनः सुमनाभव॥१३॥ नमस्तऽआयुधायानातताय धृष्णवे। उभाब्भ्यामुततेनमोबाहुब्भ्यान्तवधन्न्वने॥१४॥ मानोमहान्तमुतमा-नोऽअर्ब्भकम्मानऽउक्षन्तमुतमानऽउक्षितम्। मानोव्वधीःपितरम्मोतमातरम्मानः प्प्रियास्तन्न्वोरुद्ररीरिषः॥१५॥ मानस्तो-केतनयेमानऽआयुषिमानोगोषुमानोऽअश्वेषुरीरिषः। मानोव्वीरान्रुद्रभामिनोव्वधीर्हविष्मन्तःसदमित्त्वाहवामहे॥१६॥ इत्यादि षट्षष्टि ६६ मन्त्रान् पठित्वा ॐ वयꣳसोम०॥६७॥ एषते रुद्र०॥६८॥ अवरुद्रमदी०॥६९॥ भेषज-मसि०॥७०॥ त्र्यम्बकं यजामहे०॥७१॥ एतत्तेरुद्रावसन्तेन०॥७२॥ त्र्यायुषंजमदग्ने०॥७३॥ शिवोनामासि०॥७४॥ नमस्तेरुद्रमन्यव इत्यादि पुनःषोडश मन्त्रान्॥९०॥ (पुनः) एषतेरुद्रभाग०॥९१॥ अवरुद्द्रमदी०॥९२॥ नमस्ते रुद्र०॥९३॥ याते रुद्र०॥९४॥ नतंविदाथयऽइमा०॥९५॥ विश्वकर्माह्यनिष्ट०॥९६॥ मीढुष्टमशिवतम०॥९७॥ विकिरिद्रव्विलोहित०॥९८॥ सहस्राणिसहस्रशो०॥९९॥ असङ्ख्याता०॥१००॥ इत्यस्त्राय फट्॥६॥ एतच्छतरुद्रियं वदन्ति।

शतरुद्रिय सूक्त—इस शतरुद्रिय के अघोर ऋषि, रुद्रदेवता नमस्ते० इस मन्त्र से गायत्री छन्द है। 'यातेरुद्र०' इत्यादि तीन मन्त्रों में अनुष्टुप् छन्द है। 'अध्यवोचद्०' इत्यादि तीन मन्त्रों में पङ्क्ति छन्द है। नमः इत्यादि सात में अनुष्टुप् छन्द है। फिर 'मानोमहान्त०' इत्यादि दो मन्त्रों के कुत्स ऋषि, जगती छन्द एकरुद्र देवता हैं। फिर 'नमो हिरण्यबाहवे०' इत्यादि के एकरुद्र देवता हैं। 'द्रापेऽअन्धस०' इत्यादि से ऊपर बृहती छन्द है। 'इमारुद्राय०' इसमें जगती च्छन्द, यात० इत्यादि में अनुष्टुप् छन्द है। परिणोमीढुष्टम् में त्रिष्टुप् छन्द है। 'विकिरद्रविलोहित-सहस्राणिसहस्राक्ष०' इसमें अनुष्टुप् छन्द, 'असङ्ख्याता रुद्रा०' इन दश मन्त्रों में अनुष्टुप् छन्द 'बहुरुद्रदेवता, नमोस्तु०' इत्यादि तीन यजुओं में बहुरुद्र देवता हैं। 'वयꣳ सोम०' इत्यादि में गायत्री छन्द है। 'एषते०' इस यजु में तथा अवरुद्र० इत्यादि में पङ्क्ति छन्द है। 'भेषजमसि०' इत्यादि में 'ककुप्' छन्द है। त्र्यम्बकं इत्यादि दो मन्त्रों में

अनुष्टुप् छन्द, अवेतत्त इत्यादि में तारपङ्क्ति छन्द, त्र्यायुषं० में उष्णिक् छन्द, शिवोनामा० इत्यादि यजु में तथा 'नतं विदा०' इस यजु में त्रिष्टुप् छन्द है। इसका अस्त्रन्यास में विनियोग किया जाता है।

तदनन्तर 'नमस्ते रुद्र०' इत्यादि ६६ मन्त्रों को पढ़कर 'ॐ वयं ७ सोम०, एषते रुद्र, अवरुद्रमदी०, भेषजमसि, त्र्यम्बकं यजामहे, एतत्ते रुद्रावसन्तेन०, त्र्यायुषं जमदग्ने, शिवो नामासि,' यहाँ तक ७४ मन्त्र हो जाते हैं। पुनः 'नमस्तेरुद्रमन्यव०' इत्यादि सोलह मन्त्रों को पढ़े तो ७४+१६=९० सङ्ख्या हो जाती है। पुनः एषते रुद्रभागा, अवरुद्रमदी०, नमस्तेरुद्र०, यातेरुद्र०, न तं विदाथय ऽइमा०, विश्वकर्माह्यनिष्ट०, मीढुष्टम शिवतम०, 'विकिरिद्रविलोहितः०', सहस्राणि सहस्रशो, असङ्ख्याता०— इन एक सौ मन्त्रों का पाठ कर 'अस्त्राय फट्' कहना (करना) चाहिये। इसको शतरुद्रिय कहते हैं।

> अग्निदाहात्सुरापानादकृत्याचरणात्तथा। सुवर्णहरणाच्चैव वृषलीगमनात्तथा॥ १॥
> ब्रह्महत्यादिकात् पापाच्छतरुद्रियपाठतः। सुनिस्तीर्यैव गच्छन्ति ब्राह्मणाः शिवसन्निधौ॥ २॥

एवं पञ्चन्यासं कृत्वा साष्टाङ्गं प्रणम्य अष्टभिर्मन्त्रैर्नमस्कारं कुर्य्यात्॥ ॐ हिरण्यगुर्भ९समवर्त्ताग्रेभूतस्यजातः पतिरेकऽआसीत्। सदाधारपृथिवींद्यामुतेमाङ्कस्मैदेवायहुविषाविधेम॥१॥ यःप्राणुतोनिमिषुतोमहित्वैकइद्राजाजगतो- बुभूव। यईशेअुस्यद्विपदुश्चतुष्पदुःकस्मैदेवाय हुविषाविधेम॥२॥ ॐ ब्रह्मयज्ञानम्प्रथमम्पुरस्ताद्विसीमुतःसुरुचो- व्वेनऽआवः। सबुध्नयाऽउपुमाऽअस्यव्विष्ठाःसुतश्च योनिमसतश्चव्विवः॥३॥ मुहीद्यौःपृथिवीचनऽइमंयुज्ञम्मिमिक्षताम्। पिपृतान्नोभरीमभिः॥४॥ उपश्वासयपृथिवीमुतद्यांपुरुत्रातेमरुतांविष्टितंजगत्। संदुंदुभेसुजूरिंद्रेणदेवैर्दूराद्दवीयोअपसेध- शत्रून्॥५॥ अग्नेनय सुपथा रायेअुस्मान् विश्वानिदेववयुनानिविद्वान्। युयोध्युस्मज्जुहुराणमेनोभूयिष्ठांतेनम- उक्तिंविधेम॥६॥ यातेअग्नेयुज्ञियातुनूस्तयेह्यारोहात्मानम्। अच्छावसूनिकृण्वन्नस्मैनर्यापुरूणियज्ञोभूत्वायज्ञमासीद- स्वांयोनिंजातवेदोबभूवआजायमानः सक्षयुएहि॥७॥ अथावः स्वाहाग्रयेदाशेमपरीलाभिर्घृतवद्भिश्चहव्यैः तेभिर्नोअग्ने अमृतैर्महोभिः श्रितम्पूर्भिरायसीभिर्निपाहि॥ ८॥ इत्यष्टावृचो जपित्वा अथाऽत्मानं रुद्ररूपं ध्यायेत्। अथ ध्यानम्—

> **कैलासाचलसन्निभं त्रिनयनं पञ्चास्यमम्बायुतं नीलग्रीवमहीशभूषणधरं व्याघ्रत्वचा प्रावृतम्।**
> **अक्षस्रग्वरकुण्डिकाभयकरं चान्द्रीं कलां विभ्रतं गङ्गाम्भोविलसज्जटे दशभुजं वन्दे महेशं परम्॥ १॥**

इति ध्यात्वा मानसोपचारैर्देवं सम्पूज्य यथाशक्ति मूलमन्त्रं जपेत्। जपान्ते पुनराचमनं प्राणायामं च विधाय जलं गृहीत्वा स्ववामभागे देवदक्षिणकरे ॐ गुह्यातिगुह्येति मन्त्रेण जपसमर्पणं कुर्य्यात्। इत्यभेदोपासनम्। यदि तु भेदेनोपासीत तदानीन्तनं पूजाविधि साङ्गं सोपचारं ब्रूते। तत्रैवं क्रमस्तावत् यन्त्रोद्धारस्तत्पूजा च।

शतरुद्रिय के पाठ की फलश्रुति—अग्निदाह, सुरापान, कृत्याचरण, सुवर्ण की चोरी, वृषलीगमन तथा ब्रह्महत्या इत्यादि पाप शतरुद्रिय के पाठ करने से नष्ट हो जाते हैं तथा पाठकर्ता ब्राह्मण पार होकर शिवजी के समीप पहुँच जाता है।


इस प्रकार पञ्चन्यास करके साष्टाङ्ग प्रणाम करके आठ मन्त्रों से जो आगे कहे गये हैं ('ॐ हिरण्यगर्भ०' से लेकर 'अथावः स्वाहाग्ने' इत्यादि तक), पाठ करके नमस्कार करे। फिर स्वयं का रुद्ररूप में ध्यान करे। 'कैलासाचलसन्निभं त्रिनयनं ---------- महेशं परम्।' यह ध्यान का मन्त्र है। ध्यान के उपरान्त मानसोपचार से शिव का पूजन कर यथाशक्ति मूल मन्त्र को जप कर जप के अन्त में आचमन, प्राणायाम करके हाथ में जल लेकर देवता के दक्षिण हस्त में 'गुह्यातिगुह्यगोप्ता त्वं०' इत्यादि मन्त्र से जप का समर्पण करे। यह अभेदोपासना है।

यदि भेदोपासना करनी हो तो तदानीन्तन पूजाविधि साङ्ग सोपचारपूर्वक कहता हूँ। वहीं पर क्रमशः यन्त्रोद्धार तथा उसकी पूजा कही जा रही है।


रुद्रपीठम्

प्रणम्य जगतामीशमुमादेहार्द्धधारिणम्। यन्त्रोद्धारमहं वक्ष्ये रुद्रकल्पानुसारतः॥ १॥
मध्ये वृत्तं समालिख्य तन्मध्ये च दशाक्षरम्। बहिरष्टदलं पद्मं ततः षोडशपत्रकम्॥ २॥
चतुर्विंशतिपत्राढ्यं द्वात्रिंशत्पत्रकं तथा। चत्वारिंशत्पत्रकं तु वृत्तं सूर्यसमप्रभम्॥ ३॥
पञ्चपद्मात्मकं वृत्तं चतुरस्रं च भूगृहम्। सत्त्वं रजस्तमश्चेति त्रिगुणैः परितो वृतम्॥ ४॥
चतुर्द्वारं द्वारदेशे बहिर्नागसमावृतम्। रुद्रपीठमिति ख्यातं देवतास्तत्र विन्यसेत्॥ ५॥
चत्वारिंशच्छतं चैकं देवतानामुदाहृतम्। कर्णिकामध्यदेशे तु रुद्रं पञ्चास्यमालिखेत्॥ ॥

श्रीरुद्रयन्त्रम्



श्रीरुद्रयन्त्रम् (स्कान्दे)



रुद्रयन्त्र का उद्धार—उमा को अर्धाङ्ग में धारण करने वाले जगदीश को प्रणाम करके मैं रुद्रकल्प नामक ग्रन्थ के अनुसार रुद्रयन्त्र (रुद्रपीठ) के उद्धार (निर्माण विधि) का वर्णन करता हूँ। मध्य में एक वृत्त बनाकर उसके मध्य में दशाक्षर मन्त्र लिखे। फिर उस वृत्त के बाहर अष्टदल कमल बनाये। उसके बाहर षोडश पत्र कमल बनाये। फिर उसके बाहर चौबीस दल का कमल बनाये। फिर उसके बाहर बत्तीस दल का कमल बनाये। पुनः उसके बाहर चालीस पत्रात्मक कमल का निर्माण करे। इस प्रकार से सूर्य के समान कान्तिमान पाँच कमलयुक्त वृत्त बनाने के पश्चात् फिर उसके बाहर चौकोर भूगृह बनाये और उसके चारो ओर सत्त्व (श्वेत), रज (लाल) तथा तम (कृष्णवर्ण) का घेरा निर्मित करे। भूगृह में चारो (मुख्य) दिशाओं में चार द्वारों का निर्माण करे। प्रत्येक द्वार पर बाहर नागों का निर्माण करे। इसे रुद्रपीठ कहते हैं। इस रुद्रपीठ में देवताओं का न्यास करना चाहिये। इस रुद्रपीठ में चार सौ एक देवता होते हैं, जिनका स्थापन तथा पूजन करना चाहिये। कर्णिका के मध्य में पञ्चमुख शिव को बनाना चाहिये।

अथ पीठपूजा—तत्रादौ स्वे स्वे स्थाने मण्डूकादिपरतत्त्वान्तपीठदेवताः पूर्ववदावाह्य ॐ मण्डूकादिपरतत्त्वान्तपीठदेवताभ्यो नमः इति गन्धपुष्पैः सम्पूज्य पूर्वादिषु ॐ वामायै नमः॥ १ ॥ ॐ ज्यैष्ठायै नमः ॥ २ ॥ ॐ रौद्र्यै नमः ॥ ३ ॥ ॐ काल्यै नमः ॥ ४ ॥ ॐ कलविकरिण्यै नमः ॥ ५ ॥ ॐ बलविकरिण्यै नमः ॥ ६ ॥ ॐ बलप्रमथिन्यै नमः ॥ ७ ॥ ॐ सर्वभूतदमन्यै नमः ॥ ८ ॥ पीठमध्ये 'ॐ मनोमन्यै नमः' इति पीठशक्ती पूजयेत्। ततः पुष्पाण्यञ्जलिना गृहीत्वा 'ॐ नमो

भगवते सकलगुणात्मशक्तियुक्तायाऽनन्ताय योगपीठात्मने नमः' इति मन्त्रेण पीठोपरि पुष्पाञ्जलिनासनं दद्यात्। ततः पीठमध्ये ॐ महीद्यौरित्यादिमन्त्रैः पूर्ववत्ताम्रकलशं संस्थाप्य ॐ तत्त्वायामीति वरुणमावाह्य, ॐ अपाम्पतिवरुणाय नमः इति षोडशोपचारैः सम्पूज्य, कलशस्य मुखे विष्णुरित्यभिमन्त्र्य देवदानवसंवादे इत्यादि प्रार्थयेत्। ततः कलशोपरि पट्टवस्त्रं प्रसार्य तत्र गन्धेन रुद्रयन्त्रं विलिख्य तन्मध्ये पलस्वर्णनिर्मितां रुद्रप्रतिमां अग्न्युत्तारणपूर्वकं मूलेन संस्थाप्य, प्राणप्रतिष्ठां कृत्वा, आवाहनादिपुष्पान्तैरुपचारैस्तत्तत्पूर्वोक्तैर्मन्त्रैः सम्पूज्य आवरणपूजां कुर्य्यात्। तद्यथा मध्ये—'ॐ नमो भगवते रुद्राय' इति सम्पूज्य तत्र पश्चिमादिचतुर्दिक्षु क्रमेण ॐ सद्योजाताय नमः ॥ १ ॥ ॐ वामदेवाय नमः ॥ २ ॥ ॐ अघोराय नमः ॥ ३ ॥ ॐ तत्पुरुषाय नमः ॥ ४ ॥ मध्ये—ॐ ईशानाय नमः ॥ ५ ॥ इति पूजयेत्। ततः अष्टारेषु पश्चिमत आरभ्य प्रदक्षिणक्रमेण ॐ नन्दिने नमः ॥ १ ॥ ॐ महाकालाय नमः ॥ २ ॥ ॐ गणेश्वराय नमः ॥ ३ ॥ ॐ वृषभाय नमः ॥ ४ ॥ ॐ भृङ्गिरिटये नमः ॥ ५ ॥ ॐ स्कन्दाय नमः ॥ ६ ॥ ॐ उमायै नमः ॥ ७ ॥ ॐ चण्डीश्वराय नमः ॥ ८ ॥ इति प्रथमावरणम् ॥ १ ॥ ततः षोडशदले तेनैव क्रमेण ॐ अनन्ताय नमः ॥ १ ॥ ॐ सूक्ष्माय नमः ॥ २ ॥ ॐ शिवाय नमः ॥ ३ ॥ ॐ एकपदे नमः ॥ ४ ॥ ॐ एकरुद्राय नमः ॥ ५ ॥ ॐ त्रिमूर्तये नमः ॥ ६ ॥ ॐ श्रीकण्ठाय नमः ॥ ७ ॥ ॐ वामदेवाय नमः ॥ ८ ॥ ॐ ज्येष्ठाय नमः ॥ ९ ॥ ॐ श्रेष्ठाय नमः ॥ १० ॥ ॐ रुद्राय नमः ॥ ११ ॥ ॐ कालाय नमः ॥ १२ ॥ ॐ कलविकरणाय नमः ॥ १३ ॥ ॐ बलाय नमः ॥ १४ ॥ ॐ बलविकरणाय नमः ॥ १५ ॥ ॐ बलप्रमथनाय नमः ॥ १६ ॥ इति द्वितीयावरणे पूजयेत् ॥ २ ॥ ततश्चतुर्विंशतिदले तेनैव क्रमेण ॐ अणिमायै नमः ॥ १ ॥ ॐ महिमायै नमः ॥ २ ॥ ॐ लघिमायै नमः ॥ ३ ॥ ॐ गरिमायै नमः ॥ ४ ॥ ॐ प्राप्त्यै नमः ॥ ५ ॥ ॐ प्राकाम्यायै नमः ॥ ६ ॥ ॐ ईशितायै नमः ॥ ७ ॥ ॐ वशितायै नमः ॥ ८ ॥ ॐ ब्राह्म्यै नमः ॥ ९ ॥ ॐ माहेश्वर्य्यै नमः ॥ १० ॥ ॐ कौमार्य्यै नमः ॥ ११ ॥ ॐ वैष्णव्यै नमः ॥ १२ ॥ ॐ वाराह्यै नमः ॥ १३ ॥ ॐ इन्द्राण्यै नमः ॥ १४ ॥ ॐ चामुण्डायै नमः ॥ १५ ॥ ॐ चण्डिकायै नमः ॥ १६ ॥ ॐ असिताङ्गभैरवाय नमः ॥ १७ ॥ ॐ रुरुभैरवाय नमः ॥ १८ ॥ ॐ चण्डभैरवाय नमः ॥ १९ ॥ ॐ क्रोधभैरवाय नमः ॥ २० ॥ ॐ उन्मत्तभैरवाय नमः ॥ २१ ॥ ॐ कालभैरवाय नमः ॥ २२ ॥ ॐ भीषणभैरवाय नमः ॥ २३ ॥ ॐ संहारभैरवाय नमः ॥ २४ ॥ इति तृतीयावरणे पूजयेत् ॥ ३ ॥ ततो द्वात्रिंशत्पत्रके तेनैव क्रमेण ॐ भवाय नमः ॥ १ ॥ ॐ शर्वाय नमः ॥ २ ॥ ॐ ईशानाय नमः ॥ ३ ॥ ॐ पशुपतये नमः ॥ ४ ॥ ॐ रुद्राय नमः ॥ ५ ॥ ॐ उग्राय नमः ॥ ६ ॥ ॐ भीमाय नमः ॥ ७ ॥ ॐ महादेवाय नमः ॥ ८ ॥ ॐ अनन्ताय नमः ॥ ९ ॥ ॐ वासुकये नमः ॥ १० ॥ ॐ तक्षकाय नमः ॥ ११ ॥ ॐ कुलीरकाय नमः ॥ १२ ॥ ॐ कर्कोटकाय नमः ॥ १३ ॥ ॐ शङ्खपालाय नमः ॥ १४ ॥ ॐ कम्बलाय नमः ॥ १५ ॥ ॐ अश्वतराय नमः ॥ १६ ॥ 'इमे नागा अष्टौ' ॐ वैन्याय नमः ॥ १७ ॥ ॐ पृथवे नमः ॥ १८ ॥ ॐ हैहयाय नमः ॥ १९ ॥ ॐ अर्जुनाय नमः ॥ २० ॥ ॐ शाकुन्तलेयाय नमः ॥ २१ ॥ ॐ भरताय नमः ॥ २२ ॥ ॐ नलाय नमः ॥ २३ ॥ ॐ रामाय नमः ॥ २४ ॥ 'इति नृपाष्टकम्' ॐ हिमवते नमः ॥ २५ ॥ ॐ निषधाय नमः ॥ २६ ॥ ॐ विन्ध्याय नमः ॥ २७ ॥ ॐ माल्यवते नमः ॥ २८ ॥ ॐ पारियात्राय नमः ॥ २९ ॥ ॐ मलयाय नमः ॥ ३० ॥ ॐ हेमकूटाय नमः ॥ ३१ ॥ ॐ गन्धमादनाय नमः ॥ ३२ ॥ 'इति गिर्य्यष्टकम्' इति चतुर्थावरणम् ॥ ४ ॥ ततश्चत्वारिंशद्दले तेनैव क्रमेण ॐ इन्द्राय नमः ॥ १ ॥ ॐ अग्नये नमः ॥ २ ॥ ॐ ईशानाय नमः ॥ ३ ॥ ॐ निर्ऋतये नमः ॥ ४ ॥ ॐ वरुणाय नमः ॥ ५ ॥ ॐ वायवे नमः ॥ ६ ॥ ॐ कुबेराय नमः ॥ ७ ॥ ॐ ईशानाय नमः ॥ ८ ॥ ॐ शच्यै नमः ॥ ९ ॥ ॐ स्वाहायै नमः ॥ १० ॥ ॐ वाराह्यै नमः ॥ ११ ॥ ॐ खड्गिण्यै नमः ॥ १२ ॥ ॐ वारुण्यै नमः ॥ १३ ॥ ॐ वायव्यै नमः ॥ १४ ॥ ॐ कौवेर्य्यै नमः ॥ १५ ॥ ॐ ईशान्यै नमः ॥ १६ ॥ ॐ वज्राय नमः ॥ १७ ॥ ॐ शक्तये नमः ॥ १८ ॥ ॐ दण्डाय नमः ॥ १९ ॥ ॐ खड्गाय नमः ॥ २० ॥ ॐ पाशाय नमः ॥ २१ ॥ ॐ अङ्कुशाय नमः ॥ २२ ॥ ॐ गदायै नमः ॥ २३ ॥ ॐ त्रिशूलाय नमः ॥ २४ ॥ ॐ ऐरावताय नमः ॥ २५ ॥ ॐ मेषाय नमः ॥ २६ ॥ ॐ महिषाय नमः ॥ २७ ॥ ॐ प्रेताय नमः ॥ २८ ॥ ॐ मकराय नमः ॥ २९ ॥ ॐ हरिणाय नमः ॥ ३० ॥ ॐ नराय नमः ॥ ३१ ॥ ॐ वृषभाय नमः ॥ ३२ ॥ ॐ ऐरावताय नमः ॥ ३३ ॥ ॐ पुण्डरीकाय नमः ॥ ३४ ॥ ॐ वामनाय नमः ॥ ३५ ॥ ॐ कुमुदाय नमः ॥ ३६ ॥ ॐ अञ्जनाय नमः ॥ ३७ ॥ ॐ पुष्पदन्ताय नमः ॥ ३८ ॥ ॐ सार्वभौमाय नमः ॥ ३९ ॥

ॐ सुप्रतीकाय नमः ॥ ४० ॥ इति पञ्चमावरणम् ॥ ५ ॥ **ततो भूपुरे पूर्वादिक्रमेण पुनः ॐ इन्द्राय नमः ॥ १ ॥ ॐ अग्नये नमः ॥ २ ॥ ॐ यमाय नमः ॥ ३ ॥ ॐ निर्ऋतये नमः ॥ ४ ॥ ॐ वरुणाय नमः ॥ ५ ॥ ॐ वायवे नमः ॥ ६ ॥ ॐ कुबेराय नमः ॥ ७ ॥ ॐ ईशानाय नमः ॥ ८ ॥ (ईशानपूर्वयोर्मध्ये) ॐ ब्रह्मणे नमः ॥ ९ ॥ (निर्ऋतिपश्चिमयोर्मध्ये) ॐ अनन्ताय नमः ॥ १० ॥** इति षष्ठावरणे पूजयेत्। **ततो भूपुरस्य बाह्ये आग्नेयादिषु 'आग्नेय्याम्' ॐ विरूपाक्षाय नमः ॥ १ ॥ 'नैर्ऋत्याम्' ॐ विरूपाय नमः ॥ २ ॥ 'वायव्याम्' ॐ पशुपतये नमः ॥ ३ ॥ 'ईशान्याम्' ॐ ऊर्ध्वलिङ्गाय नमः ॥ ४ ॥ पुनः भूपुराद्बहिः पूर्वादिदिक्षु क्रमेण 'पूर्वे' ॐ विप्रवर्णाय श्वेतरूपाय सहस्रफणमण्डिताय शेषाय नमः ॥ १ ॥ 'आग्नेय्याम्' ॐ वैश्यवर्णाय नीलरूपाय पञ्चाशत्फणाय उत्तुङ्गकायाय तक्षकाय नमः ॥ २ ॥ 'दक्षिणस्याम्' ॐ विप्रवर्णाय कुङ्कुमरूपाय सहस्रफणमण्डिताय अनन्ताय नमः ॥ ३ ॥ 'नैर्ऋत्याम्' ॐ क्षत्रियवर्णाय पीतरूपाय सप्तशतफणमण्डिताय उत्तुङ्गकायाय वासुकये नमः ॥ ४ ॥ 'पश्चिमायाम्' ॐ क्षत्रियवर्णाय पीतरूपाय सप्तशतफणाय शङ्खपालाय नमः ॥ ५ ॥ 'वायव्याम्' ॐ वैश्यवर्णाय कृष्णरूपाय पञ्चशत्फणाय उत्तुङ्गाय महापद्माय नमः ॥ ६ ॥ 'उत्तरस्याम्' ॐ शूद्रवर्णाय कृष्णारूपाय त्रिंशत्फणमण्डिताय कम्बलाय नमः ॥ ७ ॥ 'ईशान्याम्' ॐ शूद्रवर्णाय श्वेतरूपाय त्रिंशत्फणयुक्ताय कर्कोटकाय नमः ॥ ८ ॥ इति पूजयेत् ॥** इति सप्तमावरणम्।

रुद्रपीठ की पूजा-विधि—प्रारम्भ में अपने-अपने स्थानों पर मण्डूकादि परतत्त्वान्त पीठदेवताओं को पूर्ववत् आवाहित करके 'ॐ मण्डूकादिपरतत्त्वान्तदेवताभ्यो नमः' कहकर गन्ध-पुष्पादि से पूजित करे। पीठशक्तियों की पूजा फिर पूर्वादि दिशाओं में तथा मध्य में मूल में लिखित 'ॐ वामायै नमः' इत्यादि ९ मन्त्रों से करनी चाहिये। फिर पुष्पाञ्जलि लेकर 'ॐ नमो भगवते सकलगुणात्मशक्तियुक्तायानन्ताय योगपीठात्मने नमः' इस मन्त्र से पीठ के ऊपर पुष्पाञ्जलि द्वारा आसन प्रदान करना चाहिये।

कलश-स्थापन—फिर रुद्रपीठ के मध्य में 'ॐ महीद्यौः०' इत्यादि मन्त्रों के द्वारा पूर्व की भाँति ताम्रकलश को स्थापित करके 'ॐ तत्त्वायामि ब्रह्मणा०' इस मन्त्र से उसमें वरुणदेव का आवाहन कर 'ॐ अपाम्पतिवरुणाय नमः' इस मन्त्र के द्वारा षोडशोपचार पूजन कर 'कलशस्य मुखे विष्णुः' इत्यादि श्लोकों के द्वारा कलश की प्रार्थना करे। फिर कलश के ऊपर रेशमी वस्त्र अथवा श्रेष्ठ वस्त्र पर गन्ध से रुद्रयन्त्र लिखकर ओढ़ा दे। यन्त्र के बीच में एक पल भार की सोने की रुद्रमूर्ति बनवाकर रखे। मूर्ति का पहिले अग्न्युत्तारण कर लेना चाहिये। फिर पूजन आरम्भ करे।

मध्यपूजन—यन्त्र के मध्य में 'ॐ नमो भगवते रुद्राय' से पूजन करे। फिर पश्चिमादि चारो दिशाओं में 'ॐ सद्योजाताय नमः' इत्यादि दोनों मन्त्रों से पूजन करे।

आवरण पूजा—फिर मूल में लिखित 'ॐ नन्दिने नमः' इत्यादि आठ मन्त्रों से पश्चिम से लेकर प्रदक्षिणक्रम से प्रथम आवरण में पूजा करे। फिर षोडश दल कमल में पश्चिमादि क्रम से 'ॐ अनन्ताय नमः' इत्यादि मूल में लिखित १६ मन्त्रों से द्वितीयावरण की पूजा करे। फिर चौबीस दल वाले कमल में पश्चिमादि क्रम से 'ॐ अणिमायै नमः' इत्यादि २४ मन्त्रों से तृतीयावण की पूजा करे। फिर बत्तीस दल वाले कमल में 'ॐ भवाय नमः' इत्यादि ३२ मन्त्रों से चतुर्थावरण में पूजन करे। फिर पाँचवें आवरण में चालीस दलों वाले कमल में पश्चिम से लेकर क्रमशः 'ॐ इन्द्राय नमः' इत्यादि ४० मन्त्रों से पूजन करे। फिर षष्ठावरण में भूपुर में पूर्वादि क्रम से 'ॐ इन्द्राय नमः' इत्यादि दश मन्त्रों से दश दिक्पालों का पूजन करे। फिर भूपुर के बाह्य भाग में आग्नेयादि आठों दिशाओं में प्रदक्षिणक्रम से मूल में लिखित 'ॐ विरूपाक्षाय नमः' इत्यादि ८ मन्त्रों से सप्तमावरण की पूजा करे।

विमर्श—यहाँ पर दो प्रकार के रुद्रयन्त्र दिये हैं, जिनमें एक स्कन्दपुराण के अनुसार तथा दूसरा रुद्रकल्प के अनुसार है। ये दोनों चित्र ग्रन्थकार पं० चतुर्थीलाल गौड द्वारा निर्मित हैं; अतः जिस यन्त्र में पञ्चमुख रुद्र मध्य में विराजमान हैं, उसमें दिये अनुसार पूजित करे। यन्त्र में क्रमशः पूजन के मन्त्र भी लिखित हैं।

रुद्रस्तवः

एवमावरणपूजां कृत्वा 'ॐ नमो भगवते रुद्राय' इति मूलान्ते धूपदीपनैवेद्याचमनीयताम्बूलदक्षिणानीराजन-त्रिःप्रदक्षिणादिभिः श्रीरुद्रं सम्पूज्य दशाक्षरेण पुष्पाञ्जलिं दत्त्वा छत्रचामरपरिमलपुष्पमालाआदर्शदर्शनं समर्पयेत्। ततो रुद्रस्तवेन स्तुवीत—

ॐ नमो विरिञ्चिविष्ण्वीशभेदेन परमात्मने। सर्गसंस्थितिसंहारव्यावृत्तव्यक्तमूर्त्तये ॥ १ ॥
नमश्चतुर्धा प्रोद्भूतभूतभीतात्मने भुवः। भूरिभारार्तिसंहर्त्रे भूतनाथाय शूलिने ॥ २ ॥
विश्वग्रासाय विकसत्कालकूटविषाशिने। तत्कलङ्काङ्कितग्रीवनीलकण्ठाय ते नमः ॥ ३ ॥
नमो ललाटनयने प्रोल्लसत्कृष्णवर्त्मने। ध्वस्तस्मरनिरस्ताधियोगिध्याताय शम्भवे ॥ ४ ॥
नमो देहार्द्धकान्ताय दग्धदक्षाध्वराय च। चतुर्वर्गेष्टदिष्टार्थदायिने मायिनेऽणवे ॥ ५ ॥
स्थूलाय मूलभूताय शूलवारितविद्विषे। कालहन्त्रे नमश्चन्द्रखण्डमण्डितमौलये ॥ ६ ॥
दिग्वाससे कपर्दान्तर्भ्रान्ताहिशरदिन्दवे। देवदैत्योरगेन्द्रादिमौलिधृष्टाङ्घ्रये नमः ॥ ७ ॥
भस्माभ्यक्ताय भक्ताय भुक्तिमुक्तिप्रदायिने। सकृद्व्यक्तस्वरूपाय शङ्कराय नमो नमः ॥ ८ ॥

नमोन्धकान्तकरिपवेऽसुरद्विषे नमोऽस्तु ते द्विरदवरावभेदिने।
विषोल्लसत्फणिकुलबद्धमूर्त्तये नमः सदा वृषवरवाहनाय ते ॥ ९ ॥
वियन्मरुद्धुतवहवायुकुम्भिनीमखेशरव्यमृतमयूखमूर्त्तये।
नमः सदा नरकायावभेदिने भवेह नो भयभङ्गकृद्विभो ॥ १० ॥

इति रुद्रस्तवेन स्तुत्वा देवं प्रदक्षिणीकृत्य तत्पदद्वन्द्वे साष्टाङ्गं प्रणम्य तत्पीठादीशानदिग्देशे तत्तोयकृते मण्डले रुद्रनैवेद्यांशं किञ्चिदल्पं गृहीत्वा 'चण्डेश्वराय शिवनैवेद्यभागं ददामि' इत्युक्त्वा प्रक्षिपेत्। तत आचम्य—

लेह्यपेयान्नपानानि ताम्बूलं स्रग्विलेपनम्। नैर्माल्यं भोजनं तुभ्यं दत्तमस्तु शिवाज्ञया ॥ १ ॥
यत्किञ्चित्क्रियते देव मया चण्ड तवाज्ञया। न्यूनाधिकं कृतं मोहात्परिपूर्णं तदस्तु मे ॥ २ ॥

इति प्रार्थयेत्। एवं चण्डं सम्पूज्य ततो जपं कुर्य्यात्। अस्य पुरश्चरणं दशलक्षमन्त्रात्मकम्। ततो जपान्ते सघृतपायसान्नेन अयुतहोमं कृत्वा तेनैव द्रव्येण आवरणदेवताभ्य एकैकाहुतीर्हुत्वा होमदशांशेन तर्पणं तद्दशांशेन मार्जनं शक्त्या ब्राह्मणभोजनं च कुर्य्यात्।

एवमर्चन्महादेवं पञ्चाङ्गन्यासपूर्वकम्। दशाक्षरजपासक्तो न सीदेत्स्वेष्टसाधने ॥ १ ॥
मनोहराणि गेहानि सुन्दर्यो वामलोचनाः। धनमिच्छापूरणान्तं लभते शिवसेवनात् ॥ २ ॥
प्रयोगान्पूर्वमन्त्रोक्तान्कुर्वीतात्र दशाक्षरे। दशाक्षरं भजन् विप्रो रुद्रजापी भवेत्सदा ॥ ३ ॥

इति महार्णवमन्त्रमहोदधिशान्तिसारादिप्रोक्तं दशाक्षरीरुद्रमन्त्रविधानं समाप्तम्।

इस प्रकार आवरणपूजा सम्पन्न करके 'ॐ नमो भगवते रुद्राय' इस मूल मन्त्र (दशाक्षरी मन्त्र) से धूप, दीप, नैवेद्य, आचमनीय, ताम्बूल, दक्षिणा, नीराजन तथा तीन प्रदक्षिणा के द्वारा रुद्र को पूजित कर दशाक्षर मन्त्र से पुष्पाञ्जलि देकर छत्र, चामर, परिमल, पुष्पमाला तथा दर्पण समर्पित करने के उपरान्त रुद्रस्तव से स्तुति करे—

रुद्रस्तव—विष्णु, विरिञ्चि (ब्रह्मा), शिव के भेद से जो सृष्टि, संस्थिति, संहाररूपी व्यावृत्ति के रूप में अव्यक्तमूर्ति परमात्मा है, उसे नमस्कार है। चार प्रकार (अण्डज, पिण्डज, स्वेदज, उद्भिज) से उत्पन्न प्राणियों को

भयभीत करने वाले तथा पृथ्वी के भाराक्रान्त होने पर उसकी पीड़ा को संहार द्वारा हरण करने वाले, त्रिशूलधारी, भूतनाथ को नमस्कार है। विश्व को ग्रासरूप में निगलने के लिये उत्पन्न कालकूट को खाने वाले तथा उसके काले चिह्न के रूप में नीलकण्ठ बनने वाले को नमस्कार है। ललाटनयन, प्रोल्लसत् कृष्णवर्त्म, कामदेव के ध्वंसक, योगियों के द्वारा ध्यायित शम्भु को नमस्कार है। देहार्ध में कान्ता से युक्त, दक्षयज्ञ के विनाशक, चतुर्वर्ग को प्रदान करने वाले, मायापति अणुस्वरूप को नमस्कार है। स्थूल, मूलभूत, त्रिशूल से शत्रुओं का संहार करने वाले, कालनाशक, चन्द्रखण्ड से मण्डित शिर वाले को नमस्कार है। दिगम्बर, कपर्दी, सर्पवेष्टित, शरद के चन्द्र के समान वर्ण वाले, देव, दैत्य, सर्पराज आदि को शिर पर धारण करने वाले को नमस्कार है। भस्माभ्यक्त, भक्त को भुक्ति-मुक्तिप्रदायक, तुरन्त प्रकट होने वाले शङ्कर को नमस्कार है। हे अन्धक दैत्य के नाशकर्ता, असुरद्वेषी, द्विरदवर का अवभेदन करने वाले, विष से उल्लसित सर्पकुल को लपेटने वाले, वृषवाहन वाले! आपको नमस्कार है॥ १-१०॥

इस प्रकार से रुद्रस्तव के द्वारा शिव की स्तुति करके प्रदक्षिणा कर उनके चरणयुगल में साष्टाङ्ग प्रणाम कर उस पीठ के ईशानकोण में जल से मण्डल बनाकर रुद्र के नैवेद्य में से कुछ अंश उनके गण चण्डेश्वर को 'शिवनैवेद्य में से भाग देता हूँ' ऐसा कहकर फेंक दे (डाल दे)। फिर आचमन कर 'लेह्य, पेय, अन्नपान, ताम्बूल, माला, विलेपन, निर्माल्य, भोजन आदि को शिव की आज्ञा से आपको देता हूँ। हे देव चण्डेश्वर! जो कुछ भी किया जाता है, वह न्यूनाधिक होने पर भी आपकी आज्ञा से पूर्ण हो।' ऐसी प्रार्थना चण्ड से करे। इस प्रकार चण्ड की पूजा करके जप करे। फिर दशाक्षरी मन्त्र का दश लाख जप कर पुरश्चरण सम्पन्न करे। जप की समाप्ति पर घृत-पायस-अन्नमिश्रित अयुत (१०,०००) होम करे तथा आवरणदेवताओं को एक-एक आहुति देकर होम का दशांश तर्पण, तद्दशांश मार्जन, तद्दशांश ब्राह्मणभोजन कराये। इस प्रकार से पञ्चाङ्ग न्यासपूर्वक महादेव की अर्चना करके दशाक्षर का जप करने वाला अभीष्ट, सिद्धि में असफल नहीं होता है, उसे मनोहर गृहसुन्दरी स्त्री, धन आदि की प्राप्ति होती है। दशाक्षर के जप के उपरान्त सदैव रुद्रजप भी करना चाहिये।

पञ्चरुद्रविधानानि

हेमाद्रिग्रहार्णवशान्तिसारेषु तत्र तावद्रुद्रमाहात्म्यम्। जाबालश्रुतिः—'किं जाप्येनामृतत्वं नो ब्रूहि शतरुद्रियेण' इति। कैवल्योपनिषदि—यः शतरुद्रियमधीते सोग्निपूतो भवति। स वायुपूतो भवति। स सुरापानात्पूतो भवति। स गुरुतल्पगमनात्पूतो भवति। स स्वर्णस्तेयात्पूतो भवति। स ब्रह्महत्यायाः पूतो भवति। अकृत्यात्पूतो भवति। अनेन ज्ञानमाप्नोति संसारार्णवनाशनम्। तस्मादेवं विदित्वैव कैवल्यफलमश्नुत इति। पराशरोऽपि—मद्यं पीत्वा गुरुदाराश्च गत्वा स्तेयं कृत्वा ब्रह्महत्यां च कृत्वा। भस्मच्छन्नो भस्मशय्यां शयानो रुद्राध्यायी मुच्यते सर्वपापैः॥ १॥ इदमहरहः कृते मासमात्रं ज्ञेयम्। तदुक्तं पाराशरेण—

रुद्राध्यायी भवेद्भक्त्या मासमेकमतन्द्रितः। प्रायश्चित्तं भवेदेतद्रहस्यस्य न संशयः॥

पाद्मे शिवगीतायाम्—

यस्तु रुद्रं जपेन्नित्यं ध्यायमानो ममाकृतिम्। षडक्षरं वा बाणं वा निष्कामो विजितेन्द्रियः॥
अथाथर्वशिरोमन्त्रं केवलं वा रघूत्तम। स तेनैव च देहेन शिवः सञ्जायते ध्रुवम्॥

पञ्चरुद्र-विधान—जाबालश्रुति में कहा है—यदि शतरुद्रिय का जप नहीं किया तो फिर अन्य किस जप से अमृत की प्राप्ति होगी।

कैवल्य उपनिषद् में भी कहा गया है—जो शतरुद्रिय का अध्ययन (पाठ) करता है, वह अग्निपूत (पवित्र) होता है। वायुपूत होता है। वह गुरुपत्नी-गमन के दोष से मुक्त होता है। वह स्वर्ण की चोरी से पापमुक्त होता है। ब्रह्महत्या के पाप से रहित होता है। दुष्कृत्य के दोष से मुक्त होता है। इससे प्राप्त ज्ञान के द्वारा संसाररूपी समुद्र का नाश होता है तथा कैवल्य (मुक्ति) की प्राप्ति होती है।

पराशर ने भी कहा है—मद्य पीकर, गुरुदारा-गमन कर, चोरी कर, ब्रह्महत्या कर जो भस्म रमाकर भस्म में शयन करता है तथा रुद्र का पाठ करता है, वह सब पापों से मुक्त हो जाता है। पद्मपुराणान्तर्गत शिवगीता में कहा है—

जो मेरे स्वरूप का ध्यान करता हुआ नित्य रुद्रजप करता है; षडक्षर मन्त्र का जप करता हुआ जितेन्द्रिय होकर लिङ्गपूजा करता है अथवा हे रघूत्तम! वह केवल रुद्र अथर्वशीर्ष का जप करता है तो वह व्यक्ति उसी शरीर से निश्चित ही शिव हो जाता है।

वायुपुराणे—

सर्वेषु ग्रहदोषेषु दुःस्वप्नाद्धुतदर्शने। जपन्रुद्रान् सकृद्विप्रः सर्वदोषैः प्रमुच्यते॥
अनपत्यत्वदोषेषु शाकिन्यादिग्रहेषु च। सर्वज्वरविनाशाय रुद्रजाप्यो न संशयः॥
रोगवान् पापवाँश्चैव रुद्रं जप्त्वा जितेन्द्रियः। रोगात्पापात्प्रमुक्तोसावतुलं सुखमश्नुते॥

हेमाद्रौ कौशिकबौधायनौ—

रुद्रैकादशनी त्वेषा सर्वकामफलप्रदा। सर्वपापक्षयकरी सर्वशान्तिप्रदायिनी॥

विष्णुधर्मोत्तरेऽपि—

रुद्राणां च तथा जाप्यं सर्वाघविनिषूदनम्। सर्वकामकरो होमस्तथा सर्वत्र शान्तिदः॥
अजाविकानामश्वानां कुञ्जराणां तथा गवाम्। मनुष्याणां नरेन्द्राणां बालानां योषितामपि॥
ग्रामाणां नगराणां च देशानामपि भार्गव। उपद्रुतानां धर्मज्ञ व्याधितानां तथैव च॥
मारके समनुप्राप्ते रिपुजे च तथा भये। रुद्रहोमः पराशान्तिः पायसेन घृतेन वा॥

हेमाद्रौ कालिकापुराणे—

यः पुनः सततं भक्त्या अभ्यर्च्य शशिशेखरम्। जपेद्ध्यायेत्सदा रुद्रात्सोऽपि याति परं पदम्॥
अथैहते फलं किञ्चिदैहिकं पुष्कलं तथा। तानेव हि जपेद्रुद्रान् शुचिर्भूत्वा समाहितः॥
अथ वेदं जगत्सर्वं वशीकर्तुं समीहते। तदा रुद्रं जपेद्धूयो ध्यायमानो महेश्वरम्॥

इति रुद्रफलम्।

वायुपुराण में कहा है—सभी ग्रहदोषों में, बुरे स्वप्न देखने में एक बार जप करने वाला ब्राह्मण उनके दोषों से मुक्त हो जाता है। सन्तानहीनता, डाकिनी-शाकिनी आदि ग्रहों की पीड़ा, सभी ज्वर आदि रुद्र के जप से निस्सन्देह नष्ट होते हैं। जो रोगी या पापी जितेन्द्रिय होकर रुद्रजप करता है, वह रोग तथा पाप से मुक्त होकर सुखी होता है।

हेमाद्रि में कौशिक बौधायन का कथन है—यह रुद्रैकादशिनी सभी कामनाओं को पूरा करती है। सभी पापों की नाशिक तथा सम्पूर्ण शान्ति देने वाली है।

विष्णुधर्मोत्तर में भी कहा है—रुद्रों का जप सम्पूर्ण पापों का नाशक है। सम्पूर्ण कामनाओं का दायक है। उसी प्रकार रुद्रहोम भी शान्तिदायक होता है। भेड़ों-बकरियों, अश्वों, हाथियों तथा गायों, मनुष्यों, राजा लोगों, बालकों,

स्त्रियों, ग्रामों, नगरों तथा देशों की भी शान्ति हे भार्गव! हो जाती है। हे धर्मज्ञ! इन सबके उपद्रव तथा कष्ट, रोग, महामारी तथा शत्रुभय पायस तथा घृत से होम करने पर शान्त हो जाते हैं।

हेमाद्रि में कालिकापुराण का उद्धरण है—जो भक्तिपूर्वक चन्द्रमौलि (शिव) का जप एवं ध्यान नित्य करता है, वह परमपद को प्राप्त होता है। इहलोक तथा परलोक में फल चाहने वाले को रुद्रजप करना चाहिये। जिस प्रकार अथर्ववेद के जप से सभी कामनाएँ पूर्ण होती हैं, उसी प्रकार रुद्रजप का भी फल मिलता है।

रुद्रप्रकारः

रुद्रश्च त्रिविधः—जपरुद्रो होमरुद्रोऽभिषेकरुद्रश्च। तत्र जपरुद्रः केवलजपात्मको होमाङ्गश्चेति द्वेधा। होमरुद्रे तर्पणादि। अभिषेकरुद्रे च पूजा ब्राह्मणभोजनं सिद्धम्। तत्रापि जपादिरुद्रश्च पञ्चधा। तद्भेदानाह—

शृणुष्व भो महाप्राज्ञ रुद्रभेदान्वदामि ते। रुद्राः पञ्चविधाः प्रोक्ता देशिकैरुत्तरोत्तरम्॥ १॥
साङ्गस्त्वाद्यो रूपकाख्यः सशीर्षो रुद्र उच्यते। एकादशगुणैस्तद्वद्रुद्रिसंज्ञो द्वितीयकः॥ २॥
एकादशभिरेताभिस्तृतीयो लघुरुद्रकः। लघ्वेकादशभिः प्रोक्तो महारुद्रश्चतुर्थकः॥ ३॥
पञ्चमः स्यान्महारुद्र एकादशभिरन्तिमः। अतिरुद्रः समाख्यातः सर्वेभ्यो ह्युत्तमोत्तमः॥ ४॥ इति।

रुद्रपद्धतौ—

साङ्गमाद्यं जपेद्रूपं केवलानि नवान्तरे। साङ्गं सशीर्षं चान्त्यं तु निरङ्गमिति केचन॥ १॥
षडङ्गानि जपेत्पूर्वमध्यायं रुद्रियं ततः। तदन्ते जपतेऽष्टर्चं वयं सोममहच्छिरः॥ २॥

रुद्र के प्रकार—रुद्र तीन प्रकार का होता है—१. जपरुद्र, २. होमरुद्र तथा ३. अभिषेकरुद्र। उनमें से जपरुद्र (रुद्राष्टाध्यायी का पाठ) केवल जपात्मक (पाठात्मक) होता है तथा होमात्मक रुद्र के दो भेद होते हैं। होमरुद्र में तर्पणादि होता है। अभिषेक रुद्र में पूजा तथा ब्राह्मणभोजन होते हैं। रुद्रों के पाँच भेद भी माने गये हैं। उनके भेदों को कहते हैं—हे महाप्राज्ञ! सुनो, अब मैं तुमसे रुद्र के भेदों को कहता हूँ। देशिकों (गुरुओं) ने रुद्रों के पाँच प्रकार कहे हैं, जो उत्तरोत्तर होते हैं। प्रथम रुद्र साङ्ग आद्यरूपक नामक सशीर्ष रुद्र होता है। उससे एकादशसंज्ञक रुद्र द्वितीय होता है। फिर इस द्वितीय की एकादश आवृत्ति में तीसरा लघुरुद्र होता है। लघु के एकादश से चौथा महारुद्र होता है। फिर उसके ग्यारह से अन्तिम अतिरुद्र होता है, वह सभी रुद्रों में उत्तम होता है॥ १-४॥

रुद्रपद्धति में कहा है—आदिरुद्र में केवल साङ्गरूपक का जप (पीठ) केवल नौ के अन्तर से करे। अन्तिम रुद्र का जप साङ्ग (षडङ्गसहित) तथा शीर्षसहित करे। कुछ के मत से निरङ्ग जप करना चाहिये। प्रथम षडङ्गों का जप करके फिर रुद्राध्याय का जप करना चाहिये। अन्त में 'वयं सोम' इत्यादि आठ ऋचाओं का जप किया जाता है। यही शीर्ष है॥ १-२॥

जपादिरुद्रप्रयोगः

तत्र तावत् कृच्छ्रचान्द्रायणं पराकं च कृत्वा अशक्तश्च तत्प्रतिनिधिरूपां धेनुं वा तन्मूल्यं च दत्त्वा अयुतगायत्रीजपं च स्वयं ब्राह्मणद्वारा वा कुर्यात्। एवं प्रायश्चित्तं सम्पाद्य चन्द्रतारादिबलान्विते सुमुहूर्त्ते प्रातर्नित्यकर्म समाप्य सपत्नीको यजमानः स्वासने प्राङ् उदङ्मुखो वा उपविश्य भस्मत्रिपुण्ड्रं रुद्राक्षमालां च धृत्वा पवित्रपाणिः 'ॐ नमो भगवते रुद्राय' इति मन्त्रेणाचमनं प्राणायामं च कुर्यात्। ततः ॐ आनो भद्रा इत्यादिशान्तिपाठं पठित्वा सुमुखश्चैकदन्तश्चेति गणपतिस्मरणपूर्वकं देशकालौ सङ्कीर्त्य 'अमुकगोत्रोऽमुकशर्माहं श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं मम इह जन्मनि जन्मान्तरे

च कृतकायिकवाचिकमानसिकसांसर्गिकज्ञाताज्ञातमहापातकोपपातकानां व्याधिरूपेण परिपच्यमानानां विनाशार्थं वाऽमुककामनासिद्ध्यर्थं श्रीपरमेश्वरप्रीत्यर्थम् अमुकरुद्रहोमेन वा अमुकरुद्राभिषेकेण एतावन्तं कालं श्रीसदाशिवं स्वयं ब्राह्मणद्वारा वा यक्ष्ये' एवं तत्तत्कामनया सङ्कल्प्य 'तदङ्गत्वेन गणपतिपूजनं पुण्याहवाचनं मातृकापूजनं नान्दीश्राद्धमाचार्यादिवरणं च करिष्ये' इति च सङ्कल्प्य गणपतिपूजनादिआचार्यवरणान्तं पूर्ववत्कुर्य्यात्। ततो जपरुद्रे शिवालयादिषु जपस्थानं प्रकल्प्य, होमरुद्रे मण्डपकुण्डादि च कुर्य्यात्। ततो जापकः कृतनित्यक्रियः धृतभस्मत्रिपुण्ड्ररुद्राक्षः सपवित्रकरः आचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य 'मम यजमानस्य वा अमुककामनासिद्ध्यर्थममुकरुद्रजपं करिष्ये, तदङ्गत्वेन भूतशुद्धिं प्राणप्रतिष्ठामन्तर्मातृकाबहिर्मातृकान्यासं श्रीकण्ठादिकलान्यासं च करिष्ये' इति सङ्कल्प्य भूतशुद्ध्यादिबहिर्मातृकान्यासान्तं पद्धतिकाण्डोक्तमार्गेण कृत्वा शिवपञ्चाक्षरोदितं श्रीकण्ठादिकलामातृकान्यासं च सम्पाद्य रुद्रन्यासान् कुर्य्यात्। ते चानादेशे सर्वेऽप्यङ्गुष्ठानामिकाभ्यां कार्य्याः।

जपादि रुद्रप्रयोग—प्रथम कृच्छ्रचान्द्रायण व्रत करके, अशक्ति में उसके प्रतिनिधिरूप गोदान अथवा उसका मूल्य देकर अयुत सङ्ख्या में स्वयं या ब्राह्मण द्वारा गायत्री-जप करे। इस प्रकार प्रायश्चित्त का सम्पादन करके चन्द्र-तारा बलान्वित सुमुहूर्त्त में प्रातः के नित्यकर्म को समाप्त कर सपत्नीक यजमान पूर्वाभिमुख अथवा उत्तराभिमुख बैठकर भस्मत्रिपुण्ड्र तथा रुद्राक्षमाला को धारण करके पवित्रहस्त होकर 'ॐ नमो भगवते रुद्राय' इस मन्त्र से आचमन तथा प्राणायाम करके 'ॐ आनो भद्रा०' इत्यादि शान्तिपाठ पढ़कर 'सुमुखश्चैकदन्तश्च' इनका पाठ गणपतिस्मरणपूर्वक करके देश-काल का उच्चारण कर मूल में लिखित 'अमुकगोत्रोऽमुक .... नान्दीश्राद्धमाचार्यवरणमहं करिष्ये' इत्यादि को पढ़कर सङ्कल्प करके गणपति-पूजन, आचार्यवरण-पर्यन्त सब कृत्य पूर्ववत् सम्पन्न करके होमरुद्र में मण्डप तथा कुण्डादि का निर्माण करे। फिर रुद्रजप-हेतु शिवालय आदि में जपस्थान की व्यवस्था करके जापक नित्यकर्म से निपटकर भस्म, त्रिपुण्ड्र तथा रुद्राक्ष धारण कर, पवित्री धारण कर, प्राणप्रतिष्ठा, अन्तर्मातृका, बहिर्मातृकान्यास तथा निश्चित सङ्ख्या में रुद्राक्षजप करने का सङ्कल्प करे। फिर भूतशुद्धि आदि सब कार्य पद्धतिकाण्ड में बतायी गयी विधि के अनुसार करके शिवपञ्चाक्षर के अनुष्ठान में जो भी कण्ठादि कलामातृकान्यास एवं रुद्रन्यास कहे गये हैं, उन्हें करे। उन्हें अङ्गूठे तथा अनामिका के द्वारा सम्पन्न करे (जब तक कि अन्य प्रकार से न्यास करना न कहा गया हो)।

छन्दःपुरुषन्यासः

तत्र तावत्प्रथमं छन्दःपुरुषन्यासः—ॐ तिर्यग्विलाय चमसायोर्ध्वबुध्न्याय च्छन्दःपुरुषाय नमः शिरसि॥ १॥ ॐ गौतमभरद्वाजाभ्यां नमः नेत्रयोः॥ २॥ ॐ विश्वामित्रजमदग्निभ्यां नमः श्रोत्रयोः॥ ३॥ ॐ वसिष्ठकश्यपाभ्यां नमः नासापुटयोः॥ ४॥ ॐ अत्रये नमः वाचि॥ ५॥ ॐ गायत्र्यग्निभ्यां नमः शिरसि॥ १॥ ॐ उष्णिक्सवितृभ्यां नमः ग्रीवायाम्॥ २॥ ॐ बृहतीबृहस्पतिभ्यां नमः हनौ॥ ३॥ ॐ बृहद्रथन्तरद्यावापृथिवीभ्यां नमः बाह्वोः॥ ४॥ ॐ त्रिष्टुबिन्द्राभ्यां नमः नाभौ॥ ५॥ ॐ जगत्यादित्याभ्यां नमः श्रोण्योः॥ ६॥ ॐ अतिच्छन्दाप्रजापतिभ्यां नमः लिङ्गे॥ ७॥ ॐ यज्ञायज्ञियवैश्वानराभ्यां नमः गुदे॥ ८॥ ॐ अनुष्टुब्विश्वेभ्यो देवेभ्यो नमः ऊर्वोः॥ ९॥ ॐ पंक्तिमरुद्भ्यो नमः जानुनोः॥ १०॥ ॐ द्विपदाविष्णुभ्यां नमः पादयोः॥ ११॥ ॐ विच्छन्दावायुभ्यां नमः नासापुटस्थप्राणेषु॥ १२॥ ॐ न्यूनाक्षरच्छन्दोभ्यो नमः मस्तकादिपादान्तं सर्वाङ्गेषु॥ १३॥ इति छन्दःपुरुषन्यासः।

छन्दपुरुषन्यास—'ॐ तिर्यक् विलाय चमसायोर्ध्वबुध्न्याय नमः' इत्यादि मूल में लिखित पाँच मन्त्रों से शरीर के विभिन्न अङ्गों में क्रमशः शिर, नेत्रद्वय, कर्णद्वय, नासापुटद्वय, वाक् (जीभ) में न्यास करे। पुनः 'ॐ

गायत्री अग्निभ्यां नमः शिरसि' इत्यादि तेरह मन्त्रों से क्रमशः शिर, ग्रीवा, हनु (ठोढ़ी), भुजाएँ, नाभि, श्रोणि (कूल्हे), लिङ्ग, गुद, ऊरू, जानु, गुदों, नासापुट तथा सर्वाङ्ग में न्यास करना चाहिये।

पञ्चाङ्गरुद्राणां न्यासः

मनोजूतिरित्यस्याङ्गिरसबृहस्पतिऋषिर्यजुश्छन्दः विश्वेदेवा देवता हृदयन्यासे विनियोगः। ॐ मनोजूतिर्जुषता० हृदयाय नमः॥ १॥ अबोध्यग्निरित्यस्य बुधोङ्गिरा ऋषी त्रिष्टुप्छन्दः अग्निदेवता शिरोन्यासे विनियोगः। ॐ अबोध्यग्निः स० शिरसे स्वाहा॥ २॥ मूर्द्धानमित्यस्य भरद्वाजऋषिस्त्रिष्टुप्छन्दः वैश्वानरोऽग्निर्देवता शिखान्यासे विनियोगः। ॐ मूर्द्धानन्दिवो० शिखायै वषट्॥ ३॥ मर्माणित इत्यस्य विवस्वान् ऋषिः त्रिष्टुप्छन्दः, लिङ्गोक्ता देवता, कवचन्यासे विनियोगः। ॐ मर्माणिते वर्म्मणा० कवचाय हुम्॥ ४॥ विश्वतश्चक्षुरित्यस्य विश्वकर्माभौवनऋषिस्त्रिष्टुप्छन्दः विश्वकर्मादेवता नेत्रन्यासे विनियोगः। ॐ विश्वतश्चक्षुरुत० नेत्रत्रयाय वौषट्॥ ५॥ मानस्तोक इत्यस्य कुत्स ऋषिर्जगती छन्दः। एको रुद्रो देवता। अस्त्रन्यासे विनियोगः। ॐ मानस्तोके तनये० अस्त्राय फट्॥ ६॥ इति लघुषडङ्गन्यासः प्रथमः॥ १॥

पञ्चाङ्ग रुद्रों का न्यास—'मनोजूति' इस मन्त्र के अङ्गिरस बृहस्पति ऋषि, यजुः छन्द, विश्वेदेवा देवता, हृदयन्यास में विनियोग है। ऐसा कहकर विनियोग मन्त्र पढ़े। फिर इसी भाँति मूल में निर्दिष्ट कुल छः मन्त्रों से विनियोगपूर्वक क्रमशः हृदय, शिर, शिखान्यास, कवचाय हुम्, नेत्रत्रयाय वौषट् तथा अस्त्राय फट्—इन छः अङ्गों में न्यास करना चाहिये। यह लघु षडङ्गन्यास प्रथम प्रकार का न्यास होता है।

मन्त्रन्यासः

यातेरुद्र इति परमेष्ठी ऋषिः अनुष्टुप्छन्दः। एको रुद्रो देवता। शिखान्यासे विनियोगः। ॐ यातेरुद्रशिवातनूरघोरा० शिखायाम्॥ १॥ अस्मिन्महत्यर्णवे इत्यस्य परमेष्ठी ऋषिः। अनुष्टुप्छन्दः। बहुरुद्रो देवता। शिरोन्यासे विनियोगः। ॐ अस्मिन्महत्यर्णवे० शिरसि॥ २॥ असङ्ख्यातेति परमेष्ठी ऋषिः। अनुष्टुप्छन्दः। बहवो रुद्रा देवताः। ललाटन्यासे विनियोगः। ॐ असङ्ख्याता० ललाटे॥ ३॥ त्र्यम्बकमित्यनयोः क्रमेण वसिष्ठप्रजापती०। अनुष्टुप्त्र्यम्बको०। नेत्रन्यासे०। ॐ त्र्यम्बकं यजा० नेत्रयोः॥ ४॥ मानस्तोक इति कुत्स ऋषिः। जगती छन्दः। एको रुद्रो देवता। नासिकान्यासे०। ॐ मानस्तोके० नासिकायाम्॥ ५॥ अवतत्येत्यस्य परमेष्ठी ऋषिः। अनुष्टुप् छन्दः। एको रुद्रो देवता। मुखन्यासे विनियोगः। ॐ अवतत्यधनु० मुखे॥ ६॥ नीलग्रीवा इति द्वयोः परमेष्ठी ऋषिः। अनुष्टुप् छन्दः। बहवो रुद्रा देवताः। कण्ठन्यासे विनियोगः। ॐ नीलग्रीवाः शि० कण्ठे॥ ७॥ नमस्त आयुधायेत्यस्य परमेष्ठी० अनुष्टुप्० एको रुद्रो०। प्रकोष्ठन्यासे०। ॐ नमस्तऽआयु० प्रकोष्ठे॥ ८॥ (मणिबन्धादूर्ध्वं कूर्पराधोभागः प्रकोष्ठः)। येतीर्थानीति परमेष्ठी०। अनुष्टुप्० बहवो रुद्रा० न्यासे०। ॐ येतीर्थानि०। हस्तयोः॥ ९॥ नमो वः किरिकेभ्यः इति परमेष्ठी०। सामोष्णिग्यजुरुष्णिगतिच्छन्दांसि बहुरुद्रा०। हृदयन्यासे विनियोगः। ॐ नमोवः किरिकेभ्य० हृदये॥ १०॥ नमोहिरण्यबाहव इति परमेष्ठी ऋषिः। अत्रैकादशाक्षराणां यजुस्त्रिष्टुप्छन्दः। अष्टाक्षराणां यजुरनुष्टुप्०। दशाक्षरस्य यजुः पङ्क्तिः हिरण्यबाह्सादयो मन्त्रवर्णावगता उभयतो नमस्कारा बहवो रुद्रा० नाभिन्यासे विनियोगः। ॐ नमो हिरण्यबाहवे० पुष्टानां पतये नमः। नाभौ॥ ११॥ इमारुद्रायेति कुत्स०। जगती०। एको रुद्रो दे०। गुह्यन्यासे०। ॐ इमारुद्राय० गुह्ये॥ १२॥ मानोमहांतमितिकुत्स०। जगती० एको रुद्रो०। ऊरुन्यासे०। ॐ मानोमहांत०। ऊर्वोः॥ १३॥ एषत इत्यस्य प्रजापति०। सामपङ्क्तिर्यजुर्जगतीछन्दः। रुद्रो०। ऊरुन्यासे० ॐ एषते रुद्रभाग० जानुनोः॥ १४॥ अवरुद्रमित्यस्य प्रजापति०। पङ्क्ति०। रुद्रो०। जङ्घान्यासे०। ॐ अवरुद्र० जङ्घयोः॥ १५॥ [जानुगुल्फयोरन्तरालं जङ्घा] अध्यवोचदित्यस्य परमेष्ठी०। पङ्क्तिच्छन्दः। एको रुद्रो०। कवचन्यासे०। ॐ अध्यवोचद०। कवचमुद्रया

कवचम्॥ १६॥ नमोबिल्मिन इत्यस्य परमेष्ठी० षडक्षराणां यजुर्गायत्री०। पञ्चाक्षरयोर्दैवीपङ्क्तिः। सप्ताक्षरस्य यजुरुष्णिग्बिल्मिनादयो मन्त्रवर्णा विगताः। अन्यतरतो नमस्कारा बहवो रुद्रा देवता उपकवचन्यासे० ॐ नमो बिल्मिने०। हनन्यायच [कवचाद्विपरीतमुपकवचम्। कवचोपरि तथैवेत्युपकवचमित्यन्ये]॥ १७॥ नमोस्तु नीलग्रीवायेत्यस्य परमेष्ठी० अनुष्टुप्०। एको रुद्रो०। तृतीयनेत्रन्यासे०। ॐ नमोस्तु नीलग्री० [मुष्टितो विमुक्तया मध्यमया तृतीयनेत्रे]॥ १८॥ प्रमुञ्चेत्यस्य परमेष्ठी०। अनुष्टुप्०। एको रुद्रो दे०। अस्त्रन्यासे०। ॐ प्रमुञ्चध्व०। अस्त्रम्॥ १९॥ यएतावन्तश्चेत्यस्य परमेष्ठी०। अनुष्टुप्०। बहवो रुद्रा०। दिग्बन्धने०। ॐ यएतावन्तश्च० दिक्षु विदिक्षु च परस्परतर्जन्यङ्गुष्ठाग्रस्फोटनेन दिग्बन्धः॥ २०॥ इति शिखाद्यस्त्रान्तो दिग्बन्धसहित एकोनविंशतिविधो द्वितीयो न्यासः॥ २॥

रुद्राध्याय के मन्त्रों का न्यास—'याते रुद्र०' इत्यादि प्रथम मन्त्र के परमेष्ठी ऋषि, अनुष्टुप् छन्द, एकरुद्र देवता, शिखान्यास में विनियोग है। फिर पूरा मन्त्र पढ़कर शिखा में न्यास करे। 'अस्मिन् महत्यर्णवे०' मन्त्र के परमेष्ठी ऋषि, अनुष्टुप् छन्द, बहुरुद्र देवता शिरोन्यास में विनियोग है। मन्त्र से शिरोन्यास करे। 'ॐ असङ्ख्याता रुद्रा०' इस मन्त्र के परमेष्ठी ऋषि, अनुष्टुप् छन्द, बहवो रुद्रा देवता है। इसका ललाटन्यास में विनियोग करे तथा न्यास करे। 'ॐ त्र्यम्बकं यजामहे०' इत्यादि दोनों मन्त्रों के क्रमशः वसिष्ठ तथा प्रजापति ऋषि हैं। दोनों में अनुष्टुप् छन्द है तथा दोनों के त्र्यम्बक देवता हैं। दोनों मन्त्रों से नेत्रों में न्यास करे। 'मानस्तोकेतनये०' इत्यादि मन्त्र के कुत्स ऋषि, जगती छन्द, एकरुद्र देवता एवं नासिका न्यास में विनियोग है। नासिका में न्यास करे। 'अवतत्य धनुष्ट ँ सहस्राक्ष शतेषुधे०' इत्यादि मन्त्र के परमेष्ठी ऋषि, अनुष्टुप् छन्द, एकरुद्र देवता है, मुखन्यास में विनियोग करे। 'ॐ नीलग्रीवा शितिकण्ठा०' इत्यादि दोनों के परमेष्ठी ऋषि, अनुष्टुप् छन्द, बहवो रुद्र देवता एवं कण्ठन्यास में विनियोग है। 'ॐ नमस्त आयुधायानातताय०' इत्यादि के परमेष्ठी ऋषि, अनुष्टुप् छन्द, एकरुद्र देवता, प्रकोष्ठन्यास में विनियोग करे (कलाई से कोहनी तक का हाथ का अङ्ग प्रकोष्ठ कहलाता है)। 'येतीर्थानि०' मन्त्र के परमेष्ठी ऋषि, अनुष्टुप् छन्द बहवोरुद्र देवता हैं। इसका हस्त (हथेलियों) के न्यास में विनियोग है। फिर मूल में देखकर क्रमशः हृदय, नाभि, गुह्य, दोनों ऊरु (घुटनों से ऊपर टाँग), जानु, जङ्घा (पिण्डली), कवच, तृतीय नेत्र, अस्त्र, दिग्बन्धन—इस प्रकार से इक्कीस प्रकार के न्यास विनियोगपूर्वक करना चाहिये। ये शिखा से अस्त्रपर्यन्त दिग्बन्ध सहित इक्कीस न्यास द्वितीय न्यास कहलाते हैं।

दशाक्षरमन्त्रन्यासः

दशाक्षरमन्त्रस्य प्रजापति०। विराट्०। रुद्रो०। न्यासे० ॐ नमो मूर्द्धनि। ॐ नं नमः शिखायाम्। ॐ मों नमो ललाटे। ॐ भं नमो मुखे०। ॐ गं नमः कण्ठे। ॐ वं नमः हृदये। ॐ तें नमः दक्षिणहस्ते। ॐ रुं नमः वामहस्ते। ॐ द्रां नमः नाभौ। ॐ यं नमः पादयोः॥ १०॥ इति दशाक्षरीमन्त्रन्यासस्तृतीयः॥ ३॥

दशाक्षर मन्त्रन्यास—'अस्य दशाक्षरमन्त्रस्य प्रजापति ऋषिः विराट् छन्दः, रुद्रो देवता, न्यासे विनियोगः' यह कहकर न्यास का जल छोड़े तथा 'ॐ नमो भगवते रुद्राय' मन्त्र के दश अक्षरों में 'नमः' जोड़कर क्रमशः शिर, शिखा, ललाट (माथा), मुख, कण्ठ, हृदय, दक्षिण हस्त, वामहस्त, नाभि तथा दोनों पैरों—इन दश अङ्गों में (मूल में लिखित के अनुसार) न्यास करे। यह तृतीय प्रकार का न्यास है।

सम्पुटन्यासः

अथ सम्पुटाख्यो न्यासः; स च मुद्रिताञ्जलिना प्राच्यादिदिक्षु वक्ष्यमाणमन्त्रैः कार्यः। तद्यथा—त्रातारमित्यस्य गर्ग ऋषिः। त्रिष्टुप् छन्दः। इन्द्रो देवता। सम्पुटीकरणे विनियोगः। ॐ त्रातारमिन्द्र० ॐ इन्द्राय नमः। इति प्राच्याम्॥ १॥

त्वन्नोऽअग्न इत्यस्य हिरण्यस्तूप आङ्गिरस० त्रिष्टुप् छन्दः। अग्निर्देवता सम्पुटीकरणे०। ॐ त्वन्नोऽअग्ने० ॐ अग्नये नमः। इत्याग्नेय्याम्॥ २॥ सुगन्नुः पन्था० मित्यस्य प्रजापति० त्रिष्टुप्०। यमो देवता। सम्पुटी०। ॐ सुगन्नुःपन्थां ॐ यमाय०। इति दक्षिणस्याम्॥ ३॥ असुन्वन्तमित्यस्य प्रजापति० त्रिष्टुप्० निर्ऋतिः सं०। ॐ असुन्वन्तम० ॐ निर्ऋतये नमः। इति नैर्ऋत्याम्॥ ४॥ तत्त्वायामीत्यस्य शुनःशेप० त्रिष्टुप्०। वरुणो०। सं०। ॐ तत्त्वायामि० ॐ वरुणाय नमः। इति प्रतीच्याम्॥ ५॥ आनोनियुद्भिरित्यस्य वसिष्ठ० त्रिष्टुप्०। वायुः०। सं०। ॐ आनोनियुद्भि० ॐ वायवे नमः। इति वायव्याम्॥ ६॥ वयठं०सोमेत्यस्य बन्धु०। गायत्री०। सोमो०। सं०। ॐ वयठं०सोम० ॐ सोमाय नमः। इत्युदीच्याम्॥ ७॥ तमीशानमित्यस्य गौतम०। जगती०। ईशानो०। सं०। ॐ तमीशान० ॐ ईशानाय०। इतीशान्याम्॥ ८॥ अस्मेरुद्रा इत्यस्य प्रगर्थ०। त्रिष्टुप्०। ब्रह्मा०। सं०। ॐ अस्मे रुद्रा० ॐ रुद्राय नमः। इत्यूर्ध्वम्॥ ९॥ स्योनापृथिवीत्यस्य मेधातिथि०। गायत्री छन्दः। अनन्तो देवता सम्पुटीकरणे विनियोगः। ॐ स्योनापृथिवी० ॐ अनन्ताय नमः इत्यधः॥ १०॥ एवं दिक्षु विदिक्षु च इन्द्रादीन् प्रणमेत्। इति सम्पुटाख्यश्चतुर्थो न्यासः॥ ४॥

सम्पुटन्यास—'त्रातारमिन्द्र' इत्यादि मन्त्र का सम्पुटन्यास में विनियोग (मूलानुसार) करके बन्द अञ्जलि क्रमशः १. पूर्व, २. आग्नेय, ३. दक्षिण, ४. नैर्ऋत्य, ५. पश्चिम, ६. वायव्य, ७. उत्तर, ८. ईशान, ९. ऊर्ध्व (ईशान तथा पूर्व के बीच) तथा १०. अधः (नैर्ऋत्य एवं पश्चिम के बीच) में न्यास कर दिशा-विदिशा में इन्द्रादि को प्रणाम करे। यह सम्पुट नामक चौथा न्यास होता है।

बृहत्षडङ्गन्यासः

अथ बृहत्षडङ्गन्यासः—यज्जाग्रत इति षड्ऋचस्य शिवसङ्कल्प ऋषिः। त्रिष्टुप् छन्दः। मनो देवता। हृदयन्यासे विनियोगः॥ ॐ यज्जाग्रतो०॥ १॥ येन कर्माण्य०॥ २॥ यत्प्रज्ञान०॥ ३॥ येमेदं भूतं०॥ ४॥ यस्मिन्नृच०॥ ५॥ सुषारथि०॥ ६॥ इति हृदयाय नमः॥ १॥ (मुष्टिविनिर्गताङ्गुष्ठौ संयुतौ कृत्वा हृदये न्यसेत्।) सहस्रशीर्षेति षोडशर्चस्य पुरुषसूक्तस्य नारायण ऋषिः आद्यानां पञ्चदशानामनुष्टुप् छन्दः। यज्ञेनयज्ञमित्यस्य त्रिष्टुप्०। जगद्बीजम्। पुरुषो देवता। शिरोन्यासे विनियोगः। ॐ सहस्रशीर्षा०॥ १६॥ शिरसे स्वाहा (इति मुष्टिनिर्गताङ्गुष्ठौ संयुक्तौ न्यस्ततर्जनीकौ कृत्वा शिरसि न्यसेत्)॥ २॥ अद्भ्यः सम्भृत इति षड्ऋचस्योत्तरनारायणस्य नारायणपुरुष ऋषिः। आद्यानां तिसृणां त्रिष्टुप् छन्दः। चतुर्थपञ्चमयोरनुष्टुप्०। षष्ठस्य त्रिष्टुप् छन्दः। आदित्यो देवता। शिखान्यासे विनियोगः। ॐ अद्भ्यः संभृत० ६ शिखायै वषट् (इति मुष्टिपुटौ करौ कृत्वाङ्गुष्ठावधःप्रसक्ताग्रे कनिष्ठे चोर्ध्वतः कृत्वा शिखायां न्यसेत्)॥ ३॥ आशुःशिशान इति सप्तदशानामप्रतिरथ ऋषिः। त्रिष्टुप् छन्दः। इन्द्रो देवता। कवचन्यासे विनियोगः। ॐ आशुःशिशानो०॥ १७॥ कवचाय हुम् (इत्यङ्गुष्ठौ प्रसक्ततर्जन्यौ च त्रिकोणवत् कृत्वा मूर्द्धनि पश्चान्मुखं कृत्वोभयपार्श्वतः करौ हृदयान्तं नयन् हृदये न्यसेत्)॥ ४॥ बिभ्राडिति सप्तदशानां बिभ्राड् ऋषिः। जगती छन्दः। सूर्यो देवता। नेत्रन्यासे विनियोगः॥ ॐ बिभ्राड् बृहत्पिबतु०॥ १७॥ नेत्रत्रयाय वौषट् (इति नेत्रोन्मुखं हस्तं कृत्वा प्रसक्ताङ्गुष्ठकनिष्ठिकां च कृत्वा मध्यमां किञ्चित्प्रसार्य इतराङ्गुलीर्नयन् नेत्रेषु न्यसेत्)॥ ५॥ नमस्ते इत्यादिषोडशर्चस्य परमेष्ठी ऋषिः। नमस्त इत्यस्य गायत्री यात इति तिसृणामनुष्टुप्०। अध्यवोचदिति त्रयाणां पङ्क्ति०। नमोस्त्स्वितिसप्तानामनुष्टुप्०। मान इति द्वयोः कुत्स ऋषिः। जगती छन्दः। सर्वासामेको रुद्रो देवता। अस्त्रन्यासे विनियोगः। ॐ नमति रुद्र० हवामहे॥ १६॥ इत्यस्त्राय फट् (इति किञ्चित्तर्जनीं प्रसार्य मध्यमाङ्गुष्ठयोगेन अस्त्राय फडित्यस्त्रम्)॥ ५॥ इति बृहत्षडङ्गन्यासः पञ्चमः॥ ५॥ ततः ॐ एषते रुद्रभाग० इति मन्त्रेण योनिमुद्राप्रदर्शनम्। एवं पञ्चाङ्गन्यासान् विधाय रुद्ररूपमात्मानं ध्यायेत्।

बृहत्षडङ्ग न्यास—मूल में लिखे अनुसार 'यज्जाग्रतो दूर०' इन छः मन्त्रों से मुट्ठी के बाहर अङ्गूठा बाँधकर हृदयन्यास करे। फिर अङ्गूठे को मुट्ठी से अलग कर तर्जनी ऊपर करके 'सहस्रशीर्षा०' मन्त्रों से शिरसे स्वाहा न्यास

करे। फिर मुट्ठी में कनिष्ठा को ऊपर कर 'अद्भ्यः सम्भृतः' इन छः ऋचाओं से शिखा न्यास करे। फिर अङ्गूठे से तर्जनी लगाकर त्रिकोण का आकार बनाकर 'आशुःशिशानो०' इत्यादि सत्रह ऋचाओं से 'कवचाय हुम्' करे। फिर विभ्राड् से नेत्रों की ओर हाथ करके अङ्गूठा तथा कनिष्ठा मिलाकर मध्यमा को थोड़ा-सा फैलाकर शेष अङ्गुलियों से नेत्रों में न्यास करे। फिर तर्जनी को कुछ फैलाकर मध्यमा तथा अङ्गूठे के योग से अस्त्राय फट् न्यास मूलोक्त नमस्ते रुद्रमन्यव इत्यादि १६ मन्त्रों से करे। यह बृहत्षडङ्ग न्यास नामक पाँचवाँ न्यास है। फिर 'ॐ एषते रुद्र भाग' इस मन्त्र को पढ़कर योनिमुद्रा का प्रदर्शन करे तथा पाँचों प्रकार के न्यासों के उपरान्त 'मैं स्वयं रुद्ररूप हूँ' इस प्रकार का ध्यान (आगे लिखे मन्त्रों से) करे।

अथ ध्यानम्—

अथात्मानं रुद्ररूपं ध्यायेत्पञ्चमुखं शिवम्। प्रतिवक्त्रं त्रिनेत्रं च दशहस्तं दशायुधम्॥ १॥
कमण्डलुं साक्षसूत्रं बाणशूलधरं हरम्। दण्डं डमरुखट्वाङ्गाभयपात्रं पिनाकिनम्॥ २॥
अष्टसिद्धियुतं सौम्यं सर्वाभरणभूषितम्। नीलग्रीवं शशाङ्कार्द्धशेखरं स्मितसुन्दरम्॥ ३॥
शुद्धस्फटिकसङ्काशं नागयज्ञोपवीतिनम्। गजचर्मपरीधानं व्याघ्रचर्मोत्तरीयकम्॥ ४॥
वृषस्कन्धसमारूढमुमादेहार्द्धधारिणम्। दुर्दन्तं कपिलजटं शिखामुद्योतकारिणम्॥ ५॥
अमृतेनाप्लुतं हृष्टं दिव्यभोगसमाकुलम्। दैवतैश्च समायुक्तं सुरासुरनमस्कृतम्॥ ६॥
शाश्वतं सच्चिदानन्दं ध्रुवमक्षरमव्ययम्। अजातममृतं नित्यं सर्वव्यापिनमीश्वरम्॥ ७॥
एवं रुद्रतनुं सर्वे यक्षराक्षसपन्नगाः। डाकिनीशाकिनीभूतपिशाचा जृम्भका ग्रहाः॥ ८॥
ज्वलन्तं ते प्रपश्यन्ति प्रलयानलसन्निभम्। एवं ध्यात्वा द्विजः सम्यक् ततो यजनमारभेत्॥ ९॥

स्वयंभूत रुद्र का ध्यान इस प्रकार करना चाहिये—स्वयं का स्वरूप पञ्चमुख शिव का है, ऐसा ध्यान करे। प्रत्येक मुख में तीन नेत्र हैं, दश हाथ तथा दश आयुध हैं। कमण्डलु, अक्षसूत्र, बाण, शूल, दण्ड, डमरू, खट्वाङ्ग, अभयपात्र तथा धनुष को शिव जी धारण किये हैं। वे आठ सिद्धियों से युक्त, सौम्य, सर्वाभरण-भूषित, नीलकण्ठ, अर्धचन्द्रधारी, स्मित मुख वाले सुन्दर हैं। वे शुद्धस्फटिक के समान शरीर वाले, सर्प के यज्ञोपवीत को धारण किये हुए, हाथी के चर्म का परिधान पहिने तथा व्याघ्रचर्म का उत्तरीय धारण किये हैं। वे वृषभ की पीठ पर (कन्धे पर) बैठे हुए अर्धनारी नटेश्वर देह वाले हैं। दुर्दन्त, कपिल जटाओं वाले तथा शिखा से प्रकाशित हैं। जो अमृत से आप्लुत, हृष्ट, दिव्य भोगों से युक्त, देवताओं से युक्त तथा सुरों एवं असुरों के द्वारा नमस्कृत हैं; जो शाश्वत, सच्चिदानन्द, ध्रुव, अक्षर, अव्यय, अजन्मा, अमर, नित्य तथा सर्वव्यापी ईश्वर है; इसी प्रकार सभी यक्ष, राक्षस, नाग, डाकिनी, शाकिनी, भूत, पिशाच, जृम्भकग्रह इत्यादि जो प्राणी हैं, वे रुद्र के रूप को प्रलयाग्नि के समान जलता हुआ देखते हैं। इस प्रकार से द्विज को रुद्ररूप का ध्यान करके सम्यक् रूप से यजन आरम्भ करना चाहिये॥ १-९॥

विमर्श—मूल में ध्यान के लिये जो आठवाँ श्लोक है, उसके शब्दों के अर्थों को यहाँ स्पष्ट किया जा रहा है—

यक्ष—एक ऐसी जाति का मनुष्य या गुणों से युक्त मनुष्य, जो दूसरों से येन-केन प्रकारेण धन प्राप्त करता है और उससे खुद भोग-विलास करता है तथा उसी में से कुछ अंश निर्धनों को एवं याचकों को दान भी कर देता है। प्राचीन काल में यह जाति हिमालय में निवास करती थी। इस जाति का प्रमुख पशु भी 'यक्षपशु' कहलाता था। उस गाय-जैसे प्राणी को आजकल 'याक' कहते हैं।

राक्षस—दादागिरी तथा जोर-जबरदस्ती से जनता से कर के रूप में (रङ्गदारी टैक्स) वसूलने वाली जाति राक्षस कहलाती थी। आजकल के 'दबङ्ग' तथा 'दादा' कहे जाने वाले लोग, नक्सली तथा आतङ्कवादी सभी राक्षस ही हैं।

पन्नग—नाग जाति के लोग, जो कि प्राकृतिक गुफाओं में रहते थे तथा बिना आग पर पका भोजन करते थे। इराक के कुर्द कबीले के लोग, रूस में सर्बिया के सर्ब (सर्प) तथा भारत में पूर्वी राज्य नागाप्रदेश के लोग प्राचीन नाग जाति के ही वंशज हैं। पन्नग तथा नाग का अर्थ साँप भी होता है।

डाकिनी—दुर्गा की एक सेविका का नाम है। भयंकर शब्द करने वाली महिला योद्धाओं को डाकिनी कहा जाता था। आजकल का डाइन शब्द भी इसी डाकिनी शब्द का अपभ्रंश है। ब्रह्मपुराण के अनुसार देवी की सेना में साढ़े तीन करोड़ डाकिनी थीं। नरभक्षी 'डायनासोर' जैसे विशाल प्राणियों को भी डाकिनी कहा जाता था। जिनका शब्द भी भयंकर होता था; जिन्हें आज कल वैज्ञानिकों ने Hominivorous नाम दिया है। अंग्रेजी Dinosauros शब्द संस्कृत के 'डाकिनी सरट' का लैटिन भाषा में रूपान्तरमात्र है। पुंल्लिङ्ग डाकिनः (डाकिनस्) शब्द से ग्रीक शब्द Deinos बना है, जिसका अर्थ डरावना होता है।

शाकिनी—शाकिनी भी देवी की सहचारी मानी गयी है। शाकिनी का दूसरा अर्थ 'शाकोत्पादक भूमि' भी होता है। सदाशिव की शक्ति भी शाकिनी है। तन्त्रसार के अनुसार षोडश स्वर-संयुक्त विशुद्ध महाचक्र में शाकिनी-सहित शिव का न्यास किया जाता है। युद्ध में पराक्रम दिखाने वाली तथा केवल शाकाहार पर जीवित रहने वाली स्त्रियाँ भी शाकिनी कही जाती थीं। प्राचीनकाल शाकाहारी सरट (Herbivorous saurus) जैसे Apatosaurus (Brontosaurus) तथा Brachiosaurus आदि को भी संस्कृत वाङ्मय में शाकिनी तथा शाकिनः (शाकिनस्) कहा गया था। विविध प्रकार के Bacteria भी इन शब्दों से बोधित होते हैं।

भूत—इसका अर्थ अशरीरी आत्मा, प्रेत, कीटाणु, छाया, प्रकाश आदि होता है। फारसी का फौत (मरा हुआ) तथा अंग्रेजी का Photo और ग्रीक भाषा के Phot एवं Phos शब्द भूत शब्द के ही अपभ्रंश हैं।

पिशाच—पिशित (कच्चा मांस या मछली) खाने वाले को पिशाच कहते हैं। प्राचीन काल में इस जाति (कबीलों) के लोग कच्चा मांस ही खा जाते थे तथा प्राणियों का रक्त भी पीते थे। जो केवल मछली तथा मांस के कच्चे आहार पर जीवित रहता है वह शब्दार्थ में पिशाच होता है। ये अदृश्य आत्मा की भाँति तथा रोगकारक कीटाणुओं के रूप में भी होते हैं।

जृम्भक—जृम्भक का अर्थ 'जम्भाई लेने वाला' होता है। जो आलसी जीव या मनुष्य खा-पीकर पड़े-पड़े जम्भाई लेता है, वह जृम्भक कहलाता है। रुद्र के एक गण का नाम भी जृम्भक है। एक बार श्वास लेकर फिर जोर के साथ प्रश्वास छोड़ने को जृम्भा कहते हैं। अजगर तथा प्राचीन डायनासोर भी जृम्भक होते थे। जम्भाई के साथ निकलने वाले रोगकारक कीटाणु भी जृम्भक हैं। वैद्यक ग्रन्थों में जृम्भा का लक्षण इस प्रकार है—

पीत्वैकं श्वासमनिलः पुनस्त्यजति वेगवान्। आलस्यनिद्रायुक्तस्य स जृम्भ इति उच्यते॥

एवं श्रीरुद्रं ध्यात्वा मानसोपचारैः सम्पूज्य यथाशक्ति 'ॐ नमो भगवते रुद्राय' इति मूलमन्त्रं जपेत्। यदि तु भेदेनोपासीत तदानीन्तनीं पूजां पात्रासादनं शैवपीठपूजापूर्वकं पद्धतिकाण्डोक्तविधिना मण्डलमध्ये स्वर्णमय्यां रुद्रप्रतिमायां लिङ्गे वा वेदोक्तमन्त्रैः पुष्पान्तां पूजां कृत्वा पूर्वोक्तरुद्रयन्त्रोक्तावरणदेवताः सम्पूज्य धूपदीपनैवेद्यादि-नीराजनान्तैरुपचारैरर्चनं विधाय रुद्रस्तवेन स्तुत्वा वेदमन्त्रैर्देवमूर्द्धनि पुष्पाञ्जलिं दत्त्वा प्रदक्षिणात्रयं कृत्वा 'ॐ नमस्तेऽस्तु

भगवन् विश्वेश्वराय महादेवाय त्र्यम्बकाय त्रिपुरान्तकाय त्रिकाग्निकालाय कालाग्निरुद्राय नीलकण्ठाय सर्वेश्वराय श्रीमहादेवाय नमः' इति नत्वा।

नमः सर्वहितार्थाय जगदाधारहेतवे। साष्टाङ्गोऽयं प्रणामस्ते दीनत्वेन मया कृतः॥

इति साष्टाङ्गं प्रणम्य विविधैः स्तोत्रैः स्तुत्वा पूजां निवेदयेत्। ततस्तन्मना रुद्रं ध्यायन् जपं कुर्यात्।

मूल मन्त्र का जप—इस प्रकार ध्यान करने के उपरान्त रुद्र का मानसिक उपचार से पूजन कर यथाशक्ति 'ॐ नमो भगवते रुद्राय' इस मन्त्र का जप करे। यदि भेदोपासना करनी हो तो पद्धतिकाण्ड में वर्णित विधि के अनुसार उसकी पूजा, पात्रासादन, शैवपीठ की पूजा आदि करनी चाहिये। मण्डल के मध्य में स्वर्णमयी रुद्रप्रतिमा या लिङ्ग में वेदोक्त मन्त्रों के द्वारा पूजा करके पूर्व में वर्णित 'रुद्रयन्त्र' के आवरणदेवताओं का पूजन कर धूप, दीप, नैवेद्य, नीराजन आदि उपचारों से पूजा करके रुद्रस्तव से स्तुति कर वेदमन्त्रों के द्वारा देवमूर्ति के शिर पर पुष्पाञ्जलि छोड़नी चाहिये। फिर तीन प्रदक्षिणा करके 'ॐ नमस्तेऽस्तु भगवन् विश्वेश्वराय, महादेवाय, त्र्यम्बकाय, त्रिपुरान्तकाय, त्रिकाग्निकालाय, कालाग्निरुद्राय नीलकण्ठाय सर्वेश्वराय श्रीमहादेवाय नमः' यह कहकर प्रणाम करना चाहिये। फिर 'नमः सर्वहितार्थाय जगदाधारहेतवे। साष्टाङ्गोऽयं प्रणामस्ते दीनत्वेन मया कृतः॥' इस मन्त्र से साष्टाङ्ग प्रणाम कर विविध स्तोत्रों से पूजा करके पूजा को निवेदित करके मन में रुद्र का ध्यान करके जप आरम्भ करना चाहिये।

रुद्रजपक्रमः

अथ जपक्रमः—ॐ नमस्तेरुद्रमन्न्यवऽउतोतऽइषवेनमः बाहुब्भ्यामुततेनमः॥१॥ यातेरुद्रशिवातनूरघोरा-
पापकाशिनी। तयानस्तन्न्वाशन्तमयागिरिशन्ताभिचाकशीहि॥२॥ यामिषुङ्गिरिशन्तहस्तेबिभर्ष्यस्तवे। शिवाङ्गिरित्रतां
कुरुमाहिंꣳसीःपुरुषञ्जगत्॥३॥ शिवेनव्वचसात्वागिरिशाच्छावदामसि। यथानःसर्व्वमिज्जगदयक्ष्मꣳसुमनाऽ
असत्॥४॥ अध्यवोचदधिवक्ताप्रथमोदैव्व्योभिषक्। अहींश्चसर्व्वाञ्जम्भयन्त्सर्व्वाश्चयातुधान्न्योधराचीः परासुव॥५॥
असौयस्ताम्म्रोऽअरुणऽउतबब्भ्रुःसुमङ्गलः। येचैनꣳरुद्राऽअभितोदिक्षुश्रिताःसहस्रशोवैषाꣳहेडईमहे॥६॥
असौयोवसर्प्पतिनीलग्ग्रीवोव्विलोहितः। उतैनङ्गोपाऽअदृश्रन्नदृश्रन्नुदहार्य्यः सदृष्टोमृडयातिनः॥७॥ नमोस्तु
नीलग्ग्रीवायसहस्राक्षायमीढुषे। अथोयेऽअस्यसत्त्वानोहन्तेब्भ्योकरन्नमः॥८॥ प्रमुञ्चधन्न्वनस्त्वमुभयोरार्त्न्योर्ज्ज्याम्।
याश्चतेहस्तऽइषवःपरातावभगवोव्वप॥९॥ विज्ज्यन्धनुःकपर्द्दिनोव्विशल्ल्योबाणवाँऽउत। अनेशन्नस्ययाऽइषवऽआभु-
रस्यनिषङ्गधिः॥१०॥ यातेहेतिर्म्मीढुष्टमहस्तेबभूवतेधनुः। तयास्मान्विश्श्वतस्त्वमयक्ष्मयापरिभुज॥११॥ परितेधन्न्वनो-
हेतिरस्म्मान्न्वृणक्तुव्विश्श्वतः। अथोयऽइषुधिस्तवारेऽअस्म्मन्निधेहितम्॥१२॥ अवतत्त्यधनुष्ट्वꣳसहस्राक्षशतेषुधे।
निशीर्य्यशल्ल्यानाम्मुखाशिवोनः सुमनाभव॥१३॥ नमस्तऽआयुधायानाततायधृष्ण्णवे। उभाब्भ्यामुततेनमोबाहुब्भ्यान्त-
वधन्न्वने॥१४॥ मानोमहान्तमुतमानोऽअर्भकम्मानऽउक्षन्तमुतमानऽउक्षितम्। मानोव्वधीःपितरम्मोतमातरम्मानः
प्प्रियास्तन्न्वो रुद्ररीरिषः॥१५॥ मानस्तोकेतनयेमानऽआयुषिमानोगोषुमानोऽअश्वेषुरीरिषः। मानोव्वीरान्रुद्रभामिनो
व्वधीर्हविष्मन्तःसदमित्त्वा हवामहे॥१६॥ नमोहिरण्ण्यबाहवेसेनान्न्येदिशाञ्चपतयेनमोनमोव्वृक्षेब्भ्योहरिकेशेब्भ्यःपशू-
नाम्पतयेनमोनमःशष्पिञ्जरायत्त्विषीमतेपथीनाम्पतयेनमोनमोहरिकेशायोपवीतिनेपुष्टानाम्पतयेनमोनमोबभ्लुशाय॥१७॥
नमोबभ्लुशायव्व्याधिनेन्नानाम्पतयेनमोनमोभवस्यहेत्त्यैजगताम्पतयेनमोनमोरुद्रायाततायिनेक्षेत्राणाम्पतयेनमोनमः
सूतायाहन्त्यैव्वनानाम्पतये नमोनमो रोहिताय॥१८॥ नमोरोहिताय। स्थपतयेव्वृक्षाणाम्पतयेनमोनमोभुवन्तयेव्वारिव-
स्कृतायौषधीनाम्पतयेनमोनमोमन्त्रिणेव्वाणिजायकक्षाणाम्पतयेनमोनमऽउच्चैर्ग्घोषायाक्क्रन्दयतेपत्तीनाम्पतयेनमोनमः

कृत्स्नायतया॥१९॥ नमः कृत्स्नायतया। धावतेसत्त्वनाम्पतयेनमोनमः सहमानायनिव्व्याधिनंऽआव्व्याधिनीनाम्पतये नमोनमोनिषङ्गिणे ककुभायस्तेनानाम्पतये नमो नमो निचेरवेपरिचरायारण्यानाम्पतयेनमोनमोवञ्चते॥२०॥ नमोवञ्चते। परिवञ्चतेस्तायूनाम्पतयेनमोनमोनिषङ्गिणऽइषुधिमतेतस्कराणाम्पतयेनमोनमः सृकायिभ्योजिघांᳬसद्भ्योमुष्णताम्पतयेनमोनमोसिमद्भ्योनक्तञ्चरद्भ्योविकृन्तानाम्पतयेनमः॥२१॥ नमऽउष्णीषिणे। गिरिचरायकुलुञ्चानाम्पतयेनमोनमऽइषुमद्भ्योधन्न्वायिभ्यश्चवोनमोनमऽआतन्न्वानेभ्यः प्प्रतिदधानेभ्यश्चवोनमोनमऽआयच्छद्भ्योस्यद्भ्यश्चवोनमोनमो विसृजद्भ्यः॥२२॥ नमोविसृजद्भ्योविद्ध्यद्भ्यश्चवोनमोनमः स्वपद्भ्योजाग्ग्रद्भ्यश्चवोनमोनमः शयानेभ्यऽआसीनेभ्यश्चवोनमोनमस्तिष्ठद्भ्योधावद्भ्यश्चवोनमोनमः सभाब्भ्यः॥२३॥ नमः सभाब्भ्यः। सभापतिब्भ्यश्चवोनमोनमोश्श्वेब्भ्योश्श्वपतिब्भ्यश्चवोनमोनमऽआव्व्याधिनीब्भ्योविविद्ध्यन्तीब्भ्यश्चवोनमो नमऽउगणाब्भ्यस्तृᳬहतीब्भ्यश्चवोनमोनमोगणेब्भ्यः॥२४॥ नमोगणेब्भ्योगणपतिब्भ्यश्चवोनमोनमोव्व्रातेब्भ्योव्व्रातपतिब्भ्यश्चवोनमोनमोगृत्सेब्भ्योगृत्सपतिब्भ्यश्चवोनमोनमोविरूपेब्भ्योविश्श्वरूपेब्भ्यश्चवोनमोनमः सेनाब्भ्यः॥२५॥ नमः सेनाब्भ्यः। सेनानिब्भ्यश्चवोनमोनमोरथिब्भ्योऽअरथेब्भ्यश्चवोनमोनमः क्षत्तृब्भ्यः संग्रहीतृब्भ्यश्चवोनमोनमो महद्भ्योऽअर्ब्भकेभ्यश्चवोनमः॥२६॥ नमस्तक्षब्भ्यः। नमस्तक्षभ्योरथकारेब्भ्यश्चवोनमोनमः कुलालेः कर्म्मारेब्भ्यश्चवोनमोनमोनिषादेब्भ्यः पुञ्जिष्ठेब्भ्यश्चवोनमोनमः श्श्वनिब्भ्योमृगयुब्भ्यश्चवोनमोनमः श्श्वब्भ्यः॥२७॥ नमः श्श्वब्भ्यः। श्श्वपतिब्भ्यश्चवोनमोनमोभवायचरुद्रायचनमः। शर्व्वायचपशुपतयेचनमोनीलग्ग्रीवायचशितिकण्ठायचनमः कपर्द्दिने॥२८॥ नमः कपर्द्दिनेचव्व्युप्तकेशायचनमः सहस्राक्षायचशतधन्न्वनेचनमोगिरिशयायचशिपिविष्टायचनमोमीढुष्टमायचेषुमतेचनमोह्रस्वाय॥२९॥ नमोह्रस्वायचवामनायचनमोबृहतेचवर्षीयसेचनमोव्वृद्धायचसवृधेचनमोग्ग्र्यायचप्प्रथमायचनमऽआशवे॥३०॥ नमऽआशवे। चाजिरायचनमः शीघ्र्यायचशीब्भ्यायचनमऽऊर्म्म्यायचावस्वन्न्यायचनमोनादेयायचद्वीप्प्यायच॥३१॥ नमोज्ज्येष्ठाय च कनिष्ठायचनमः पूर्व्वजायचापरजायचनमोमद्ध्यमायचापगल्भायचनमोजघन्न्यायचबुध्न्यायचनमः सोभ्याय॥३२॥ नमः सोभ्यायचप्प्रतिसर्य्यायचनमो याम्म्यायचक्षेम्म्यायचनमः श्लोक्यायचावसान्न्यायचनमऽउर्व्वर्य्यायचखल्ल्यायचनमोवन्न्याय॥३३॥ नमोवन्न्यायच कक्ष्यायचनमः श्श्रवायचप्प्रतिश्श्रवायचनमऽआशुषेणायचाशुरथायचनमः शूरायचावभेदिनेचनमो बिल्मिने॥३४॥ नमो बिल्मिने। चकवचिनेचनमोवर्म्मिणेचवरूथिनेचनमः श्श्रुतायचश्श्रुतसेनायचनमोदुन्दुब्भ्यायचाहनन्न्यायचनमोधृष्णवे॥३५॥ नमोधृष्णवे। चप्प्रमृशायचनमोनिषङ्गिणेचेषुधिमतेचनमस्तीक्ष्णेषवेचायुधिनेचनमः स्वायुधायचसुधन्न्वनेच॥३६॥ नमः स्स्रुत्यायचपत्थ्यायचनमः काट्यायचनीप्प्यायचनमः कुल्यायचसरस्स्यायचनमोनादेयायचवैशन्तायचनमः कूप्प्याय॥३७॥ नमः कूप्प्यायचावट्यायचनमोवीद्ध्र्यायचातप्प्यायचनमोमेग्घ्यायचविद्युत्यायचनमोवर्ष्ष्यायचावर्ष्ष्यायचनमोवात्याय॥३८॥ नमोवात्याय। चरेष्म्यायचनमोव्वास्तव्व्यायचवास्तुपायचनमः सोमाय चरुद्रायचनमस्ताम्म्रायचारुणायचनमः शङ्गवे॥३९॥ नमः शङ्गवे। चपशुपतयेचनमोऽउग्ग्रायचभीमायचनमोग्ग्रेवधायचदूरेवधायचनमोहन्त्रेचहनीयसेचनमो वृक्षेब्भ्योहरिकेशेब्भ्योनमस्ताराय॥४०॥ नमः शम्भवाय। चमयोभवायचनमः शङ्कुरायचमयस्करायचनमः शिवायचशिवतरायच॥४१॥ नमः पार्य्याय। चावार्य्यायचनमः प्प्रतरणायचोत्तरणायचनमस्तीर्त्थ्यायचकूल्यायचनमः शष्प्यायचफेन्यायचनमः सिकत्याय॥४२॥ नमः सिकत्यायच प्प्रवाह्यायचनमः किᳬशिलायचक्षयणायचनमः कपर्द्दिनेचपुलस्तयेचनमऽइरिण्यायचप्प्रपत्थ्यायचनमोव्व्रज्ज्याय॥४३॥ नमोव्व्रज्ज्यायचगोष्ठ्यायचनमस्तल्प्यायचगेह्यायचनमोहृदय्यायचनिवेष्प्यायचनमः काट्यायचगव्व्हरेष्ठायचनमः शुष्क्याय॥४४॥ नमः शुष्क्यायचहरित्यायचनमः पाᳬसव्व्यायचरजस्यायचनमोलोप्यायचोलप्यायचनमऽऊर्व्व्यायचसूर्व्व्याय च नमः पूर्ण्याय॥४५॥ नमः पूर्ण्याय। चपर्णशदायचनमऽउद्गुरमाणायचाभिग्घ्नतेचनमऽआखिदतेचप्प्रखिदतेचनमऽइषुकृद्भ्योधनुष्कृद्भ्यश्चवोनमोनमोवः किरिकेब्भ्योदेवानाᳬहृदयेब्भ्योनमोविचिन्न्वत्केब्भ्योनमोविक्षिणत्केब्भ्योनमऽआनिर्ह-

तेब्भ्यः॥४६॥ द्रापेऽअन्धसस्पतेदरिद्रनीललोहित। आसांप्रजानामेषाम्पशूनाम्माभेर्मारोङ्मोचनःकिञ्चनाममत्॥४७॥
इमारुद्राय। तवसेकपर्द्दिनेक्षयद्वीरायप्रभरामहेमतीः। यथाशमसद्द्विपदेचतुष्पदेविश्श्वम्पुष्टङ्ग्रामेऽअस्मिन्ननातुरम्॥४८॥
यातेरुद्रशिवातनूःशिवाव्विश्श्वाहाभेषजीशिवारुतस्यभेषजीतयानोमृडजीवसे॥४९॥ परिनोरुद्रस्यहेतिर्वृणक्तुपरित्वे-
षस्यदुर्म्मतिरघायोः। अवस्थिरामघवद्भ्यस्तनुष्वमीढ्वस्तोकायतनयायमृड॥५०॥ मीढुष्टमशिवतम। शिवोनःसुमना
भव। परमेव्वृक्षऽआयुधन्निधायकृत्तिंवुसानऽआचरपिनाकम्बिब्भ्रदागहि॥५१॥ विकिरिद्रविलोहितनमस्तेऽअस्तुभ-
गवः। यास्तेसहस्रꣳहेतयोन्न्यमस्मन्निवपन्तुताः॥५२॥ सहस्राणिसहस्रशोबाह्वोस्तवहेतयः। तासामीशानोभगवः
पराचीनामुखाकृधि॥५३॥ असङ्ख्यातासहस्राणियेरुद्राऽअधिभूम्याम् तेषाꣳसहस्रयोजनेवधन्वानितन्मसि॥५४॥
अस्मिन्महत्त्यर्णवेन्तरिक्षेभवाऽअधि। तेषाꣳस०॥५५॥ नीलग्ग्रीवाः शितिकण्ठादिवꣳरुद्राऽउपश्रिताः। तेषाꣳ
स०॥५६॥ नीलग्रीवाःशितिकण्ठाःशर्वाऽअधःक्षमाचराः। तेषाꣳस०॥५७॥ येव्वृक्षेषुशष्प्पिञ्जरानीलग्रीवाविलो-
हिताःतेषाꣳस०॥५८॥ येभूतानामधिपतयोविशिखासःकपर्द्दिनः। तेषाꣳस०॥५९॥ येपथाम्पथिरक्षयऽऐलबृदाऽ-
आयुर्य्युधः। तेषाꣳस०॥६०॥ येतीर्त्थानिप्रचरन्तिसृकाहस्तानिषङ्गिणः। तेषाꣳस०॥६१॥ येन्नेषुविविद्ध्यन्तिपात्रेषु
पिबतोजनान्। तेषाꣳस०॥६२॥ यऽएतावन्तश्श्चभूयाꣳसश्श्चदिशोरुद्रावितस्थिरे। तेषाꣳस०॥६३॥ नमोस्तुरुद्रे-
भ्योयेदिवियेषांवर्षमिषवः। तेभ्योदशप्प्राचीर्दश दक्षिणदशप्प्रतीचीर्दशोदीचीर्दशोर्ध्वाः। तेब्भ्योनमोऽअस्तुतेनोवन्तु-
तेनोमृडयन्तुतेयन्द्विष्मोयश्श्चनोद्वेष्टितमेषाञ्जम्भेदध्मः॥६४॥ नमोस्तुरुद्रेब्भ्योयेन्तरिक्षेयेषांवातऽइषवः। तेब्भ्यो०॥६५॥
नमोस्तुरुद्रेब्भ्योयेपृथिव्व्यांय्येषामन्नमिषवः। तेब्भ्योदशप्राचीर्दशदक्षिणादशप्प्रतीचीर्दशोर्ध्वाः। तेभ्योनमोऽअस्तुते-
नोवन्तुतेनोमृडयन्तुतेयंद्द्विष्मोयश्श्चनोद्वेष्टितमेषांजम्भेदध्मः॥६६॥इति रुद्राध्यायं पठित्वा–

ॐ वाजश्श्चमेप्प्रसवश्श्चमेप्प्रयतिश्श्चमेप्प्रसितिश्श्चमेधीतिश्श्चमेत्क्रतुश्श्चमेस्वरश्श्चमेश्लोकश्श्चमेश्श्रावश्श्चमेश्श्रुतिश्श्चमे-
ज्ज्योतिश्श्चमेस्वश्श्चमेयज्ञेन कल्प्यन्ताम्॥१॥ प्राणश्श्चमेपानश्श्चमेव्व्यानश्श्चमेसुश्श्चमेचित्तञ्चमेऽआधीतञ्चमेव्वा-
क्चमेमनश्श्चमेचक्षुश्श्चमेश्श्रोत्रंचमेदक्षश्श्चमेबलञ्चमेयज्ञेनकल्प्यन्ताम्॥२॥ ओजश्श्चमेसहश्श्चमऽआत्माचमेतनूश्श्चमेशर्म-
चमेव्वर्म्मचमेङ्गानिचमेस्थीनिचमेपरूꣳषिचमेशरीराणिचमऽआयुश्श्चमेजराचमेयज्ञेन कल्प्यन्ताम्॥३॥ ज्ज्यैष्ठ्यञ्चमऽ-
आधिपत्यञ्चमेमन्न्युश्श्चमेभामश्श्चमेमश्श्चमेम्भश्श्चमेजेमाचमेमहिमाचमेवरिमाचमेप्प्रथिमाचमेवर्षिमाचमेद्राघुयाचमेव्वृद्धञ्चमेव्वृद्धिश्श्चमे-
यज्ञेनकल्प्यन्ताम्॥४॥ इत्याद्यं चमकानुवाकं पठेत्॥१॥

पुनः ॐ नमस्तेरुद्र इत्यादि (६६) पठित्वा ॐ सत्त्यञ्चमेश्श्रद्धाचमेजगच्चमेधनञ्चमेविश्श्वञ्चमेमहश्श्चमेक्रीडा-
चमेमोदश्श्चमेजातञ्चमेजनिष्ष्यमाणञ्चमेसूक्तञ्चमेसुकृतञ्चमेयज्ञेनकल्प्यन्ताम्॥५॥ ऋतञ्चमेमृतञ्चमेयक्ष्मञ्चमेनामयच्चमे-
जीवातुश्श्चमेदीर्घायुत्वञ्चमेनमित्रञ्चमेभयञ्चमेसुखञ्चमेशयनञ्चमेसूषाश्श्चमेसुदिनञ्चमेयज्ञेनकल्प्यन्ताम्॥६॥ यन्ताच-
मेधर्त्ताचमेक्षेमश्श्चमेधृतिश्श्चमेविश्श्वञ्चमेमहश्श्चमेसंविच्चमेज्ञात्रञ्चमेसूश्श्चमेप्रसूश्श्चमेसीरञ्चमेलयश्श्चमेयज्ञेनकल्प्यन्ताम्॥७॥
शंचमेमयश्श्चमेप्प्रियञ्चमेनुकामश्श्चमेकामश्श्चमेसौमनसश्श्चमेभगश्श्चमेद्रविणञ्चमेभद्रञ्चमेश्श्रेयश्श्चमेवसीयश्श्चमेयशश्श्चमेयज्ञेन-
कल्प्यन्ताम्॥८॥ इति द्वितीयं चमकानुवाकं पठेत्॥२॥

पुनः ॐ नमस्ते० इत्यादि (६६) पठित्वा ॐ ऊर्क्चमेसूनृताचमेपयश्श्चमेरसश्श्चमेघृतञ्चमेमधुचमेसग्ग्धिश्श्चमे-
सपीतिश्श्चमेकृषिश्श्चमेव्वृष्टिश्श्चमेजैत्रञ्चमऽऔद्भिद्यञ्चमेयज्ञेनकल्प्यन्ताम्॥९॥ रयिश्श्चमेरायश्श्चमेपुष्टञ्चमेपुष्टिश्श्चमेव्वि-
भुचमेप्रभुचमेपूर्ण्णञ्चमेपूर्ण्णतरञ्चमेकुयवञ्चमेक्षितञ्चमेन्नञ्चमेक्षुच्चमेयज्ञेनकल्प्यन्ताम्॥१०॥ वित्तञ्चमेवेद्यञ्चमेभूतञ्चमे-
भविष्ष्यच्चमेसुगञ्चमेसुपत्थ्यञ्चमऽऋद्धञ्चमऽऋद्धिश्श्चमेक्लृप्तञ्चमेक्लृप्तिश्श्चमेमतिश्श्चमेसुमतिश्श्चमेयज्ञेनकल्प्यन्ताम्॥११॥
व्व्रीहयश्श्चमेयवाश्श्चमेमाषाश्श्चमेतिलाश्श्चमेमुद्गाश्श्चमेखल्ल्वाश्श्चमेप्रियङ्गवश्श्चमेणवश्श्चमेश्श्यामाकाश्श्चमेनीवाराश्श्चमे-
गोधूमाश्श्चमेमसूराश्श्चमेयज्ञेनकल्प्यन्ताम्॥१२॥ इति तृतीयं चमकानुवाकं पठेत्॥३॥

पुनः ॐ नमस्ते इत्यादि (६६) पठित्वा ॐ अश्म्माचमेमृत्तिकाचमेगिरयश्श्चमेपर्व्वताश्श्चमेसिकताश्श्चमे-व्वनस्प्पतयश्श्चमेहिरण्यञ्चमेयश्श्चमेश्यामञ्चमेलोहञ्चमेसीसञ्चमेत्रपुचमेयज्ञेनकल्प्पन्ताम्॥१३॥ अग्ग्निश्श्चमऽआपश्श्चमे-व्वीरुधश्श्चमऽओषधयश्श्चमेकृष्टपच्च्याश्श्चमेग्राम्म्याश्श्चमेपशवऽआरण्याश्श्चमेव्वित्तञ्चमेव्वित्तिश्श्चमेभूतञ्चमेभूतिश्श्चमेयज्ञेन-कल्प्पन्ताम्॥१४॥ व्वसुश्श्चमेव्वसतिश्श्चमेकर्म्म चमेशक्त्तिश्श्चमेर्त्थश्श्चमऽएमश्श्चमऽइत्याचमेगतिश्श्चमेजज्ञेनकल्प्पन्ताम्॥१५॥ इति चतुर्थं चमकानुवाकं पठेत्॥४॥

पुनः नमस्ते इत्यादि (६६) पठित्वा ॐ अग्ग्निश्श्चमऽ इन्द्रश्श्चमेसोमश्श्चमऽइन्द्रश्श्चमेसविताचमऽइन्द्रश्श्चमे-सरस्वतीचमऽइन्द्रश्श्चमेपूषाचमऽइन्द्रश्श्चमेबृहस्पतिश्श्चमऽइन्द्रश्श्चमेयज्ञेनकल्प्पन्ताम्॥१६॥ मित्रश्श्चमऽइन्द्रश्श्चमेव्वरुण-श्श्चमऽइन्द्रश्श्चमेधाताचमऽइन्द्रश्श्चमेत्त्वष्टाचमऽइन्द्रश्श्चमेमरुतश्श्चमऽइन्द्रश्श्चमेव्विश्श्वेचमेदेवाऽइन्द्रश्श्चमेयज्ञेनकल्प्पन्ताम्॥१७॥ पृथिवीचमऽइन्द्रश्श्चमेन्तरिक्षञ्चमऽइन्द्रश्श्चमेद्यौश्श्चमइन्द्रश्श्चमेसमाश्श्चमऽइन्द्रश्श्चमेनक्क्षत्राणिचमऽइन्द्रश्श्चमेदिशश्श्चमऽ-इन्द्रश्श्चमेयज्ञेनकल्प्पन्ताम्॥१८॥ इति पञ्चमं चमकानुवाकं पठेत्॥५॥

पुनः ॐ नमस्ते इत्यादि (६६) पठित्वा अर्ठ०शुश्श्चमेरश्मिश्श्चमेदाब्भ्यश्श्चमेधिपतिश्श्चमऽउपाᳬशुश्श्चमेन्तर्य्यामश्श्चमऽऐन्द्रवायवश्श्चमेमैत्रावरुणश्श्चमऽआश्विनश्श्चमेप्प्रतिप्प्रस्थानश्श्चमेशुक्रश्श्चमेमन्थीचमेयज्ञेनकल्प्पन्ताम्॥१९॥ आग्रयणश्श्चमेव्वैश्श्वदेवश्श्चमेद्ध्रुवश्श्चमेवैश्वानरश्श्चमऽऐन्द्राग्ग्नश्श्चमेमहावैश्श्वदेवश्श्चममरुत्वतीयाश्श्चमेनिष्क्केवल्यश्श्च-मेसावित्रश्श्चमेसारस्वतश्श्चमेपात्क्नीवतश्श्चमेहारियोजनश्श्चमेयज्ञेनकल्प्पन्ताम्॥२०॥ स्स्रुचश्श्चमेचमसाश्श्चमेव्वाय-व्व्यानिचमेद्रोणकलशश्श्चमेग्ग्रावाणश्श्चमेधिषवणेचमेपूतभृच्चमऽआधवनीयश्श्चमेव्वेदिश्श्चमेबर्हिश्श्चमेवभृथश्श्चमे-यज्ञेनकल्प्पन्ताम्॥२१॥ इति षष्ठं चमकानुवाकं पठेत्॥६॥

पुनः ॐ नमस्ते इत्यादि (६६) पठित्वा ॐ अग्ग्निश्श्चमेघर्म्मश्श्चमेर्क्कश्श्चमेसूर्य्यश्श्चमेप्प्राणश्श्चमेश्श्वमेधश्श्चमे-पृथिवीचमेदितिश्श्चमेदितिश्श्चमेद्यौश्श्चमेङ्गुलयःशक्करयोदिशश्श्चमेयज्ञेनकल्प्पन्ताम्॥२२॥ व्व्रतञ्चमऽऋतवश्श्चमेत-पश्श्चमेसंव्वत्सरश्श्चमेहोरात्रेऽऊर्व्वष्ठीवेबृहद्रथन्तरञ्चमेयज्ञेनकल्प्पन्ताम्॥२३॥ इति सप्तमं चमकानुवाकं पठेत् ॥७॥

पुनर्नमस्ते रु० इत्यादि (६६) पठित्वा एकाचमेतिस्स्रश्श्चमेतिस्स्रश्श्चमेपञ्चचमेपञ्चचमेसप्तचमेसप्तचमेनवचमे-नवचमऽएकादशचमऽएकादशचमेत्रयोदशचमेपञ्चदशचमेपञ्चदशचमेसप्तदशचमेसप्तदशचमेनवदशचमऽएकविᳬ०-शतिश्श्चमऽएकविᳬ०शतिश्श्चमेत्रयोविᳬ०शतिश्श्चमेत्रयोविᳬ०शतिश्श्चमेपञ्चविᳬ०शतिश्श्चमेपञ्चविᳬ०शतिश्श्चमे-सप्तविᳬ०शतिश्श्चमेसप्तविᳬ०शतिश्श्चमेनवविᳬ०शतिश्श्चमेनवविᳬ०शतिश्श्चमऽएकत्रिᳬ०शच्चमऽएकत्रिᳬ०-शच्चमेत्रयस्त्रिᳬ०शच्चमेमेयज्ञेनकल्प्पन्ताम्॥२४॥ इत्यष्टमं चमकानुवाकं पठेत् ॥८॥

पुनर्नमस्तेरुद्र इत्यादि (६६) पठित्वा चतस्स्रश्श्चमेष्टौचमेष्टौचमेद्वादशचमेद्वादशचमेषोडशचमेषोडचमेविᳬ०-शतिश्श्चमेव्विᳬ०शतिःश्श्चमेचतुर्व्विᳬ०शतिश्श्चमेचतुर्विᳬ०शतिश्श्चमेष्टाविᳬ०शतिश्श्चमेष्टाविᳬ०शतिश्श्चमेद्वात्रिᳬ०-शच्चमेद्वात्रिᳬ०शच्चमेषट्त्रिᳬ०शच्चमेचत्वारिᳬ०शच्चमेचत्वारिᳬ०शच्चमेचतुश्श्चत्वारिᳬ०शच्चमेचतुश्श्चत्वारिᳬ०शच्चमेष्टा-चत्वारिᳬ०शच्चमेयज्ञेनकल्प्पन्ताम्॥२५॥ इति नवमं चमकानुवाकं पठेत्॥९॥

पुनर्नमस्तेरुद्र इत्यादि (६६) पठित्वा त्र्यविश्श्चमेत्र्यवीचमेदित्यवाट्चमेदित्यौहीचमेपञ्चाविश्श्चमेपञ्चा-वीचमेत्रिवत्सश्श्चमेत्रिवत्साचमेतुर्य्यवाट्चमेतुर्य्यौहीचमेयज्ञेनकल्प्पन्ताम्॥२६॥ षष्ठवाट्चमेषष्ठौहीचमऽउक्षाचमेव्व-शाचमऽऋषभश्श्चमेव्वेहच्चमेनड्वाँश्श्चमेधेनुश्श्चमेयज्ञेनकल्प्पन्ताम्॥२७॥ इति दशमानुवाकं पठेत्।

इति केवलानि नव पठित्वा पुनर्नमस्ते (६६) इत्यादि पठित्वा ॐ व्वाजायस्वाहाप्प्रसवायस्वाहापिजाय-स्वाहाक्क्रतवेस्वाहाव्वसवेस्वाहाहर्प्पतयेस्वाहाह्नेमुग्ग्धायस्वाहामुग्ग्धायव्वैनᳬ०शिनायस्वाहाव्विनᳬ०शिनऽआन्त्यायनाय-

स्वाहान्त्यायभौवुनायुस्वाहाभुवनस्युपतयेस्वाहाधिपतयेस्वाहाप्प्रजापतयेस्वाहाइयन्तेराण्मित्रार्ययन्तासियमनऽऊर्ज्जे-त्वाव्वृष्ट्यैत्वाप्प्रजानान्त्वाधिपत्याय॥२८॥ आयुर्य्यज्ञेन कल्प्यताम्प्प्राणोयज्ञेनकल्प्यताञ्चक्षुर्य्यज्ञेनकल्प्यताᳫंश्श्रोत्रं-यज्ञेनकल्प्यताम्वाग्ग्यज्ञेनकल्प्यताम्मनोयज्ञेनकल्प्यतामात्मायज्ञेनकल्प्यताम्ब्रह्मायज्ञेनकल्प्यताञ्ज्योतिर्य्यज्ञेनकल्प्यताᳫं-स्वर्य्यज्ञेनकल्प्यताम्पृष्ठंय्यज्ञेनकल्प्यतांयज्ञोयज्ञेनकल्प्यताम्। स्तोमश्श्चयजुश्श्चऽऋक्चसामचवृहश्चरथन्तरञ्चस्वर्देवाऽ-अगन्मामृताऽअभूमप्प्रजापतेᳩप्प्रजाऽअभूम वेट्स्वाहा॥२९॥ इत्येकादशमनुवाकं पठेत्॥११॥ एवमाद्यं रूपं साङ्ग-हृदयादिषडङ्गसहितं पठित्वा ततो नव केवलानि च जप्त्वा अन्त्यमेकादशं वयर्ठ०सोम इत्यादि सशीर्षकं साङ्गं निरङ्गं वा पठेत्।

अथ शीर्षकमनुवाकम्। ॐ वयर्ठ०सोमव्व्रतेतवमनस्तनूषुविब्भ्रतः॥ प्रजावन्तःसचेमहि॥१॥ एषते रुद्रभागःसहस्वस्राम्बिकयातज्जुषस्वस्वाहैषतेरुद्रभागऽआखुस्तेपशुᳩ॥२॥ अवरुद्रमदीमह्यवदेवंत्र्यम्बकम्। यथानो-वस्यसस्करद्यथानःश्श्रेयसस्करद्यथानोव्व्यवसाययात्॥३॥ भेषजमसि भेषजङ्गवेश्श्वायपुरुषायभेषजम्। सुखम्मेषाय-मेष्यै॥४॥ त्र्यम्बकंयजामहेसुगन्धिम्पुष्टिवर्द्धनम्। उर्व्वारुकमिवबन्धनान्मृत्योर्मुक्षीयमामृतात्॥ त्र्यम्बकंयजामहेसुगन्धि-म्पतिवेदनम्। उर्व्वारुकमिवबन्धनादितोमुक्षीयमामुतः॥५॥ एतत्तेरुद्रावसन्तेनपरोमूजवतोतीहि। अवततधन्न्वापिनाका-वसः। कृत्तिवासाऽअहिर्ठ०सन्नःशिवोतीहि॥६॥ त्र्यायुषञ्जमदग्नेःकश्यपस्यत्र्यायुषम्। यद्देवेषुत्र्यायुषन्तन्नोऽअस्तुत्र्या-युषम्॥७॥ शिवोनामासिस्वधितिस्तेपितानमस्तेऽअस्तुमामाहिर्ठ०सीः। निर्वर्तयाम्म्यायुषेन्नाद्यायप्प्रजननायरायस्प्पोषाय-सुप्प्रजास्त्वायसुवीर्य्याय॥८॥ इति पठेत् । एवं साङ्गादिसशिरोऽन्तं जपं कृत्वा तदन्ते ॐ ऋचं वाचम् इत्यादिशान्ति-पाठं पठेत्।

हरिः ॐ ऋचंव्वाचम्प्रपद्येमनोयजुःप्प्रपद्येसामप्प्राणम्प्रपद्येचक्षुःश्श्रोत्रंप्रपद्येव्वागोजःसहौजोमयिप्राणापानौ॥१॥ यन्मेछिद्रञ्चक्षुषोहृदयस्यमनसोव्वातितृण्णम्बृहस्पतिर्मेतद्दधातु। शन्नोभवतुभुवनस्ययस्पतिः॥२॥ भूर्भुवᳪस्वः तत्सवितुर्वरेण्यम्भर्गोदेवस्यधीमहि। धियोयोनःप्प्रचोदयात्॥३॥ कयानश्चित्रऽआभुवदूतीसदावृधᳪसखा। कया शचिष्ठयाव्वृता॥४॥ कस्त्वा सत्योमदानांमर्ठ०हिष्ठोमत्सदन्धसᳪ। दृढाचिदारुजेव्वसु॥५॥ अभीषुणःसखी-नामविताजरितॄणाम्। शतम्भवास्यूतिभिः॥६॥ कयात्वन्नऽऊत्याभिप्रमन्दसेव्वृषम्। कयास्तोतृभ्यऽआभर॥७॥ इन्द्रोव्विश्श्वस्यराजतिशन्नोऽअस्तुद्विपदेशञ्चतुष्पदे॥८॥ शन्नोमित्रᳩशंवरुणःशन्नोभवत्वर्य्यमा। शन्नऽइन्द्रोबृहस्पतिः शन्नोविष्णुरुरुक्रमᳪ॥९॥ शन्नोव्वातःपवताᳫंशन्नस्तपतुसूर्य्यः। शन्नःकनिक्क्रदद्देवᳪपर्ज्जन्योऽअभिवर्षतु॥१०॥ अहानिशम्भवन्तुनःशर्ठ०रात्रिःप्प्रतिधीयताम्। शन्नऽइन्द्राग्नीभवतामवोभिःशन्नऽइन्द्रावरुणारातहव्या। शन्नऽइन्द्रापूष-णाव्वाजसातौशमिन्द्रासोमासुवितायशंय्योᳩ॥११॥ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये। शंय्योरभिस्स्रवन्तुनः॥१२॥ स्योनापृथिविनोभवानृक्षरानिवेशनी यच्छानःशर्म्मसप्प्रथाः॥१३॥ आपोहिष्ठामयोभुवस्तानऽऊर्ज्जेदधातन। महेरणाय चक्षसे॥१४॥ योवःशिवतमोरसस्तस्यभाजयतेहनः। उशतीरिवमातरः॥१५॥ तस्माऽअरङ्गमामवोयस्यक्षयायजिन्न्वथ। आपोजनयथाचनः॥१६॥ द्यौᳪ शान्तिरन्तरिक्षर्ठ०शान्तिःपृथिवीशान्तिरापःशान्तिरोषधयःशान्तिः। वनस्प्पतयःशान्ति-र्विश्श्वेदेवाᳩशान्तिर्ब्रह्मशान्तिःसर्वर्ठ०शान्तिःशान्तिरेवशान्तिःसामाशान्तिरेधि॥१७॥ दृतेदृर्ठ०हमामित्रस्यमाचक्षुषा सर्व्वाणिभूतानिसमीक्षन्ताम्। मित्रस्याहञ्चक्षुषासर्वाणिभूतानिसमीक्षे। मित्रस्यचक्षुषासमीक्षामहे॥१८॥ दृतेदृर्ठ० हमा०। ज्ज्योक्तेसन्दृशिजीव्व्यासञ्ज्योक्तेसन्दृशिजीव्व्यासम्॥१९॥ नमस्तेहरसेशोचिषेनमस्तेऽअस्त्वर्चिषे। अन्न्याँस्तेऽअस्मत्त-पन्तुहेतयःपावकोऽअस्मब्भ्यर्ठ०शिवोभव॥२०॥ नमस्तेऽअस्तुव्विद्युतेनमस्तेस्तनयित्नवे। नमस्तेभगवन्नस्तुयतᳪ-स्वःसमीहसे॥२१॥ यतोयतᳩसमीहसेततोनोऽअभयङ्कुरु। शन्नः कुरुप्प्रजाभ्योभयन्नःपशुभ्यः॥२२॥ सुमित्त्रियानऽ-

आपुऽओषधयःसन्तु। दुर्मित्रियास्तस्मैसन्तुयोस्मान्द्वेष्टियञ्चव्वयंद्विष्मः॥२३॥ तच्चक्षुर्द्देवहितम्पुरस्ताच्छुक्रमुच्चरत्। पश्येमशरदःशतञ्जीवेमशरदःशतठंशृणुयामशरदः शतम्प्रब्रवामशरदःशतमदीनाःस्यामशरदःशतम्भूयश्चशरदः शतात्॥२४॥ ॐ शान्तिः शान्तिः शान्तिः इति शान्तिपाठं पठेत्। एवं कर्तुमशक्तश्चेत्तदा दशाक्षरं यथाशक्ति जपेत्। ततः ॐ इमारुद्रायतवसेकपर्द्दिनेक्षयद्वीराय प्रभरामहेमतीः। यथाशमसद्द्विपदेचतुष्पदेविश्वम्पुष्टग्रामेऽअस्मिन्ननातुरम्॥१॥ इति मन्त्रेण अर्घपात्रोदकं गृहीत्वा देवदक्षिणे धर्मार्थकाममोक्षादिष्वीप्सितफलप्राप्त्यर्थं यथाशक्ति यत्कृतरूपादिजपेन स्वयं वा ऋत्विग्द्वारा कारितेन प्रणतजनानुकम्पी सच्चिदानन्दरूपपरमात्मा श्रीसदाशिवमहारुद्रः प्रीयतामिति पठित्वोत्सृजेत्। ततो देवाभिमुखः कृताञ्जलिपुटः सन्—

ॐ जपन्यासार्चनं देव यत्कृतं तु मयाद्य वै। न्यूनातिदोषरहितं कृतं कर्म्म मया प्रभो॥
भवत्वेतत्कृपासिन्धो क्षमस्व च नमोऽस्तु ते। पूजान्यासादिकं देव कृतं यत्त्वदनुग्रहात्॥
तेन मत्कर्म्मणा रुद्र प्रीतो भव वरप्रदः। नमः शिवाय शान्ताय सगणायादिहेतवे॥
निवेदयामि चात्मानं त्वं गतिः परमेश्वरः। न्यूनातिरिक्तं तत्पूर्णं प्रसादात्तव शङ्कर॥
एतत्कृतेन देवेश सदा मे वरदो भव।

एवं देवं क्षमाप्य आत्मानं निवेद्य पुष्पाञ्जलिं दत्त्वा पुनः स्तुत्वा मन्त्रहीन०॥१॥ आवाहनं न जानामि०॥२॥ इति साष्टाङ्गं प्रणमेत्।

एवं प्रत्यहं कृत्वा पञ्चरुद्राणां मध्ये यस्य रुद्रस्य यावद्भिर्ब्राह्मणैर्यावद्भिर्दिनैः पूर्वं सङ्कल्पः कृतस्तावत्पर्यन्तमुक्तप्रकारेण अक्षारलवणाशनाधःशयनादिनियमैर्जपं कुर्य्यात्। ततः समाप्ते जपे जपोक्तप्रकारेण समग्रं दशांशेन वा शतांशेन तिलादिद्रव्यैर्होमादिकं कुर्यात्। अभिषेके तु शिवमूर्ध्नि हिरण्यादिकलशेन सन्ततधारां मधुना सर्पिषा पयसा वेक्षुरसेन नारिकेलोदकेन वाऽऽम्ररसेन वा कदलीभवेन रसेन शुद्धोदकेन वा निषिञ्चेत्। पूर्वोक्तपूजादिकं कृत्वा अभिषेकः कर्तव्यः।

रुद्रजप का क्रम—(शुक्लयजुर्वेदीय रुद्राष्टाध्यायी के पञ्चमाध्याय) मूल में लिखे 'नमस्तेरुद्रमन्यवऽउतोतइषवे नमः। बाहुभ्यामुतते नमः॥' इस प्रथम मन्त्र से लेकर कुल ६६ मन्त्रों का जप (पाठ) करे। रुद्राध्याय के उपरान्त 'ॐ वाजश्च मे०' इत्यादि चार मन्त्रों के चमकानुवाक को पढ़कर पुनः पूरा 'नमस्ते रुद्र०' इत्यादि ६६ मन्त्रों का नमकाध्याय पढ़े। फिर आगे के 'ॐ सत्यञ्च मे श्रद्धा च मे०' इत्यादि पाँचवें से लेकर आठवें मन्त्र तक के चार मन्त्रों का द्वितीय चमकानुवाक पढ़कर पुनः उसी रुद्राध्याय के ६६ मन्त्रों (नमकाध्याय) को पढ़े। फिर 'ऊर्क्क च मे सूनृता च मे०' इत्यादि तृतीय चमकानुवाक के नवें मन्त्र से लेकर बारहवें मन्त्र तक के कुल चार मन्त्रों को (तृतीय चमकानुवाक को) पढ़कर पुनः 'नमस्ते रुद्र०' इत्यादि नमकाध्याय (६६ मन्त्र) पढ़े। फिर 'अश्मा चमे०' इत्यादि चार मन्त्रों के चतुर्थ चमकानुवाक को पढ़कर पुनः ६६ मन्त्रों के रुद्राध्याय (नमकाध्याय) को पढ़े। फिर 'ॐ अग्निश्च मे०' इत्यादि सोलहवें मन्त्र से लेकर अठारहवें मन्त्र-पर्यन्त के तीन मन्त्रों के पाँचवें चमकानुवाक को पढ़कर पुनः 'नमस्ते रुद्र०' इत्यादि नमकाध्याय को पढ़े। फिर 'ॐ अꣳशुश्च मे०' इत्यादि उन्नीसवें मन्त्र से लेकर इक्कीसवें मन्त्र-पर्यन्त के त्रिमन्त्रात्मक छठें चमकाध्याय को पढ़कर पुनः नमकाध्याय को पढ़े। फिर 'अग्निश्च मे धर्मश्च मे०' इत्यादि दो मन्त्रों के सप्तम चमकाध्याय को पढ़कर पुनः नमकाध्याय पढ़े। फिर 'एका च मे, तिस्रश्च मे०' इत्यादि चौबीसवें मन्त्र के अष्टम चमकानुवाक को पढ़कर पुनः 'नमस्ते रुद्र' इत्यादि ६६ मन्त्रों के नमकाध्याय को पढ़े। फिर 'चतस्रश्च मे०' इत्यादि पच्चीसवें मन्त्र के

एकमन्त्रात्मक नवम चमकानुवाक को पढ़कर पुनः नमकाध्याय पढ़े। फिर 'त्र्यविश्च मे त्र्यवी च मे०' इत्यादि छब्बीसवें तथा सत्ताईसवें मन्त्रयुक्त दशम चमकानुवाक को पढ़कर पुनः नमकाध्याय का पाठ करे। तदुपरान्त 'ॐ वाजाय स्वाहा प्रसवाय स्वाहा०' इत्यादि अट्ठाइसवें उन्तीसवें मन्त्रों के ग्यारहवें चमकानुवाक को पढ़े। फिर उसके आगे 'वयः सोम०' इत्यादि आठ मन्त्रों के शीर्षानुवाक को पढ़े। तदुपरान्त 'ॐ ऋचं वाचं प्रपद्ये०' इत्यादि २४ मन्त्रों के शान्तिपाठ को पढ़ना चाहिये। तदुपरान्त 'ॐ इमा रुद्रायतवसे०' इत्यादि मन्त्र से अर्घपात्र के अर्घोदक द्वारा देवता के दक्षिण पार्श्व में अर्घ्य दे। फिर देवता के सम्मुख हाथ जोड़कर 'ॐ जपन्यासार्चनं देव०' इत्यादि चार श्लोकों (मूल में लिखित) तथा 'मन्त्रहीनं क्रियाहीनं' एवं 'आवाहनं न जानामि०' इन श्लोकों को पढ़कर साष्टाङ्ग प्रणाम करना चाहिये। यह सब क्रिया प्रतिदिन करके जिस रुद्र के लिये जितनी सङ्ख्या के ब्राह्मणों द्वारा जप पूर्वसङ्कल्प के अनुसार कराया है तथा जितने दिनों का सङ्कल्प किया है, उतने दिन-पर्यन्त उक्त प्रकार से क्षार तथा लवण रहित भोजन करते हुए, भूमि पर शयन करते हुए जप को समाप्त करे और जपोक्त प्रकार से दशांश अथवा शतांश होम तिलादि द्रव्यों से करना चाहिये। अभिषेक शिव के शिर पर सुवर्ण आदि धातु के कलश (अभाव में ताम्रकलश) से मधु, घृत, गोदुग्ध, ईख के रस, नारियल के पानी, आम के रस अथवा केले के स्वरस और शुद्ध जल से पूर्वोक्त पूजा करके करना चाहिये।

रुद्रहोमविधिः

तत्र तावत् जपान्ते मण्डपं छायामण्डपं वा यथावत्कृत्वा तन्मध्ये होमानुसारेण चतुरस्रं कुण्डं सलक्षणं विधाय तदीशान्यां रुद्रवेदीं नवग्रहमखपक्षे तत्रैव ग्रहवेदीं च कुर्य्यात्। ततः सुमुहूर्त्ते ॐ भद्रं कर्णेभिरित्यादिवेदघोषेण पश्चिमद्वारतो मण्डपं प्रविश्य रुद्रवेदीपश्चिमतः स्वासने प्राङ्मुख उपविश्य स्वदक्षिणस्थपत्न्या समारब्धः सपवित्रकरो मूलेनाचम्य प्राणानायम्य आनोभद्रा इत्यादिशान्तिपाठं पठित्वा सुमुखश्चेत्यादि गणपतिस्मरणपूर्वकं देशकालौ सङ्कीर्त्य 'अमुकगोत्रोऽमुकशर्माहममुकफलावाप्त्यै श्रीपरमेश्वरप्रीत्यर्थं स्वयं ब्राह्मणद्वारा वा कृतस्यामुकरुद्रजपस्य साङ्गता-सिद्ध्यर्थं समग्रं वा जपदशांशेन वा शतांशतस्तिलादिद्रव्यैर्होमं करिष्ये' इति सङ्कल्प्य गणेशपूजनं पुण्याहवाचनं मातृकापूजनं नान्दीश्राद्धमाचार्यादिवरणं दिग्रक्षणं च पूर्वोक्तपद्धतिकाण्डमार्गेण सर्वं कुर्यात्। ततः कुण्डे अग्निं प्रतिष्ठाप्य ग्रहपीठे ग्रहान् सम्पूज्य तदीशान्यां कलशं संस्थापयेत्। ततो रुद्रपीठे वस्त्रं प्रसार्य्य तत्र द्वादशलिङ्गतोभद्रं तन्मध्ये रुद्रयन्त्रं च विलिख्य तन्मध्ये ताम्रकलशोपरि पलसुवर्णेन तदर्द्धेन वा रचितां रुद्रप्रतिमां सावयवां संस्थाप्य प्राणप्रतिष्ठां कृत्वा मूलमन्त्रेण पुष्पान्तैरुपचारैः सम्पूज्य पूर्वोक्तयन्त्रावरणदेवतापूजां कृत्वा रुद्रं धूपदीपनैवेद्यताम्बूलदक्षिणानीराजनैरभ्यर्च्य साष्टाङ्गं प्रणम्य स्तुतिपाठैः स्तुत्वा होमं कुर्य्यात्। तत्राघारावाज्यभागान्ते ग्रहादिहोमं कृत्वा तिलपायसाज्यैः प्रधानदेवरुद्रहोमं कुर्य्यात्। तत्र होमक्रमः—होमस्तु त्रेधा, समग्रहोमः, जपदशांशहोमः शतांशहोमश्च। तत्राद्यः प्रधानभूतो जपाङ्गभूतश्च उत्तरौ त्वङ्गभूतावेवेति महार्णवः।'

रुद्रहोम-विधि—फिर जप की समाप्ति पर मण्डप अथवा छायामण्डप विधिपूर्वक बनाकर उसमें होम की आवश्यकता के अनुसार चौकोर लक्षणयुक्त कुण्ड बनाये। ईशान कोण में रुद्रवेदी तथा नवग्रहमख में उसी कोण में ग्रहवेदी बनाये। फिर सुमुहूर्त में 'ॐ भद्रं कर्णेभिः शृणुयाम देवा०' इत्यादि मन्त्रों का उच्चारण करते हुए पश्चिम द्वार से मण्डप में प्रवेश करके रुद्रवेदी के पश्चिम में अपने आसन पर पूर्वाभिमुख बैठकर अपने दक्षिण भाग में पत्नी को बैठाकर हाथों में पवित्री धारण करके मूल मन्त्र से आचमन तथा प्राणायाम करने के उपरान्त 'आनोभद्रा०' इत्यादि मन्त्रों से शान्तिपाठ पढ़कर 'सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः' इत्यादि श्लोकों को पढ़े।

फिर देश-कालादि का उच्चारण करके मूल में लिखित 'अमुकगोत्रोऽमुकशर्मा (वर्मा अथवा गुप्ता अथवा दासो) अहं अमुकफलावाप्त्यै श्रीपरमेश्वरप्रीत्यर्थं स्वयं वा ब्राह्मणद्वारा०' इत्यादि कहकर सङ्कल्प करे। तदनन्तर गणेशपूजन, पुण्याहवाचन, मातृकापूजन, नान्दीश्राद्ध, आचार्यादिवरण, दिग्रक्षण आदि सभी कर्म पूर्व में पद्धतिकाण्ड में कथित विधि से करे। फिर कुण्ड में अग्नि को स्थापित कर, ग्रहपीठ पर ग्रहों को पूजकर उसके ईशान में कलश स्थापित करे। फिर रुद्रपीठ पर वस्त्र बिछाकर द्वादशलिङ्गतोभद्र मण्डल बनाये। उस मण्डल के मध्य में रुद्रयन्त्र लिखे। उस रुद्रयन्त्र के मध्य में ताम्र कलश के ऊपर दो पल (आठ तोला = लगभग १०० ग्राम) सुवर्ण धातु की प्रतिमा अथवा एक पल (५० ग्राम) की रुद्रप्रतिमा सावयव बनवाकर उसकी प्राणप्रतिष्ठा कर मूल मन्त्र से पुष्पान्त तक उपचार से पूजन करे। फिर पूर्वोक्त यन्त्रावरण के देवताओं की पूजा करके रुद्र को धूप, दीप, नैवेद्य, ताम्बूल, दक्षिणा, नीराजन से अर्चित कर साष्टांग प्रणाम कर स्तुतिपाठों से स्तुति कर होम करे। होम में आघाराहुति, आज्यभाग तथा ग्रहहोम करके तिल, पायस तथा घृत से प्रधान देव रुद्रदेव का होम करे। होम तीन प्रकार का होता है—१. समग्र होम, २. जपदशांश होम तथा ३. शतांश होम। महार्णव के अनुसार समग्र होम प्रधान-भूत तथा जपाङ्गभूत होता है। दशांश तथा शतांश—ये दोनों अङ्गभूत होते हैं।

प्रधानरुद्रहोमः

तत्रादौ ऋत्विजः प्राङ्मुखा उदङ्मुखाश्च कुण्डसमीपे स्थित्वा भूतशुद्ध्यादिमातृकान्यासान्तं कृत्वा पूर्वोक्तरुद्रपञ्चाङ्गन्यासान् कुर्युः। ततः पञ्चाङ्गमन्त्रैः पञ्चभिः पञ्चाहुतीर्हुत्वा रुद्रहोमः कार्यः। तद्यथा—यज्जाग्रत इति षडर्चेन एकाहुतिम्। सहस्रशीर्षेति षोडशर्चेन सूक्तेनैकाहुतिम्। अद्भ्यः सम्भृत इति षडर्चेन एकाहुतिम्। आशुः शिशान इति द्वादशर्चेन एकाहुतिम्। विभ्राड् इति सप्तदशर्चेन एकाहुतिं च हुत्वा ततः प्रधानभूतेन रुद्राध्यायेन होमः।

अथ प्रधानरुद्रहोमक्रमः। स च एकधा १ त्रेधा २ षोढा ३ षोडशधा ४ चतुश्चत्वारिंशद्धा ५ अष्टाचत्वारिंशद्धा ६ एकषष्ट्युत्तरशतधा ७ पञ्चविंशत्युत्तरचतुःशतधा चेति ८ अष्टविभागानामन्यतमं पक्षमङ्गीकृत्य होमं कुर्यात्।

प्रधान रुद्रहोम—सभी ऋत्विज (वरित ब्राह्मण) पूर्व की ओर अथवा उत्तर की ओर मुख करके बैठें। भूतशुद्धि तथा मातृकान्यास-पर्यन्त सभी कर्म करके पूर्वकथित रुद्रपञ्चाङ्ग न्यासों को करे। फिर पञ्चाङ्ग मन्त्रों के द्वारा पाँच आहुतियों से होम कर रुद्रहोम करना चाहिये। वह इस प्रकार है—(१) 'यज्जाग्रतो०' इत्यादि छः ऋचाओं से एक आहुति दे। (२) 'सहस्रशीर्षा०' इत्यादि सोलह ऋचाओं से एक आहुति दे। (३) 'अद्भ्यः संभृतं' इत्यादि छः ऋचाओं से एक आहुति दे। (४) 'आशुः शिशानो०' इत्यादि बारह ऋचाओं से एक आहुति दे तथा (५) 'ॐ विभाड् बृहत्०' इत्यादि सत्रह ऋचाओं से एक आहुति दे। इस प्रकार पाँच आहुतियाँ देकर फिर प्रधानभूत रुद्राध्याय से होम करना चाहिये।

प्रधान रुद्रहोम के आठ भेद—प्रधान रुद्रहोम के ग्रन्थों में आठ पक्ष (भेद) वर्णित है—१. एकधा, २. त्रेधा, ३. षोढा (छः भाग), ४. षोडशधा (१६), ५. चतुश्चत्वारिंशद्धा (४४), ६. अष्टाचत्वारिंशद्धा (४८), ७. एकषष्ट्युत्तरशतधा (१६१), ८. पञ्चविंशत्युत्तरचतुश्शतधा (४२५)। इन आठ भेदों में किसी भी एक भेद को चुनकर उसके अनुसार होम करना चाहिये।

अत्र एकषष्ट्युत्तरशतधा मन्त्रविभागपक्षेण होमः; तत्र मन्त्राः—ॐ नमस्ते रुद्र० स्वाहा॥ १॥ ॐ याते रुद्र शिवा० स्वाहा॥ २॥ ॐ यामिषुङ्गिरि० स्वाहा॥ ३॥ ॐ शिवेनवचसा० स्वाहा॥ ४॥ ॐ अध्यवोच० स्वाहा॥ ५॥ ॐ

असौयस्ताम्रो० स्वाहा ॥ ६ ॥ (मन्त्रान्ते स्वाहापदं सर्वत्र ज्ञेयम्)। ॐ असौयोव० ॥ ७ ॥ ॐ नमोस्तुनीलग्रीवा० ॥ ८ ॥ ॐ प्रमुञ्चधन्व० ॥ ९ ॥ ॐ विज्यन्धनु० ॥ १० ॥ ॐ यातेहेति० ॥ ११ ॥ ॐ परिते धन्वनो० ॥ १२ ॥ ॐ अवतत्य० ॥ १३ ॥ ॐ नमस्तऽआयुधाया० ॥ १४ ॥ मानो महान्त० ॥ १५ ॥ ॐ मानस्तोके० ॥ १६ ॥ ॐ नमो हिरण्यवाहवे सेनान्येदिशाञ्च पतये नमः स्वाहा ॥ १७ ॥ ॐ नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनाम्पतये नमः स्वाहा ॥ १८ ॥ ॐ नमः शष्पिञ्जरायत्त्विषीमते-पथीनाम्पतये नमः स्वाहा ॥ १९ ॥ॐ नमो हरिकेशायोपवीतिने पुष्टानाम्पतये नमः स्वाहा ॥ २० ॥ ॐ नमो बब्म्लुशाय व्याधिनेत्रानाम्पतये नमः स्वाहा ॥ २१ ॥ ॐ नमोभवस्यहेत्यैजगताम्पतये नमः स्वाहा ॥ २२ ॥ ॐ नमो रुद्रायाततायिने क्षेत्राणाम्पये नमः स्वाहा ॥ २३ ॥ ॐ नमः सूतायाहन्त्यैवनानाम्पतये नमः स्वाहा ॥ २४ ॥ ॐ नमो रोहितायस्थपतये वृक्षाणाम्पतये नमः स्वाहा ॥ २५ ॥ ॐ नमोभुवन्तयेवारिवस्कृतायौषधीनाम्पतये नमः स्वाहा ॥ २६ ॥ ॐ नमोमन्त्रिणे व्वाणिजायकक्षाणाम्पतये नमः स्वाहा ॥ २७ ॥ ॐ नमऽउच्चैर्ग्घोषायाक्रन्दयतेपत्तीनाम्पतये नमः स्वाहा ॥ २८ ॥ ॐ नमः कृत्स्नायतायधावतेसत्त्वानाम्पतये नमः स्वाहा ॥ २९ ॥ ॐ सहमानायनिव्याधिनऽआव्याधिनीनाम्पतये नमः स्वाहा ॥ ३० ॥ ॐ नमोनिषङ्गिणेककुभायस्तेनानाम्पतये नमः स्वाहा ॥ ३१ ॥ ॐ नमोनिचेरवेपरिचरायारण्यानाम्पतये नमः स्वाहा ॥ ३२ ॥ ॐ नमो व्वञ्चतेपरिवञ्चतेस्तायूनाम्पतये स्वाहा ॥ ३३ ॥ ॐ नमोनिषङ्गिणऽइषुधिमतेतस्कराणाम्पतये नमः स्वाहा ॥ ३४ ॥ ॐ नमः सृकायिभ्योजिघाꣳसद्भ्योमुष्णताम्पतये नमः स्वाहा ॥ ३५ ॥ ॐ नमः सिमद्भ्योनक्तं चरद्भ्यो विकृन्तानाम्पतये नमः स्वाहा ॥ ३६ ॥ ॐ नमऽउष्णीषिणेगिरिचरायकुलुञ्चानाम्पतये नमः स्वाहा ॥ ३७ ॥ ॐ नमऽइषु-मद्भ्योधन्वायिभ्यश्ववो नमः स्वाहा ॥ ३८ ॥ ॐ नम आतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नमः स्वाहा ॥ ३९ ॥ ॐ नम आयच्छद्भ्योस्यद्भ्यश्च वो नमः स्वाहा ॥ ४० ॥ ॐ नमो विसृजद्भ्यो विध्यद्भ्यश्च वो नमः स्वाहा ॥ ४१ ॥ ॐ स्वपद्भ्यो जाग्रद्भ्यश्च वो नमः स्वाहा ॥ ४२ ॥ ॐ नमः शयानेभ्य आसीनेभ्यश्च वो नमः स्वाहा ॥ ४३ ॥ ॐ नमस्तिष्ठद्भ्योधावद्भ्यश्च वो नमः स्वाहा ॥ ४४ ॥ ॐ नमः सभाभ्यः सभापतिभ्यश्च वो नमः स्वाहा ॥ ४५ ॥ ॐ नमोश्वेभ्योश्वपतिभ्यश्च वो नमः स्वाहा ॥ ४६ ॥ ॐ नमऽआव्याधिनीभ्योव्विविध्यन्तीभ्यश्च वो नमः स्वाहा ॥ ४७ ॥ ॐ नम उगणाभ्यस्तृꣳहतीभ्यश्च वो नमः स्वाहा ॥ ४८ ॥ ॐ नमोगणेभ्यो गणपतिभ्यश्च वो नमः स्वाहा ॥ ४९ ॥ ॐ नमो व्व्रातेभ्यो व्व्रातपतिभ्यश्च वो नमः स्वाहा ॥ ५० ॥ ॐ नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमः स्वाहा ॥ ५१ ॥ ॐ नमोव्विरूपेभ्योविश्वरूपेभ्यश्च वो नमः स्वाहा ॥ ५२ ॥ ॐ नमः सेनाभ्यः सेनानिभ्यश्च वो नमः स्वाहा ॥ ५३ ॥ ॐ नमोरथिभ्योऽअरथेभ्यश्च वो नमः स्वाहा ॥ ५४ ॥ ॐ नमः क्षत्रिभ्यः सङ्ग्रहीतृभ्यश्च वो नमः स्वाहा ॥ ५५ ॥ ॐ नमो महद्भ्योअर्भकेभ्यश्च वो नमः स्वाहा ॥ ५६ ॥ ॐ नमस्तक्षभ्योरथकारेभ्यश्च वो नमः स्वाहा ॥ ५७ ॥ ॐ नमः कुलालेभ्यः कर्म्मारेभ्यश्च वो नमः स्वाहा ॥ ५८ ॥ ॐ नमो निषादेभ्यः पुञ्जिष्ठेभ्यश्च वो नमः स्वाहा ॥ ५९ ॥ ॐ नमः श्वनिभ्यो मृगयुभ्यश्च वो नमः स्वाहा ॥ ६० ॥ ॐ श्वभ्यः श्वपतिभ्यश्श्च वो नमः स्वाहा ॥ ६१ ॥ ॐ नमो भवाय च रुद्राय च स्वाहा ॥ ६२ ॥ ॐ नमः शर्वाय च पशुपतये च स्वाहा ॥ ६३ ॥ ॐ नमो नीलग्रीवाय च शितिकण्ठाय च स्वाहा ॥ ६४ ॥ ॐ नमः कपर्दिने च व्युप्तकेशाय च स्वाहा ॥ ६५ ॥ ॐ नमः सहस्राक्षाय च शतधन्वने च स्वाहा ॥ ६६ ॥ ॐ नमो गिरिशयाय च शिपिविष्टाय च स्वाहा ॥ ६७ ॥ ॐ नमो मीढुष्टमाय चेषुमते च स्वाहा ॥ ६८ ॥ ॐ नमो ह्रस्वाय च वामनाय च स्वाहा ॥ ६९ ॥ ॐ नमो बृहते च वर्षीयसे च स्वाहा ॥ ७० ॥ ॐ नमो व्वृद्धाय च सवृधे च स्वाहा ॥ ७१ ॥ ॐ नमोग्र्याय च प्रथमाय च स्वाहा ॥ ७२ ॥ ॐ नम आशवेचाजिराय च स्वाहा ॥ ७३ ॥ ॐ नमः शीघ्र्याय च शीभ्याय च स्वाहा ॥ ७४ ॥ ॐ नमः ऊर्म्याय चावस्वन्याय च स्वाहा ॥ ७५ ॥ ॐ नमो नादेयाय च द्वीपाय च स्वाहा ॥ ७६ ॥ ॐ नमो ज्येष्ठाय च कनिष्ठाय च स्वाहा ॥ ७७ ॥ ॐ नमः पूर्वजाय चापरजाय च स्वाहा ॥ ७८ ॥ ॐ नमो मध्यमाय चापगल्भाय च स्वाहा ॥ ७९ ॥ ॐ नमो जघन्याय च बुध्याय च

स्वाहा ॥ ८० ॥ ॐ नमः सोभ्याय च प्रतिसर्य्याय च स्वाहा ॥ ८१ ॥ ॐ नमो याम्याय च क्षम्याय च स्वाहा ॥ ८२ ॥ ॐ नमः श्लोकाय चावसान्याय च स्वाहा ॥ ८३ ॥ ॐ नम उर्व्वर्य्याय च खल्याय च स्वाहा ॥ ८४ ॥ ॐ नमो व्वन्याय च कक्ष्याय च स्वाहा ॥ ८५ ॥ ॐ नमः श्रवाय च प्रतिश्रवाय च स्वाहा ॥ ८६ ॥ ॐ नम आशुषेणाय चाशुरथाय च स्वाहा ॥ ८७ ॥ ॐ नमः शूराय चावभेदिने च स्वाहा ॥ ८८ ॥ ॐ नमो बिल्मिने च कवचिने च स्वाहा ॥ ८९ ॥ ॐ नमो व्वर्मिणे च व्वरूथिने च स्वाहा ॥ ९० ॥ ॐ नमः श्रुताय च श्रुतसेनाय च स्वाहा ॥ ९१ ॥ ॐ नमो दुन्दुभ्याय चाहनन्याय च स्वाहा ॥ ९२ ॥ ॐ नमो धृष्णवे च प्रमृशाय च स्वाहा ॥ ९३ ॥ ॐ नमो निषङ्गिणे चेषुधिमते च स्वाहा ॥ ९४ ॥ ॐ नमस्तीक्ष्णेषवे चायुधिने च स्वाहा ॥ ९५ ॥ ॐ नमः स्वायुधाय च सुधन्वने च स्वाहा ॥ ९६ ॥ ॐ नमः स्रुत्याय च पथ्याय च स्वाहा ॥ ९७ ॥ ॐ नमः काट्याय च नीप्याय च स्वाहा ॥ ९८ ॥ ॐ नमः कुल्याय च सरस्याय च स्वाहा ॥ ९९ ॥ ॐ नमो नादेयाय च व्वैशन्ताय च स्वाहा ॥ १०० ॥ ॐ नमः कूप्याय चावट्याय च स्वाहा ॥ १०१ ॥ ॐ नमो व्वीध्रयाय च तप्याय च स्वाहा ॥ १०२ ॥ ॐ नमो मेघ्याय च विद्युत्त्याय च स्वाहा ॥ १०३ ॥ ॐ नमो व्वर्ष्याय च वर्ष्याय च स्वाहा ॥ १०४ ॥ ॐ नमो व्वात्याय च रेष्म्याय च स्वाहा ॥ १०५ ॥ ॐ नमो व्वास्तव्व्याय च व्वास्तुपाय च स्वाहा ॥ १०६ ॥ ॐ नमः सोमाय च रुद्राय च स्वाहा ॥ १०७ ॥ ॐ नमस्ताम्राय चारुणाय च स्वाहा ॥ १०८ ॥ ॐ नमः शङ्गवे च पशुपतये च स्वाहा ॥ १०९ ॥ ॐ नम उग्राय च भीमाय च स्वाहा ॥ ११० ॥ ॐ नमोग्रेवधाय च दूरेवधाय च स्वाहा ॥ १११ ॥ ॐ नमो हन्त्रे च हनीयसे च स्वाहा ॥ ११२ ॥ ॐ नमो व्वृक्षेभ्यो हरिकेशेभ्यः स्वाहा ॥ ११३ ॥ ॐ नमस्ताराय स्वाहा ॥ ११४ ॥ ॐ नमः शम्भवाय च मयोभवाय च स्वाहा ॥ ११५ ॥ ॐ नमः शङ्कराय च मयस्कराय च स्वाहा ॥ ११६ ॥ ॐ नमः शिवाय च शिवतराय च स्वाहा ॥ ११७ ॥ ॐ नमः पार्य्याय चावार्य्याय च स्वाहा ॥ ११८ ॥ ॐ नमः प्रतरणाय चोत्तरणाय च स्वाहा ॥ ११९ ॥ ॐ नस्तीर्थ्याय च कूल्याय च स्वाहा ॥ १२० ॥ ॐ नमः शष्प्याय च फेन्याय च स्वाहा ॥ १२१ ॥ ॐ नमः सिकत्याय च प्रवाह्याय च स्वाहा ॥ १२२ ॥ ॐ नमः किर्ठ०शिलाय च क्षयणाय च स्वाहा ॥ १२३ ॥ ॐ नमः कपर्दिने च पुलस्तये च स्वाहा ॥ १२४ ॥ ॐ नमः इरिण्याय च प्रपथ्याय च स्वाहा ॥ १२५ ॥ ॐ नमो व्रज्याय च गोष्ठ्याय च स्वाहा ॥ १२६ ॥ ॐ नमस्तल्प्याय च गेह्याय च स्वाहा ॥ १२७ ॥ ॐ नमो हृदय्याय च निवेष्याय च स्वाहा ॥ १२८ ॥ ॐ नमः काट्याय च गह्सरेष्ठाय च स्वाहा ॥ १२९ ॥ ॐ नमः शुष्क्याय च हरित्त्याय च स्वाहा ॥ १३० ॥ ॐ नमः पाᳫँसव्याय च रजस्याय च स्वाहा ॥ १३१ ॥ ॐ नमो लोप्याय चोलप्याय च स्वाहा ॥ १३२ ॥ ॐ नम ऊर्व्याय च सूर्व्याय च स्वाहा ॥ १३३ ॥ ॐ नमः पर्णाय च पर्णशदाय च स्वाहा ॥ १३४ ॥ ॐ नम उद्गुरमाणाय चाभिघ्नते च स्वाहा ॥ १३५ ॥ ॐ नम आखिदते च प्रखिदते च स्वाहा ॥ १३६ ॥ ॐ नम इषुकृद्भ्यो धनुष्कृद्भ्यश्च वो नमः स्वाहा ॥ १३७ ॥ ॐ नमो वः किरिकेभ्यो देवानार्ठ० हृदयेभ्यः स्वाहा ॥ १३८ ॥ ॐ नमो व्विचिन्वत्केभ्यः स्वाहा ॥ १३९ ॥ ॐ नमो व्विक्षिणत्केभ्यः स्वाहा ॥ १४० ॥ ॐ नम आनिर्हतेभ्यः स्वाहा ॥ १४१ ॥ ॐ द्रापेऽअन्धस० स्वाहा ॥ १४२ ॥ ॐ इमारुद्राय० स्वाहा ॥ १४३ ॥ ॐ यातेरुद्र० स्वाहा ॥ १४४ ॥ ॐ परिनोरुद्रस्य० स्वाहा ॥ १४५ ॥ ॐ मीढुष्टमशिवतम० स्वाहा ॥ १४६ ॥ ॐ विकिरिद्रविलोहित० स्वाहा ॥ १४७ ॥ ॐ सहस्राणि सहस्रशो० स्वाहा ॥ १४८ ॥ ॐ असङ्ख्याता सहस्राणि स्वाहा ॥ १४९ ॥ ॐ अस्मिन्महत्यर्णवे स्वाहा ॥ १५० ॥ ॐ नीलग्रीवाः शितिकण्ठा० स्वाहा ॥ १५१ ॥ ॐ नीलग्रीवाः क्षितिकण्ठाः शर्वा० स्वाहा ॥ १५२ ॥ ॐ ये वृक्षेषु स्वाहा ॥ १५३ ॥ ॐ ये भूतानामधिपतयो० स्वाहा ॥ १५४ ॥ ॐ ये पथाम्पथि० स्वाहा ॥ १५५ ॥ ॐ ये तीर्थानि० स्वाहा ॥ १५६ ॥ ॐ येन्नेषुव्विविद्ध्यन्ति० स्वाहा ॥ १५७ ॥ ॐ यऽएतावन्तश्च० स्वाहा ॥ १५८ ॥ ॐ नमोस्तु रुद्रेभ्यो ये दिवि० स्वाहा ॥ १५९ ॥ ॐ नमोस्तु रुद्रेभ्यो येन्तरिक्षे० स्वाहा ॥ १६० ॥ ॐ नमोस्तु रुद्रेभ्यो ये पृथिव्यां० स्वाहा ॥ १६१ ॥

एवमेकषष्ट्युत्तरशतधामन्त्रविभागपक्षहोमं घृताक्ततिलाहुतिभिः कृत्वा।

१६१ आहुतिपक्ष से होम—यहाँ पर १६१ मन्त्रों से आहुति देकर प्रधान देवता के होम करने की विधि बताई गयी है, जिसमें मूल में लिखित 'ॐ नमस्ते रुद्रमन्यव उतोत इषवे नमः' इत्यादि १६१ मन्त्रविभागों द्वारा घृत से युक्त तिल की आहुतियाँ देकर फिर आगे लिखे प्रकार से नमक-चमकयुक्त आहुतियाँ देनी चाहिये।

ॐ वाजश्चमे० ॥ १ ॥ ॐ प्राणश्चमे० ॥ २ ॥ ॐ ओजश्चमे० ॥ ३ ॥ ॐ ज्यैष्ठ्यञ्चमऽआधिपत्त्यञ्चमे० स्वाहा ॥ ४ ॥ इत्याद्यचमकानुवाकहोमं कुर्य्यात् ॥ १ ॥ पुनः ॐ नमस्तेरुद्र० इत्याद्येकषष्ट्युत्तरशतधा होमं कृत्वा ॐ सत्यञ्चमे० ॥ ५ ॥ ॐ ऋतञ्चमे० ॥ ६ ॥ ॐ यन्ताचमे० ॥ ७ ॥ ॐ शञ्चमेमयश्चमे स्वाहा० ॥ ८ ॥ इति द्वितीयचमकानुवाक होमं कुर्यात् ॥ २ ॥ ततः पुनः ॐ नमस्ते रुद्र० इत्यादि (१६१) होमं कृत्वा ॐ ऊर्क्कर्चमेसूनृताचमे० ॥ ९ ॥ ॐ रयिश्चमे० ॥ १० ॥ ॐ व्वित्तञ्चमे० ॥ ११ ॥ ॐ व्व्रीहयश्चमे० स्वाहा ॥ १२ ॥ इति तृतीयचमकानुवाकहोमं कुर्यात् ॥ ३ ॥ पुनः ॐ नमस्ते रुद्र० इत्यादि (१६१) होमं कृत्वा ॐ अश्माचमे० ॥ १३ ॥ ॐ अग्निश्चमऽआपश्चमे० ॥ १४ ॥ ॐ व्वसुचमे० स्वाहा ॥ १५ ॥ इति चतुर्थानुवाकहोमं कुर्यात् ॥ ४ ॥ पुनः ॐ नमस्तेरुद्र० इत्यादि (१६१) होमं कृत्वा ॐ अग्निश्चमऽइन्द्रश्चमे० ॥ १६ ॥ ॐ मित्रश्चमइन्द्रश्चमे० ॥ १७ ॥ ॐ पृथिवीचम० स्वाहा ॥ १८ ॥ इति पञ्चमानुवाकहोमं कुर्यात् ॥ ५ ॥ पुनः ॐ नमस्ते० इत्यादि ॥ १६१ ॥ होमं कृत्वा—ॐ अꣳशु० शुश्चमे० ॥ १९ ॥ ॐ आग्रयणश्चमे० ॥ २० ॥ ॐ स्रुवश्चमे० स्वाहा ॥ २१ ॥ इति षष्ठानुवाकहोमः ॥ ६ ॥ पुनः ॐ नमस्ते० इत्यादि (१६१) होमं कृत्वा ॐ अग्निश्चमे० ॥ २२ ॥ ॐ व्व्रतञ्चम० स्वाहा ॥ २३ ॥ इति सप्तमानुवाकहोमः ॥ ७ ॥ पुनः ॐ नमस्ते० इत्यादि (१६१) होमं कृत्वा ॐ एकाचमे० स्वाहा ॥ २४ ॥ इत्यष्टमानुवाकहोमः ॥ ८ ॥ पुनर्नमस्ते इत्यादि (१६१) हुत्वा ॐ चतस्त्रश्चमे० स्वाहा ॥ २५ ॥ इति नवमानुवाकहोमः ॥ ९ ॥ पुनर्नमस्ते इत्यादि (१६१) हुत्वा ॐ त्र्यविश्चमे० ॥ २६ ॥ ॐ पृष्ठवाट्चमे० स्वाहा ॥ २७ ॥ इति दशानुवाकहोमः ॥ १० ॥ पुनर्नमस्ते इत्यादि (१६१) हुत्वा ॐ व्वाजायस्वाहा० ॥ २८ ॥ ॐ आयुर्य्यज्ञेन० स्वाहा ॥ २९ ॥ इत्येकादशानुवाकहोमं कुर्य्यात् ॥ ११ ॥ एवमेकादशावर्तनेन रूपकाख्यो रुद्रो भवति एकादशावृत्तौ होमान्ते। यज्जाग्रत० इत्यादि ६ सहस्त्रशीर्षा० १६ अद्भ्यः संभृत० ६ आशुः शिशान० १७ विभ्राड्बृहत्० १६ इत्यादिपञ्चसूक्तैः पञ्चाहुतीर्हुत्वा ततो नमस्तेरुद्र० इति रुद्राध्यायेन पूर्वोक्तप्रकारेण हुत्वा होमान्ते एकैकेन चमकविभागेन हुत्वा ॐ ऋतंवाचं० स्वाहा ॥ १ ॥ ॐ यन्मेछिद्रञ्चक्षुषो० स्वाहा ॥ २ ॥ ॐ भूर्भुवः स्वः तत्सवितु० स्वाहा ॥ ३ ॥ ॐ कयानश्चित्र० स्वाहा ॥ ४ ॥ ॐ कस्त्वासत्यो० स्वाहा ॥ ५ ॥ ॐ अभीषुण० स्वाहा ॥ ६ ॥ ॐ कयात्वन्न० स्वाहा ॥ ७ ॥ ॐ इन्द्रोव्विश्वस्य० स्वाहा ॥ ८ ॥ ॐ शन्नोमित्र० स्वाहा ॥ ९ ॥ ॐ शन्नोव्वात० स्वाहा ॥ १० ॥ ॐ अहानिश० स्वाहा ॥ ११ ॥ ॐ शन्नोदेवी० स्वाहा ॥ १२ ॥ ॐ स्योनापृथिवि० स्वाहा ॥ १३ ॥ ॐ आपोहिष्ठा० स्वाहा ॥ १४ ॥ ॐ योवः शिवतमो० स्वाहा ॥ १५ ॥ ॐ तस्माऽअरङ्ग० स्वाहा ॥ १६ ॥ ॐ द्यौः शान्तिरन्तरिक्षꣳ० स्वाहा ॥ १७ ॥ ॐ दृतेदृꣳहमा० स्वाहा ॥ १८ ॥ ॐ दृतेदृꣳहमाज्योक्ते० स्वाहा ॥ १९ ॥ ॐ नमस्तेहरसे० स्वाहा ॥ २० ॥ ॐ नमस्तेस्तु० स्वाहा ॥ २१ ॥ ॐ यतोयतः० स्वाहा ॥ २२ ॥ ॐ सुमित्रियान० स्वाहा ॥ २३ ॥ ॐ तच्चक्षुर्देवहितं० स्वाहा ॥ २४ ॥ इति शान्त्यध्यायमन्त्रैश्चतुर्विंशतिराहुतीर्जुहुयात्। एवं प्रधानहोमं विधाय सर्वे ऋत्विजः प्रागुक्तपञ्चाङ्गन्यासान् कुर्युः। एवं क्रमेण लघुरुद्रहोमं महारुद्रमतिरुद्रहोमं वा कुर्यात्। इति रुद्रहोमः।

नमक-चमक के साथ होम—सामान्य रुद्रहोम ऊपर के १६१ मन्त्रों से करने के पश्चात् 'ॐ वाजश्चमे०' इत्यादि अनुवाक से होम करे। पुनः १६१ मन्त्र से होम कर 'सत्यञ्चमे०' इत्यादि द्वितीय अनुवाक से होम करे। फिर १६१ मन्त्रों से हवनकर 'ऊर्क्क चमे०' इत्यादि तृतीय अनुवाक से होम करे। पुनः १६१ नमस्ते इत्यादि मन्त्रों के द्वारा होम कर चतुर्थ अनुवाक से होम करे। पुनः १६१ मन्त्रों से आहुति देकर पञ्चम अनुवाक के मन्त्रों से होम करे। फिर १६१ मन्त्रों से आहुति देकर षष्ठ अनुवाक के मन्त्रों से होम करे। फिर १६१ नमस्ते इत्यादि मन्त्राहुति के उपरान्त सातवें

अनुवाक से हवन करे। इस प्रकार बार-बार १६१ मन्त्रों की आहुति देकर एकादशवें अनुवाक-पर्यन्त होम करना चाहिये। यह एकादश रुद्ररूप होता है। होम के अन्त में 'यज्जागृतादि०' छः मन्त्रों से एक, फिर पुरुषसूक्त के १६ मन्त्रों से एक, 'अद्भ्यः संभृतं०' इत्यादि छः से एक, 'आशुशिशानो०' इन १७ मन्त्रों से एक, फिर विभ्राट्सूक्त से एक—इस प्रकार पाँच आहुतियाँ दे। तदुपरान्त नमस्तुरुद्र इत्यादि मन्त्रों से १६१ आहुति दे। फिर नमक-चमकविभाग से आहुति देकर 'ऋतं वाचं प्रपद्ये०' इत्यादि से २४ आहुतियाँ देनी चाहिये। फिर प्रधान होम करके ऋत्विज पञ्चाङ्ग न्यास करे। इस प्रकार से क्रमशः लघुरुद्रहोम या महारुद्रहोम, जो भी करना हो, करना चाहिये।

पीठदेवताहोमः

तत्र पीठदेवताभ्यो लिङ्गतोभद्रदेवताभ्यो रुद्रयन्त्रदेवताभ्यश्चैकैकामाज्याहुतिं जुहुयुः। तद्यथा—ॐ मण्डकाय स्वाहा॥ १॥ ॐ कालाग्निरुद्राय०॥ २॥ ॐ आधारशक्त्यै०॥ ३॥ ॐ कूर्माय०॥ ४॥ धरायै०॥ ५॥ सुधासिन्धवे०॥ ६॥ श्वेतद्वीपाय०॥ ७॥ सुराङ्घ्रिपाय०॥ ८॥ मणिहर्म्याय०॥ ९॥ हेमपीठाय०॥ १०॥ धर्माय०॥ ११॥ ज्ञानाय०॥ १२॥ वैराग्याय०॥ १३॥ ऐश्वर्याय०॥ १४॥ अधर्माय०॥ १५॥ अज्ञानाय०॥ १६॥ अवैराग्याय०॥ १७॥ अनैश्वर्याय०॥ १८॥ अनन्ताय स्वाहा॥ १९॥ तत्त्वपद्माय०॥ २०॥ आनन्दमयकन्दाय०॥ २१॥ संविन्नालाय०॥ २२॥ विकारमयकेसरेभ्य०॥ २३॥ प्रकृत्यात्मकपत्रेभ्य०॥ २४॥ सूर्यमण्डलाय०॥ २५॥ चन्द्रमण्डलाय०॥ २६॥ अग्निमण्डलाय०॥ २७॥ सत्त्वाय०॥ २८॥ रजसे०॥ २९॥ तमसे०॥ ३०॥ आत्मने॥ ३१॥ अन्तरात्मने०॥ ३२॥ परमात्मने०॥ ३३॥ ज्ञानात्मने०॥ ३४॥ मायातत्त्वाय०॥ ३५॥ कलातत्त्वाय०॥ ३६॥ विद्यातत्त्वाय०॥ ३७॥ परतत्त्वाय स्वाहा॥ ३८॥ इति पीठदेवताहोमः।

पीठदेवता होम—फिर पीठदेवताओं का पूजन लिङ्गतोभद्र (चतुर्लिङ्गतोभद्र अथवा अष्टलिङ्गतोभद्र अथवा द्वादशलिङ्गतोभद्र) के देवताओं का होम (जिनका पूजन किया गया हो) करे तथा रुद्रयन्त्र के देवताओं का होम करे। इनमें से प्रत्येक देवता को एक-एक आहुति देनी चाहिये। ये आहुतियाँ 'ॐ मण्डकाय स्वाहा' इत्यादि मूल में लिखित ३८ मन्त्रों से देनी चाहिये।

पीठशक्तिहोमः

ॐ वामायै स्वाहा॥ १॥ ज्येष्ठायै०॥ २॥ रौद्र्यै०॥ ३॥ काल्यै०॥ ४॥ कलविकरिण्यै०॥ ५॥ बलविकरिण्यै०॥ ६॥ बलप्रमथन्यै०॥ ७॥ सर्वभूतदमन्यै०॥ ८॥ मनोन्मन्यै०॥ ९॥ इति नवपीठशक्तिहोमः। ॐ नमो भगवते सकलगुणात्मशक्तियुक्ताय अनन्तयोगपीठात्मने स्वाहा॥ १॥

पीठशक्ति होम—पीठदेवताओं का होम करने के पश्चात् फिर 'ॐ वामायै स्वाहा' इत्यादि नौ मन्त्रों से नौ पीठशक्तियों के लिये एक-एक आहुति देकर फिर 'ॐ नमो भगवते सकलगुणात्मशक्तियुक्ताय अनन्तयोगपीठात्मने स्वाहा' इस मन्त्र से एक आहुति दे। तदुपरान्त आगे लिखे मन्त्रों से रुद्रयन्त्र के आवरणदेवताओं (एक से लेकर सात आवरणों तक के देवताओं) को एक-एक आहुति देनी चाहिये।

यन्त्रावरणदेवताहोमः

ॐ नमो भगवते रुद्राय स्वाहा॥ १॥ सद्योजाताय०॥ १॥ वामदेवाय०॥ २॥ अघोराय०॥ ३॥ तत्पुरुषाय०॥ ४॥ ईशानाय०॥ ५॥ नन्दिने०॥ ६॥ महाकालाय०॥ ७॥ गणेश्वराय०॥ ८॥ वृषभाय०॥ ९॥ भृङ्गिरिटये०॥ १०॥ स्कन्दाय०॥ ११॥ उमायै०॥ १२॥ चण्डीश्वराय०॥ १३॥ इति प्रथमावरणम्। **अनन्ताय०॥ १४॥ सूक्ष्माय०॥ १५॥ शिवाय०॥ १६॥ एकपदे०॥ १७॥ एकरुद्राय०॥ १८॥ त्रिमूर्त्तये०॥ १९॥ श्रीकण्ठाय०॥ २०॥ वामदेवाय०॥ २१॥**

ज्येष्ठाय० ॥ २२ ॥ श्रेष्ठाय० ॥ २३ ॥ रुद्राय० ॥ २४ ॥ कालाय० ॥ २५ ॥ कलविकरणाय० ॥ २६ ॥ बलाय० ॥ २७ ॥ बलविकरणाय० ॥ २८ ॥ बलप्रथमनाय० ॥ २९ ॥ इति द्वितीयावरणम्। अणिम्ने० ॥ ३० ॥ महिम्ने० ॥ ३१ ॥ लघिम्ने० ॥ ३२ ॥ गरिम्णे० ॥ ३३ ॥ प्राप्त्यै० ॥ ३४ ॥ प्रकाम्यै० ॥ ३५ ॥ ईशितायै० ॥ ३६ ॥ वशितायै० ॥ ३७ ॥ ब्राह्मयै० ॥ ३८ ॥ माहेश्वर्यै० ॥ ३९ ॥ कौमार्यै० ॥ ४० ॥ वैष्णव्यै० ॥ ४१ ॥ वाराह्यै० ॥ ४२ ॥ इन्द्राण्यै० ॥ ४३ ॥ चामुण्डायै० ॥ ४४ ॥ चण्डिकायै० ॥ ४५ ॥ असिताङ्गभैरवाय० ॥ ४६ ॥ रुरुभैरवाय० ॥ ४७ ॥ चण्डभैरवाय० ॥ ४८ ॥ क्रोधभैरवाय० ॥ ४९ ॥ उन्मत्तभैरवाय० ॥ ५० ॥ कालभैरवाय० ॥ ५१ ॥ भीषणभैरवाय० ॥ ५२ ॥ संहारभैरवाय० ॥ ५३ ॥ इति तृतीयावरणम्। भवाय० ॥ ५४ ॥ शर्वाय० ॥ ५५ ॥ ईशानाय० ॥ ५६ ॥ पशुपतये० ॥ ५७ ॥ रुद्राय० ॥ ५८ ॥ उग्राय० ॥ ५९ ॥ भीमाय० ॥ ६० ॥ महादेवाय० ॥ ६१ ॥ इति शिवाष्टकहोमः। अनन्ताय० ॥ ६२ ॥ वासुकये० ॥ ६३ ॥ तक्षकाय० ॥ ६४ ॥ कुलीरकाय० ॥ ६५ ॥ कर्कोटकाय० ॥ ६६ ॥ शङ्खपालाय० ॥ ६७ ॥ कम्बलाय० ॥ ६८ ॥ अश्वतराय० ॥ ६९ ॥ इत्यष्टनागहोमः। वैन्याय० ॥ ७० ॥ पृथवे० ॥ ७१ ॥ हैहयाय० ॥ ७२ ॥ अर्जुनाय० ॥ ७३ ॥ शाकुन्तलेयाय० ॥ ७४ ॥ भरताय० ॥ ७५ ॥ नलाय० ॥ ७६ ॥ रामाय० ॥ ७७ ॥ इति नृपाष्टकहोमः। हिमवते० ॥ ७८ ॥ निषधाय० ॥ ७९ ॥ विन्ध्याय० ॥ ८० ॥ माल्यवते० ॥ ८१ ॥ पारियात्राय० ॥ ८२ ॥ मलयाय० ॥ ८३ ॥ हेमकूटाय० ॥ ८४ ॥ गन्धमादनाय० ॥ ८५ ॥ इति गिर्य्यष्टकहोमः। इति चतुर्थावरणम्। इन्द्राय० ॥ ८६ ॥ अग्नये० ॥ ८७ ॥ यमाय० ॥ ८८ ॥ निर्ऋतये० ॥ ८९ ॥ वरुणाय० ॥ ९० ॥ वायवे० ॥ ९१ ॥ कुबेराय० ॥ ९२ ॥ ईशानाय० ॥ ९३ ॥ इतीन्द्रादिदेवहोमः। शच्यै० ॥ ९४ ॥ स्वाहायै० ॥ ९५ ॥ वाराह्यै० ॥ ९६ ॥ खड्गिन्यै० ॥ ९७ ॥ वारुण्यै० ॥ ९८ ॥ वायव्यै० ॥ ९९ ॥ कौबेर्य्यै० ॥ १०० ॥ ईशान्यै० ॥ १०१ ॥ इत्यष्टशक्तिहोमः। वज्राय० ॥ १०२ ॥ शक्त्यै० ॥ १०३ ॥ दण्डाय० ॥ १०४ ॥ खड्गाय० ॥ १०५ ॥ पाशाय० ॥ १०६ ॥ अङ्कुशाय० ॥ १०७ ॥ गदायै० ॥ १०८ ॥ त्रिशूलाय० ॥ १०९ ॥ इत्यायुधहोमः। ऐरावताय० ॥ ११० ॥ मेषाय० ॥ १११ ॥ महिषाय० ॥ ११२ ॥ प्रेताय० ॥ ११३ ॥ मकराय० ॥ ११४ ॥ हरिणाय० ॥ ११५ ॥ नराय० ॥ ११६ ॥ वृषभाय० ॥ ११७ ॥ इति वाहनहोमः। ऐरावताय० ॥ ११८ ॥ पुण्डरीकाय० ॥ ११९ ॥ वामनाय० ॥ १२० ॥ कुमुदाय० ॥ १२१ ॥ अञ्जनाय० ॥ १२२ ॥ पुष्पदन्ताय० ॥ १२३ ॥ सार्वभौमाय० ॥ १२४ ॥ सुप्रतिकाय० ॥ १२५ ॥ इति गजहोमः। इति पञ्चमावरणम्। इन्द्राय० ॥ १२६ ॥ अग्नये० ॥ १२७ ॥ यमाय० ॥ १२८ ॥ निर्ऋतये० ॥ १२९ ॥ वरुणाय० ॥ १३० ॥ वायवे० ॥ १३१ ॥ कुबेराय० ॥ १३२ ॥ ईशानाय० ॥ १३३ ॥ ब्रह्मणे० ॥ १३४ ॥ अनन्ताय० ॥ १३५ ॥ इति दिक्पालहोमः। इति षष्ठावरणम्। विरूपाक्षाय० ॥ १३६ ॥ विश्वरूपाय० ॥ १३७ ॥ पशुपतये० ॥ १३८ ॥ ऊर्ध्वलिङ्गाय० ॥ १३९ ॥ शेषाय० ॥ १४० ॥ तक्षकाय० ॥ १४१ ॥ अनन्ताय० ॥ १४२ ॥ वासुकये० ॥ १४३ ॥ शङ्खपालाय० ॥ १४४ ॥ महापद्माय० ॥ १४५ ॥ कम्बलाय० ॥ १४६ ॥ कर्कोटकाय० ॥ १४७ ॥ इत्यष्टनागहोमः। इति सप्तमावरणम्। इति रुद्रयन्त्रदेवताहोमः।

यन्त्र के आवरण के देवताओं का होम—रुद्रयन्त्र के आवरणदेवताओं के होममन्त्र मूल में दिये गये हैं। कुल सात आवरणों के 'ॐ नमो भगवते रुद्राय स्वाहा०' इत्यादि १४७ (एक सौ सैंतालीस) मन्त्रों द्वारा हवन करे।

एवं होमं कृत्वा स्विष्टकृदादिप्रायश्चित्तहोमान्तं समाप्य इन्द्रादिदिक्पालेभ्यो नवग्रहेभ्यः क्षेत्रपालादिभ्यश्च माषभक्तबलींस्तत्तन्मन्त्रैर्दद्यात्। ततः पूर्णाहुतिहोमः—

घृतकुम्भवसोर्धारां पातयेदनलोपरि। औदुम्बरीमथार्द्रां च ऋज्वीं कोटरवर्जिताम्॥
बाहुमात्रां स्रुचं कृत्वा ततः स्तम्भद्वयोपरि। घृतधारां तथा चाज्यमग्रेरुपरि पातयेत्॥
श्रावयेत्सूक्तमाग्नेयं वैष्णवं रौद्रमैन्दवम्। महावैश्वानरं साम ज्येष्ठसाम च पाठयेत्॥

इति मात्स्योक्तः पूर्णाहुतिहोमः।

फिर स्विष्टकृत् होम तथा प्रायश्चित्त होम करे। तत्पश्चात् इन्द्रादि दश दिक्पालों, नवग्रहों, क्षेत्रपालों, योगिनियों, वास्तुदेवताओं आदि को बलि प्रदान करे। बलि में उड़द एवं भात का प्रयोग उन-उन दिक्पालादि देवों के मन्त्रों से करे। तत्पश्चात् पूर्णाहुति होम करे। मत्स्यपुराण के अनुसार घृत के कुम्भ (कलश) से घी की वसुधारा होमकुण्ड के ऊपर छोड़नी चाहिये। इसके लिये गूलर की गीली तथा सूखी कोटररहित बाहुमात्र 'स्रुच' बनवाकर फिर दो स्तम्भों के ऊपर साधकर उससे घृत की धारा तथा आज्य को अग्नि के ऊपर डालना चाहिये। इस कार्य में आग्नेय सूक्त, वैष्णवसूक्त, रौद्रसूक्त, ऐन्द्रसूक्त, महावैश्वानर साम तथा ज्येष्ठ साम का पाठ करना चाहिये। यह मत्स्यपुराण के अनुसार वसोर्धारा की विधि है।

अत्र चतुर्गृहीताज्येन समुद्रादूर्मीत्यादिमन्त्रैर्मूलमन्त्रेण च वाजश्चमे इत्यनुवाकैश्च सततां वसोर्द्धारां जुहुयात्। एवं पूर्णाहुतिं वसोर्धारां च हुत्वा नमस्ते रुद्र इत्यादिभिः रुद्रं स्तुत्वा प्रणीताविमोकान्तं कर्म्मशेषं समाप्य आचार्यादिभ्यो दक्षिणां दत्त्वा जपहोमश्रेयो गृह्णीयात्। तत आचार्यादयो रुद्रग्रहकलशोदकेन यजमानस्याभिषेकं कुर्युः। ततो यजमानो ग्रहाणां रुद्रस्य चोत्तरपूजां महानीराजनं च कृत्वा त्रिः परिक्रम्य साष्टाङ्गं प्रणम्य 'ॐ कृतेनानेन ब्राह्मणद्वारा अमुकरुद्रजपेन श्रीसदाशिवमहारुद्रः प्रीयतामि'ति पठित्वा देवदक्षिणभागे जलमुत्सृजेत्। ततो देवाभिमुखः कृताञ्जलिपुटः सन्—

जपन्यासार्चनं होमं यत्कृतं तु मयाद्य वै। न्यूनातिदोषरहितं कृतं कर्म मया प्रभो॥ १॥
भवत्वेतत्कृपासिन्धो क्षमस्व च नमोऽस्तु ते। पूजान्यासादिकं देव कृतं यत्त्वदनुग्रहात्॥ २॥
तेन मत्कर्मणा रुद्र प्रीतो भव वरप्रदः। नमः शिवाय शान्ताय सगणायादिहेतवे।
निवेदयामि चात्मानं त्वं गतिः परमेश्वर॥ ३॥
न्यूनातिरिक्तं तत्पूर्णं प्रसादादस्तु शङ्कर। एतत्कृतेन देवेश सदा मे वरदो भव॥ ४॥

इति देवं क्षमाप्य विसृज्य प्रतिमादिकमाचार्यादिभ्यो दत्त्वाग्निं सम्पूज्य गच्छगच्छेति विसृजेत्। ततो यथाशक्तिब्राह्मणान् सम्भोजयित्वा यस्यस्मृत्या० इत्यादि जपित्वा कर्म्मसम्पूर्णतां वाचयित्वा कर्मेश्वरार्पणं कृत्वा सुहृद्युक्तो भुञ्जीत। इति रुद्रहोमपद्धतिः।

परन्तु इस अनुष्ठान में तो चतुर्गृहीत आज्य से 'समुद्रादूर्मि०' इत्यादि मन्त्रों से तथा 'वाजश्च मे' इत्यादि अनुवाक से वसुधारा करनी चाहिये। वसोर्धारा मन्त्रों के उच्चारण होने तथा पूर्ण आज्य का होम होने-पर्यन्त सतत् करते रहना चाहिये। इस प्रकार पूर्णाहुति तथा वसोर्धारा होम करके 'नमस्ते रुद्रमन्यव उतोतइषवे नमः०' इत्यादि मन्त्रों द्वारा रुद्र की स्तुति करके प्रणीता विमोकादि कर्म समाप्त करके आचार्यादि ऋत्विज मिलकर 'रुद्रकलश' के जल से यजमान का अभिषेक करें। फिर यजमान रुद्र की उत्तरपूजा तथा महानीराजन करके तीन परिक्रमा कर साष्टाङ्ग प्रणाम करे। फिर 'ॐ कृतेनानेन ब्राह्मणद्वारा अमुकरुद्रजपेन श्रीसदाशिवमहारुद्रः प्रीयताम्' यह पढ़कर देव (रुद्र = शिव) के दक्षिण भाग में जल छोड़े। फिर देव की ओर मुख करके हाथ जोड़कर मूल में लिखित 'जपन्यासार्चनं होमं' इत्यादि चार श्लोकों को पढ़कर क्षमा माँगकर देवमूर्ति तथा यन्त्रादि को आचार्यादि को दान कर पूजन कर 'गच्छ गच्छ०' इत्यादि मन्त्र से अग्नि एवं देवताओं का विसर्जन कर यथाशक्ति ब्राह्मणों को भोजन कराकर 'यस्य स्मृत्या च नामोक्त्या०' इत्यादि जप कर कर्म की सम्पूर्णता का वाचन कर उसे ईश्वर को अर्पित कर यजमान स्वयं तथा मित्रादि के साथ भोजन करे।

कामनाभेदेन रुद्रहोमद्रव्याणि

लिङ्गपुराणे—

रुद्राध्यायेन विधिना घृतेन नियतः क्रमात्। सघृतेन तिलेनैव कमलेन विशेषतः॥

दूर्वया घृतगोक्षीरमिश्रया मधुना तथा। चरुणा सघृतेनैव केवलं पयसाथ वा॥
यस्तु जुहुयात्कालमृत्योः प्रतीकारः प्रकीर्तितः॥

कामनाभेद से रुद्रहोम के द्रव्यों का कथन—लिङ्गपुराण में कहा गया है—रुद्राध्याय की विधि से तिल, घृत एवं कमल से अथवा दूर्वा, घृत एवं गोदुग्ध के मिश्रण से तथा मधु से अथवा चरु, घृत से अथवा केवल गोदुग्ध से जो होम करता है, उसकी अकालमृत्यु दूर हो जाती है।

हेमाद्रौ—

पापक्षयेऽभिचारे च तथा व्याधिविमोचने। पलाशसमिधः कार्या नान्यत्रोत्पातदर्शनात्॥
औदुम्बर्याश्च समिधो मध्वक्ताश्च तथाक्षताः। ग्राह्याश्चान्नाद्यकामेन श्रियै शान्त्यै च पायसम्॥
सर्वकामेन वा ग्राह्या आयुर्वृद्ध्यै तिलाः स्मृताः। घृताक्ता अथवा दूर्वास्तेजस्कामेन वै घृतम्॥
व्रीहयः पशुकामेन राष्ट्रकामेन वै यवाः। उपविश्य शुचौ देशे दूर्वास्तम्बे जपेद्यदि॥
जुहुयाच्छ्वेतपुष्पैर्वा स विश्वं कुरुते वशम्। स्पृष्ट्वाश्वत्थं जपेद्यस्तु रुद्रैकादशिनीं नरः॥
रोगाञ्ज्वरातिसारादीन्नाशयेदुल्बणानपि। होमः पलाशसमिधा कर्तव्यो मधुसंयुतः॥

हेमाद्रि में कहा गया है—पापक्षय के लिये तथा रोगनाश के लिये होम में पलाश की समिधाओं का उपयोग करना चाहिये। अन्य कार्यों में उत्पातकारक होने से पलाश की समिधा का प्रयोग नहीं करना चाहिये। गूलर की समिधाओं से तथा अक्षत को मधु मिलाकर अन्नादि की कामना से होम करना चाहिये, श्रीप्राप्ति तथा शान्ति की कामना, सभी कामनाओं की पूर्ति तथा आयुष्य-वृद्धि के लिये तिलों द्वारा होम करना चाहिये। जिन्हें घृत से आक्त कर लेना चाहिये। अथवा घृताक्त दूर्वा का होम करना चाहिये। तेज की प्राप्ति के लिये घी का होम करना चाहिये। पशुवृद्धि की कामना से व्रीहि (धान) आदि से होम करना चाहिये। राष्ट्र की कामना से यव से होम करना चाहिये। यदि पवित्र स्थान में बैठकर दूर्वास्तम्ब (उगी हुई घास) पर जप करे तथा श्वेत पुष्पों से होम करे तो विश्व को वश में कर लेता है। जो पीपल वृक्ष का स्पर्श करके रुद्रैकादशिनी का जप करता है, वह ज्वर, अतिसार आदि उल्बण रोगों को नष्ट करता है। उसे बाद में (जप के उपरान्त) पलाश की समिधाओं से हवन करना चाहिये॥ १-६॥

एकादशमहारुद्रान् परचक्रागमे पुनः। जपेदेकादशगुणान् होमस्तु विधिवत्स्मृतः॥
तिलैराज्येन संसिक्तैर्विधिवदभिवर्तयेत्। रुद्रैकादशिनी जाप्ये शतमेकोनमिष्यते॥
सहस्राश्च तथा रौद्रे नवत्येकोनया युतः। एवं त्रिगुणिता कार्या महारुद्रातिरुद्रयोः॥
वृष्टिकामेन वा योज्या हस्त्यश्वामयशान्तये। उद्भवेत्यद्भुतानां च ग्रहाणां तु विपर्यये॥
गृहग्रामादिशान्त्यै च तिलाश्चाज्येन संयुताः। होमान्ते सर्वकामानां कूष्माण्डैश्चापि वा जपः॥

यदि परचक्र का आगमन (दूसरे देश का अपने देश पर आक्रमण) हो तो एकादशगुणा रुद्रैकादशिनी का जप कर विधिपूर्वक होम करना चाहिये। घृतमिश्रित तिलों से विधिपूर्वक होम करके रुद्रैकादशिनी का ९९ अथवा ९९९ जप (राज्यप्राप्ति-हेतु) करना चाहिये। अथवा महारुद्र में इसका तिगुना होम करना चाहिये। वर्षा कराने के लिये, हाथी-घोड़ों आदि के रोगों की शान्ति के लिये, ग्रहों की शान्ति के लिये, उत्पातों की शान्ति के लिये, गृहशान्ति एवं ग्रामशान्ति के लिये तिल एवं घृत से होम करना चाहिये तथा होम के अन्त में सभी कार्यों की सिद्धि के लिये कूष्माण्ड होम तथा रुद्रजप करना चाहिये।

होतव्यमाज्यं विधिवन्महाव्याहृतिभिस्तथा। परिषिच्य ततो वह्निं तत्त्वायामेति चार्च्य च॥
अभिषेकं ततः कुर्यान्मन्त्रैस्त्वब्लिङ्गकैः शुचिः। आदावन्ते च सम्पूज्य पार्वतीसहितं शिवम्॥
लोकपालांश्च सम्पूज्य विधिवच्छिवसन्निधौ। गङ्गां दुर्गां च मन्त्रेण विधिवद्द्विरदाननम्॥
स्नपनोक्तविधानेन त्वरितेन नमस्कृतिः। तर्पयेद्द्विविधै रत्नैः पयसा पायसेन वा॥
प्रीयतां शम्भुरित्युक्त्वा भूमिदेवाञ्छुचिः शुचीन्। दत्त्वा तु दक्षिणां तेभ्यः प्रणिपत्य विसर्जयेत्॥
एवं कृते स भगवान्प्रीतः कामान्प्रयच्छति। अकामस्य फलं मुक्तिर्नात्र कार्या विचारणा॥
बौधायनोक्तमन्त्रोऽयं सर्वकामसमृद्धये॥

इति रुद्रहोमद्रव्याणि।

विधिपूर्वक महाव्याहृतियों के साथ आज्य का होम करके 'तत्त्वायामि ब्रह्मणा०' इत्यादि से परिषेचन तथा अग्नि का पूजन करे, फिर अभिषेक अलिङ्गक मन्त्रों से करे। आदि-अन्त में पार्वती-सहित शिव का पूजन करे। लोकपालों को भी शिव के समीप पूजे। गङ्गा एवं दुर्गा को तथा श्रीगणेश जी को भी उनके मन्त्रों से पूजे। स्नपन में कथित विधान से नमस्कार करे। रत्नों, दूध, खीर आदि के भोजन से भगवान् शङ्कर एवं ब्राह्मणों को 'प्रीयतां शम्भु' कहकर प्रसन्न करे। उनको दक्षिणा देकर प्रणाम करे। फिर देवताओं का विसर्जन करे। ऐसा करने से भगवान् शङ्कर प्रसन्न होकर सभी कामनाओं को पूर्ण करते हैं तथा जो निष्काम भाव से रुद्रजप, होम आदि कार्य करता है, उसकी मुक्ति होती है। इसमें सन्देह नहीं है। बौधायन में कथित मन्त्र का जप करे।

रुद्राभिषेकविधानम्

हेमाद्रौ महार्णवे च—सुमुहूर्ते कृतनित्यक्रियः धृतभस्मत्रिपुण्ड्ररुद्राक्षः पवित्रपाणिः शिवसमीपे तद्दक्षिणतः पश्चिमतो वा सन्मुखः स्वासने उदङ्मुख उपविश्य मूलेनाचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य 'ममात्मनः श्रुतिस्मृतिपुराणोक्तफलावाप्तये धर्मार्थकाममोक्षसिद्धिद्वारा सर्वपातकनिरासार्थं सर्वव्याधिनिवृत्तिपूर्वकसर्वाभीष्टसिद्ध्यर्थं वा अमुककामनासिद्ध्यर्थं च स्वयं [ब्राह्मणद्वारा वा] अमुकद्रव्येण नमस्ते रुद्र इत्यादि शतरुद्रियेण [वा षडङ्गरुद्रेण वा अमुकरूपादिरुद्रजपेन] सन्ततधारयाभिषेकं करिष्ये' इति सङ्कल्प्य। तत्रादौ निर्विघ्नतासिद्धये 'ॐ सुमुखश्चैकदन्तश्च०' इत्यादिस्मरणपूर्वकं गणपतिं सम्पूज्य स्मरणं वा कृत्वा पूर्वोक्तभूतशुद्ध्यादिश्रीकण्ठादिकलान्यासान्तं कुर्यात्। ततः याते रुद्र इत्यादि ३१ मन्त्रैः शिखाद्यस्त्रान्तमेकत्रिंशदङ्गन्यासं प्रथमम्॥ १॥ ततः ॐ नमो भगवते रुद्रायेति मन्त्राक्षरैर्मूर्द्धादिपादान्तं दशाङ्गन्यासं द्वितीयम्॥ २॥ ततः सद्योजातादिभिः पादादिमूर्द्धान्तं पञ्चाङ्गन्यासं तृतीयम्॥ ३॥ मनोजूतिरित्यादि मन्त्रैर्गुह्यादिमस्तकान्तं पञ्चाङ्गन्यासं चतुर्थम्॥ ४॥ न्यासं च कृत्वा यज्जाग्रत इत्यादिषड्मन्त्रैर्हृदयं १ सहस्रशीर्षा इत्यादिषोडशभिः शिरः २ अद्भ्यः सम्भृत इत्यादिषड्भिः शिखां ३ आशुः शिशान इत्यादिसप्तदशभिः कवचम्॥ ४॥ विभ्राडिति षोडशभिर्नेत्रम्॥ ५॥ नमस्ते रुद्र इत्यादिषोडशभिरस्त्रं च विन्यसेत्॥ ६॥ इति पञ्चमं न्यासं कुर्यात्॥ ५॥

रुद्राभिषेक-विधान—हेमाद्रि तथा मन्त्रमहार्णव में कहा गया है कि शुभ मुहूर्त में नित्यक्रिया (शौच-स्नानादि) से निवृत्त होकर भस्म का त्रिपुण्ड्र तथा रुद्राक्ष लगाकर पवित्र होकर हाथों में पवित्री धारण करके शिव के समीप दक्षिण भाग में अथवा पश्चिम में अथवा सम्मुख (पूर्व में) अपने आसन पर उत्तर की ओर मुख करके बैठे तथा देश-काल का उच्चारण करके 'ममात्मनः श्रुतिस्मृतिपुराणोक्तफलावाप्तये धर्मार्थकाममोक्षसिद्धिद्वारा सर्वपातकनिरासार्थं सर्वव्याधिनिवृत्तिपूर्वकसर्वाभीष्टसिद्ध्यर्थं वा अमुककामनासिद्ध्यर्थं श्रीभवानीशङ्करमृत्युञ्जय-

महारुद्रदेवताप्रीत्यर्थं च स्वयं (ब्राह्मणद्वारा वा) अमुकद्रव्येण नमस्तेरुद्र इत्यादिशतरुद्रियेण (वा षडङ्गरुद्रेण अमुकरूपादिरुद्रजपेन) सन्ततधारयाभिषेकं करिष्ये' ऐसा सङ्कल्प करके आदि में निर्विघ्नतासिद्धिहेतु 'ॐ सुमुखश्चैकदन्तश्च०' इत्यादि श्लोकों के उच्चारण के साथ श्रीगणपति का स्मरण करके पूर्व में कथित भूतशुद्धि आदि कर्म श्रीकण्ठादि कलान्यास-पर्यन्त करे। फिर 'यातेरुद्र०' इत्यादि ३१ मन्त्रों से शिखादि अस्त्रान्त तक इकतीस अङ्गन्यास करे। यह प्रथम न्यास होता है। फिर 'ॐ नमो भगवते रुद्राय०' इत्यादि मन्त्रों से गुह्य से लेकर मस्तक-पर्यन्त न्यास करे। यह द्वितीय न्यास है। फिर 'सद्योजातं प्रपद्ये०' इत्यादि मन्त्रों से पैरों से लेकर मूर्द्धा-पर्यन्त पञ्चाङ्ग न्यास करे। यह तीसरा न्यास होगा। पुनः 'मनोजूति०' इत्यादि मन्त्रों से गुह्यादि से लेकर मस्तक-पर्यन्त पञ्चाङ्ग न्यास करे। यह चौथा न्यास है। इन न्यासों को करके 'यज्जाग्रतो दैव०' इत्यादि छः मन्त्रों से हृदयन्यास (१), 'सहस्रशीर्षा०' इत्यादि सोलह ऋचाओं से शिरोन्यास (२), 'अद्भ्यः संभृतं पृथिव्यै रसाच्च०' इत्यादि छः मन्त्रों से शिखान्यास (३) करे, 'आशुः शिशानो०' इत्यादि सत्रह ऋचाओं से 'कवचाय हुं' करे (४), 'विभ्राड् बृहत्०' इत्यादि सोलह ऋचाओं से नेत्रत्रयाय वौषट् (५) करे तथा 'नमस्ते रुद्र०' इत्यादि सोलह ऋचाओं से 'अस्त्राय फट्' करे (६)। इस प्रकार इस पाँचवें प्रकार से न्यास को सम्पन्न करे।

एवं पञ्चन्यासं पूर्ववत् कृत्वा शातातपोक्तं षष्ठं षडङ्गन्यासं कुर्यात्। तद्यथा—ॐ प्रजनने ब्रह्मतिष्ठतु॥ १॥ पादयोर्विष्णुस्तिष्ठतु॥ २॥ हस्तयोर्हरस्तिष्ठतु॥ ३॥ वाह्वोरिन्द्रस्तिष्ठतु॥ ४॥ जठरे अग्निस्तिष्ठतु॥ ५॥ हृदये शिवस्तिष्ठतु॥ ६॥ कण्ठे वसवस्तिष्ठन्तु॥ ७॥ वक्त्रे सरस्वती तिष्ठतु॥ ८॥ नासिकयोर्वायुस्तिष्ठतु॥ ९॥ नयनयोः सूर्याचन्द्रमसौ तिष्ठेताम्॥ १०॥ कर्णयोरश्विनौ देवौ तिष्ठेताम्॥ ११॥ ललाटे रुद्रास्तिष्ठन्तु॥ १२॥ मूर्ध्न्यादित्यास्तिष्ठन्तु॥ १३॥ पृष्ठे पिनाकी तिष्ठतु॥ १४॥ पुरतः शूली तिष्ठतु॥ १५॥ पार्श्वयोः शिवाशङ्करौ तिष्ठेताम्॥ १६॥ सर्वतो वायुस्तिष्ठतु॥ १७॥ ततो बहिः सर्वतोऽग्निर्ज्वालामालापरिवृतस्तिष्ठतु॥ १८॥ सर्वेष्वङ्गेषु सर्वा देवतास्तिष्ठन्तु॥ १९॥ माऽरक्षन्तु अग्निर्वायु सूर्यश्चन्द्रमा दिश आपः पृथिव्यौषधिवनस्पतय इन्द्रः पर्जन्य ईशान आत्मा पुनर्नम अग्निर्मे वाचि श्रित इति यथालिङ्गमङ्गानि संस्पृशेत् इति न्यासषट्कं कृत्वा मानसोपचारैः सम्पूज्य 'ॐ ध्यायेन्नित्यं महेशं०' इति ध्यात्वा लिङ्गपूजां कुर्यात्। तद्यथा—

आराधितो मनुष्यैस्त्वं सिद्धैर्देवासुरादिभिः। आराधयामि भक्त्या त्वां मां गृहाण महेश्वर॥ १॥

ॐ त्र्यम्बकं यजामहे० इत्याराध्य ॐ आत्वावहन्तुहरयः सचेतसः श्वेतैरश्वैः सहकेतुमद्भिः। वाताजवैर्बलवद्भिर्मनोजवैरायाहि शीघ्रं मम इहव्याय शर्वोम् ॐ सद्योजातं प्रपद्यामीत्यावाह्य॥ १॥ ॐ त्र्यम्वकं० सद्योजाताय वै नमो नमः इत्यासनम्॥ २॥ त्र्यम्बकं० भवे भवे नातिभवे भवस्य मामिति पाद्यम्॥ ३॥ ॐ त्र्यम्वकं० भवोद्भवाय नम इत्यर्घ्यम्॥ ४॥ ॐ त्र्यम्बकं० आपोहिष्ठामयो भुव इत्यादिमन्त्रत्रयेण स्नानम्॥ ५॥ देवैस्तु वन्दिता धेनुः सर्वपापप्रणाशिनी। तत्क्षीरस्नापितो देव नित्यं मे वरदो भव॥ ॐ त्र्यम्वकं० पयःस्नानम्॥ ६॥ कामतोऽकामतो वापि यन्मया दुष्कृतं कृतम्। तत्सर्वं विलयं यातु दधिस्नानेन भो शिव॥ १॥ त्र्यम्वकं० इति दधिस्नानम्॥ ७॥ रसानामुत्तमं त्वाज्यं देवानां च सदा प्रियम्। तेन त्वं स्नापितो देव निधिकान्तिप्रदो भव॥ ८॥ त्र्यम्वकं० इति घृतस्नानम्॥ ८॥ यस्य धारणमात्रेण तृप्तिं याति पितामहः। मधुना स्नापितो देव नित्यं शोकहरो भव॥ १॥ त्र्यम्वकं० मधुस्नानम्॥ ९॥ यमलोकभयत्रस्तः शरणं त्वां गतः शिवः। खण्डस्नानेन देवेश मां कुरुष्व सुखान्वितम्॥ १॥ ॐ त्र्यम्वकं० इति शर्करोदकस्नानम्॥ १०॥ यस्य दर्शनमात्रेण शुद्धिं प्राणाश्च जीवितम्। तेन चोत्तमतोयेन स्नातो देहि प्रियं ध्रुवम्॥ १॥ ॐ त्र्यम्वकं० इति शुद्धोदकस्नानम्॥ ११॥

अथाद्भिर्देवं तर्पयेत्। ॐ भवं देवं तर्पयामि। ॐ शर्वं देवं तर्पयामि। ॐ ईशानं देवं तर्पयामि। ॐ पशुपतिं देवं तर्पयामि। ॐ रुद्रं देवं तर्पयामि। ॐ भीमं देवं तर्पयामि। ॐ महान्तं देवं तर्पयामीति तर्पयित्वा तत ॐ त्र्यम्बकं० ज्येष्ठाय नमः। इत्याचमनीयम्॥ १२॥ ॐ त्र्यम्बकं० श्रेष्ठाय नमः इति मधुपर्कमाचमनं च॥ १३॥ सुगन्धं चन्दनं देव कुङ्कुमेन समन्वितम्। अर्चितोऽसि मया भक्त्या शिवलोकप्रदो भव॥ ॐ त्र्यम्बकं० इति गन्धम्॥ १४॥ अक्षय्यान्बन्धुपुत्रार्थान् कायं चैवाक्षिवाङ्मनः। अन्ते चैवाक्षयं लोकमक्षतैरर्चितः कुरु॥ ॐ त्र्यम्बकं० इत्यक्षतान्॥ १५॥ सन्तानः परिजातश्च ये चान्ये सुरपादपाः। तेषां पुष्पैर्मया देव पूजितः सुखदो भव॥ १॥ ॐ त्र्यम्बकं० कलविकरणाय नमः इति पुष्पाणि॥ १६॥ धूपोऽयं गृह्यतां देव सुन्दरो गन्धवाञ्छुचिः। ईप्सितं मे वरं देहि परत्र च शुभां गतिम्॥ १॥ ॐ त्र्यम्बकं० सर्वभूतदमनाय नमः इति धूपम्॥ १७॥ शुद्धा शुक्लाम्बरा वर्तिराज्येन च समन्विता। दीपवर्तिप्रदानेन प्रीतः स्यादीश्वरो भव॥ १॥ ॐ त्र्यम्बकं० मनोन्मनाय नमः इति दीपम्॥ १८॥ सर्वमन्नप्रदानं च देवानां तु सदा प्रियम्। तेन चान्नप्रदानेन सुप्रीतो वरदो भव॥ ॐ त्र्यम्बकं० भवोद्भवाय नमः इति नैवेद्यम् आचमनं च॥ १९॥

पञ्च प्रकार के न्यासोपरान्त फिर शातातप स्मृति में कहा हुआ षडङ्ग न्यास करे। वह 'ॐ प्रजनने ब्रह्मतिष्ठतु' इत्यादि मूलपाठ में लिखित २० मन्त्रों से उन-उन अङ्गों को स्पर्श करते हुए इस छठे प्रकार के न्यास को करना चाहिये। फिर मानसोपचारों से शिव का पूजन कर 'ॐ ध्यायेन्नित्यं महेशं०' इत्यादि श्लोकों से ध्यान कर लिङ्गपूजा करे। पुनः 'आराधितो मनुष्यैस्त्वं०' इत्यादि मूल में लिखित श्लोक से आराधन कर 'ॐ आत्वावहन्तु हरयः' इत्यादि मूल में लिखित १९ मन्त्रों से आचमन-पर्यन्त उपचार करे।

अथाष्टभिर्मन्त्रैरष्टौ पुष्पाणि०। ॐ भवाय देवाय नमः पुष्पं समर्पयामि॥ १॥ ॐ शर्वाय देवाय०॥ २॥ ॐ ईशानाय देवाय०॥ ३॥ ॐ पशुपतये देवाय०॥ ४॥ ॐ रुद्राय देवाय०॥ ५॥ ॐ उग्राय देवाय०॥ ६॥ ॐ भीमाय देवाय०॥ ७॥ ॐ महते देवाय०॥ ८॥ इति पुष्पाणि समर्प्य। ॐ अघोरेभ्यो०१ तत्पुरुषाय०२ ईशानः सर्व०३ इति मन्त्रत्रयेणोपस्थाय नीराजनं कृत्वा पुष्पाञ्जलिं समर्प्य प्रदक्षिणात्रयं कृत्वा साष्टाङ्गं प्रणमेत्। ततः शिवस्य मूर्ध्नि हिण्यादिकलशेन सन्ततां धारां मधुना सर्पिषा पयसा वेक्षुरसेन नारीकेलोदकेन चाम्ररसेन वा तदभावे उदकेन। ॐ नमस्तेरुद्रमन्यव० इत्येकादशानामनुवाकानामेकमेकं जपेत्सर्वेषां पारं पुनराराधयेत्। उत्तमाराधनेन तदेतद्विधानमुक्तम्। ततः अभिषेकान्ते ॐ अनेन रुद्राभिषेककर्मणा श्रीभवानीशङ्करमृत्युञ्जयमहारुद्रः प्रीयतामिति देवदक्षिणपार्श्वे जलमुत्सृजेत्। ॐ तत्सद्ब्रह्मा०। ततस्तेनाभिषिक्तोदकेन [अक्षिभ्यामित्यनुवाकेन] ॐ अक्षीभ्यान्तेनासिकाभ्यां-कर्णाभ्यां छुबुकादधि। यक्ष्मंशीर्षण्यंमस्तिष्काज्जिह्वायाविवृहामिते १ ग्रीवाभ्यस्तउष्णिहाभ्यः कीकसाभ्यो-अनूक्यादुयक्ष्मंदोषण्य। मुंमाभ्यांबाहुभ्यांविवृहामिते २ आंत्रेभ्यस्तेगुदाभ्योवनिष्ठोर्हृदयादधि। यक्ष्मुंमतस्नाभ्यांयुक्नः प्लाशिभ्योविवृहामिते ३ ऊरुभ्यांतेअष्ठीवद्भ्यांपार्ष्णिभ्याम्प्रपदाभ्यांयक्ष्मंश्रोणिभ्यांभासदाद्भंससोविवृहामिते ४ मेहना-द्वनंकरणाल्लोमभ्यस्तेनखेभ्यः। यक्ष्मंसर्वस्मादात्मनस्तमिदंविवृहामिते ५ अंगादंगाल्लोम्नोलोम्नोजातंपर्वणिपर्वणि। यक्ष्मंसर्वस्मादात्मनस्तमिदं विवृहामिते॥६॥ इति ऋग्वेदीयानुवाकम्। वारुणैर्वा मन्त्रैः मस्तकाद्यपादान्तं संमृज्यात्। पापक्षयार्थी व्याधिविमोचनार्थी श्रीकामः पुष्टिकामो मोक्षार्थी च कुर्यादेवं कुर्वन् सिद्धिमाप्नोति। तत आचार्याय दक्षिणां ददाति दश गाः सवत्साः सुवर्णभूषिताः। वृषभैकादशस्तदलाभे एकां गां दद्यादित्याह भगवान् बौधायन। इति रुद्राभिषेकविधानम्।

फिर मूल में लिखित 'ॐ भवाय देवाय नमः पुष्पं समर्पयामि' इत्यादि आठ मन्त्रों से पुष्पों को चढ़ाये। फिर 'ॐ अघोरेभ्य०' इत्यादि तीन मन्त्रों से खड़े होकर नीराजन करके पुष्पाञ्जलि समर्पित करना चाहिये तथा

नीराजनोपरान्त प्रणाम करे। तीन प्रदक्षिणा करे। फिर शिव के मस्तक पर स्वर्णादि धातु के कलश से सतत जलधारा अथवा मधु अथवा घृत अथवा गोदुग्ध अथवा ईख का रस अथवा नारियल का पानी अथवा आम के रस या केवल जल से अभिषेक करना चाहिये। फिर 'ॐ नमस्ते रुद्र०' नामक एकादश मन्त्रों के अनुवाक को जप करके पुनः शिव का आराधन करे। उत्तम प्रकार के आराधन-हेतु यह आराधन कहा गया है।

फिर अभिषेक के अन्त में मूल में लिखित 'अक्षीभ्याम्०' इत्यादि अनुवाक के छः ऋग्वेदीय मन्त्रों से अथवा वारुण मन्त्रों से शिव का मस्तक से लेकर पाद-पर्यन्त मार्जन करे। पापक्षय की इच्छा वाला, रोग से मुक्ति चाहने वाला, लक्ष्मी चाहने वाला, पुष्टि चाहने वाला यदि इस आराधना को करता है तो उसे सफलता मिलती है। फिर आचार्य को दक्षिणा देकर दश गायें, जो कि बछड़े वाली हों तथा सुवर्णमण्डित हों, देना चाहिये तथा ग्यारह साँड़ भी दान करे। इसके अभाव में केवल एक ही गाय दे—ऐसा बौधायन का कथन है।

चण्डेश्वरमन्त्रपुरश्चरणम्

अथ चण्डेश्वरमन्त्रपुरश्चरणं शारदायाम्—मूलमन्त्रो यथा ॐ ध्वँ फट्। इति त्र्यक्षरो मन्त्रः। अस्य चण्डेश्वरमन्त्रस्य त्रिकऋषिरनुष्टुप्छन्दश्चण्डेश्वरो देवता सर्वेष्टसिद्ध्यर्थे विनियोगः। ॐ त्रिकऋषये नमः शिरसि॥ १ ॥ ॐ अनुष्टुप्छन्दसे नमः मुखे॥ २ ॥ ॐ चण्डेश्वरदेवतायै नमः हृदये॥ ३ ॥ इति ऋष्यादिन्यासः। ॐ दीप्त फट् हृदयाय नमः॥ १ ॥ ॐ ज्वल फट् शिरसे स्वाहा॥ २ ॥ ॐ ज्वालामालिनी फट् शिखायै वषट्॥ ३ ॥ ॐ फट् कवचाय हुं॥ ४॥ ॐ हन फट् नेत्रत्रयाय वषट्॥ ५ ॥ ॐ सर्व्वज्वालिनी फट् इत्यस्त्राय फट्॥ ६ ॥ इति षडङ्गन्यासं कृत्वा ध्यायेत्—

चण्डेश्वरं रक्ततनुं त्रिनेत्रं रक्तांशुकाढ्यं हृदि भावयामि।
ढक्कां त्रिशूलं स्फटिकाक्षमालां कमण्डलुं विभ्रतमिन्दुचूडम्॥

एवं ध्यात्वा शिवपञ्चाक्षरोदिते पीठे मूलेन मूर्त्तिं प्रकल्प्य ॐ ध्वं चण्डेश्वराय नमः इति मन्त्रेण आवाहनादिपुष्यान्तैरुपचारैः सम्पूज्य आवरणपूजां कुर्यात्। षट्कोणे हृदयादिषडङ्गानि सम्पूज्य अष्टदले ब्राह्म्याद्यष्ट-मातृकाः सम्पूजयेत्। ततो भूपुरे इन्द्रादिदशदिक्पालान् तद्बाह्ये वज्राद्यायुधानि च पूजयेत्। एवं चतुरावरणपूजां कृत्वा धूपादिनीराजनान्तैश्चण्डेशं सम्पूज्य त्रिलक्षं मन्त्रं जपेत्।

चण्डेश्वर मन्त्र—'ॐ ध्वं फट्' यह मूल मन्त्र है। यह तीन अक्षरों का मन्त्र है। इस चण्डेश्वर मन्त्र के त्रिक ऋषि हैं, अनुष्टुप् छन्द है, चण्डेश्वर देवता है तथा इसका विनियोग सभी प्रकार के इष्ट मनोरथों की सिद्धि के लिये है।

सर्वप्रथम मूल में लिखित तीन मन्त्रों से ऋष्यादि न्यास करे। फिर 'ॐ दीप्त फट् हृदयाय नमः' इन छः मन्त्रों से षडङ्ग न्यास करके फिर 'चण्डेश्वरं रक्ततनुं त्रिनेत्रं, रक्तांशुकाढ्यं हृदि भावयामि। ढक्कां त्रिशूलं स्फटिकाक्षमालां कमण्डलुं विभ्रति चन्द्रचूडम्॥' इस श्लोक से ध्यान करे। ध्यान करने के पश्चात् पूर्व में शिवपञ्चाक्षर मन्त्र में कथित पीठ पर मूल मन्त्र से चण्डेश्वर की मूर्ति की कल्पना करके 'ॐ चण्डेश्वराय नमः' इस मन्त्र से आवाहन से लेकर पुष्पाञ्जलि-पर्यन्त उपचारों से पूजा करके फिर आवरणपूजा करे। पीठ के षट्कोण में हृदय आदि छः अङ्गों को पूजकर अष्टदल में ब्राह्मी आदि अष्टमातृकाओं का पूजन करे। फिर भूपुर में इन्द्रादि दश दिक्पालों, उसके बाहर उनके वज्रादि आयुधों का पूजन करे। इस प्रकार चारो आवरणों की पूजा करके धूप, दीप से लेकर नीराजन-पर्यन्त चण्डेश्वर की पूजा करके तीन लाख मन्त्र का जप करे।

वर्णलक्षं जपेन्मन्त्रं होमं कुर्याद्दशांशतः। मधुरत्रयसंयुक्तैर्विशुद्धैस्तिलतण्डुलैः ॥
इति सिद्धे मनौ मन्त्री धनवाञ्जायतेऽचिरात्। तर्पयेन्मनुनानेन नित्यमष्टोत्तरं शतम्॥
श्रियं प्राप्नोति महतीं पुत्रमित्रसमन्वितः। प्रियङ्गुकुसुमैः फुल्लैस्तत्काष्ठज्वलितेऽनले॥
जुहुयादयुते मन्त्री पुरक्षोभः प्रजायते। साध्यवृक्षत्वचो लोणं पिष्ट्वा पिष्टसमन्वितम्॥
पुत्तलीं रुचिरां कृत्वा प्रतिष्ठाप्य समीरणम्। छित्त्वा छित्त्वा प्रजुहुयादष्टोत्तरशतं निशि॥
सप्ताहमेवं कुर्वीत साध्यो दासो भवेत्स्वयम्। शैवमन्त्रेषु निष्णातश्चण्डेश्वरमनुं भजेत्॥
सर्वान्कामानवाप्नोति परत्रेह च नन्दति।

इति चण्डेश्वरमन्त्रप्रयोगः।

चण्डेश्वर मन्त्र के जप का फल—चौंसठ लाख मन्त्र का जप करके उसके दशमांश का होम मधुरत्रय, तिल तथा तण्डुलों से करे तो मन्त्र सिद्ध हो जाता है। मन्त्र सिद्ध होने पर जापक व्यक्ति शीघ्र ही धनवान् हो जाता है। नित्य १०८ तर्पण भी इसी मन्त्र से करना चाहिये। इससे पुत्र, मित्रयुक्त लक्ष्मी की प्राप्ति होती है। प्रियङ्गु के फूलों एवं उसके लकड़ी की समिधाओं से दश सहस्र होम करने पर पुर (शत्रु की राजधानी) में क्षोभ (खलबली) मच जाती है। साध्य वृक्ष (वरुण वृक्ष या कदम्ब वृक्ष) की छाल तथा नमक पीसकर उसकी पुत्तली बनाकर उसकी प्रतिष्ठा कर फिर उसको काट-काटकर रात में १०८ आहुति देने से एक सप्ताह में साध्य स्वयं ही दास हो जाता है। जो साधक शैव मन्त्रों में पारंगत हो जाय, उसे बाद में चण्डेश्वर मन्त्र भी सिद्ध करना चाहिये, इससे उसकी सभी कामनाएँ पूर्ण हो जाती हैं तथा परलोक में सुख भोगता है।

त्वरितरुद्रमन्त्रपुरश्चरणप्रयोगः

हेमाद्रिशान्तिसारशान्तिरत्नेषु—देवालयादिषु जपस्थानं प्रकल्प्य तत्र नित्यकर्मानन्तरं जपासने प्राङ्मुख उदङ्मुखो वा उपविश्य भस्मत्रिपुण्ड्रं रुद्राक्षमालां च धारयित्वा मूलेनाचम्य तेनैव प्राणानायम्य देशकालौ सङ्कीर्त्य 'अमुककामनासिद्ध्यर्थं त्वरितरुद्रजपमहं करिष्ये' इति सङ्कल्प्य पूर्वोक्तक्रमेण भूतशुद्धिं प्राणप्रतिष्ठामन्तर्मातृकाबहिर्मातृकान्यासं श्रीकण्ठादिकलान्यासं च कृत्वा षोडशोपचारैः शिवपूजां विधाय रुद्रस्तवेन स्तुत्वा त्वरितरुद्रविधानन्यासादिकं कुर्यात्। तत्र मूलमन्त्रो यथा—ॐ यो रुद्रोऽग्नौ योऽप्सु य औषधीषु यो रुद्रो विश्वा भुवना विवेश तस्मै रुद्राय नमोस्तु॥ १॥ इत्येकत्रिंशद्वर्णो (३१) मन्त्रः। अस्य त्वरितरुद्रमन्त्रस्य अथर्वणऋषिः अनुष्टुप् छन्दः त्वरितरुद्रसंज्ञको देवता नमः इति बीजम् अस्तु इति शक्तिः त्वरितरुद्रप्रीत्यर्थं जपे विनियोगः।[तत्रादौ मूलेन करशुद्धिं कृत्वा प्रणवं करतलयोर्विन्यसेत्] ॐ अथर्वर्षये नमः शिरसि॥ १ ॥ ॐ अनुष्टुप्छन्दसे नमः गुह्ये॥ २ ॥ ॐ त्वरितरुद्रदेवतायै नमः हृदये॥ ३ ॥ ॐ नमः इति बीजाय नमः मुखे॥ ४॥ ॐ अस्तु शक्तये नमः पादयोः॥ ५॥ इति ऋष्यादिन्यासः॥ ॐ यो रुद्र अङ्गुष्ठाभ्यां नमः॥ १॥ ॐ अग्नौ तर्जनीभ्यां नमः॥ २॥ ॐ योप्सु मध्यमाभ्यां नमः॥ ३॥ ॐ य ओषधीषु अनामिकाभ्यां नमः॥ ४॥ ॐ यो रुद्रो विश्वा भुवना विवेश कनिष्ठिकाभ्यां नमः॥ ५॥ ॐ तस्मै रुद्राय नमोऽस्तु करतलकरपृष्ठाभ्यां नमः॥ ६॥ इति करन्यासः। एवं हृदयादिविन्यासः।

अथ पदन्यासः—ॐ यः नमः पादयोः॥ १॥ रुद्रः नमः जङ्घयोः॥ २॥ अग्नौ नमः जानुनोः॥ ३॥ यः नमः ऊर्वोः॥ ४॥ अप्सु नमः गुल्फयोः॥ ५॥ यः नमः मेढ्रे॥ ६॥ ओषधीषु नमः नाभौ॥ ७॥ यः नमः उदरे॥ ८॥ रुद्रः नमः हृदये॥ ९॥ विश्वा नमः कण्ठे॥ १०॥ भुवना नमः मुखे॥ ११॥ विवेश नमः नासिकायाम्॥ १२॥ तस्मै नमः नेत्रयोः॥ १३॥ रुद्राय नमः भ्रुवोः॥ १४॥ नमः नमः ललाटे॥ १५॥ अस्तु नमः शिरसि॥ १६॥

अथ वर्णन्यासः—ॐ यः शिरसि॥ १॥ रुद्रः ललाटे॥ २॥ अग्नौ नेत्रयोः॥ ३॥ यः कर्णयोः॥ ४॥ अप्सु नासिकायाम्॥ ५॥ यः मुखे॥ ६॥ ओषधीषु बाह्वोः॥ ७॥ यः हृदये॥ ८॥ रुद्रः नाभौ॥ ९॥ विश्वा गुह्ये॥ १०॥ भुवना अपाने॥ ११॥ विवेश ऊर्वोः॥ १२॥ तस्मै जान्वोः॥ १३॥ रुद्राय जङ्घयोः॥ १४॥ नमः गुल्फयोः॥ १५॥ अस्तु चरणयोः॥ १६॥

एवं पञ्च न्यासान्कृत्वा शुभदामुद्रां प्रदर्शयेत्। (अङ्गुल्यग्राणि मूले तु कृत्वाङ्गुष्ठेन पीडयेत्। सा मुद्रा शुभदा प्रोक्ता सैव शान्तिप्रदायिनी॥ १॥) मुद्रादर्शनमन्त्रः—ॐ एषतेरुद्रभागः सहस्वस्राम्बिकयातं जुषस्वस्वाहा। इति मन्त्रेण मुद्रां दर्शयित्वा ध्यानं कुर्य्यात्—

रुद्रं चतुर्भुजं देवं त्रिनेत्रं वरदाभयम्। दधानमूर्ध्वहस्ताभ्यां शूलं डमरुमेव च॥
अङ्कसंस्थामुमां पद्मे दधानां च करद्वये। आद्ये करद्वये कुम्भं मातुलुङ्गं च बिभ्रतीम्॥

अथवा—

चतुर्बाहुं त्रिनेत्रं च शुद्धस्फटिकसन्निभम्। उग्रे कर्मणि चैवोग्रं मूर्तिं ध्यायेदुमापतिम्॥
द्विभुजं नागपाशं च शूलपाणिं जटाधरम्। ध्यात्वैवं शङ्करं पापान्मुच्यते मानसोद्भवात्॥

अथवा—

चतुर्भुजं त्रिनेत्रं च शुद्धस्फटिकसन्निभम्। अमृतेन च पूर्णौ द्वौ कलशौ हस्तयोर्द्वयोः॥
हस्तद्वयेन योगस्य कृतमुद्रं स्थिरासनम्। सर्वकामप्रदं शान्तं शङ्करं करुणाकरम्॥
उग्रकर्मणि चैवोग्रमूर्तिं ध्यायेदुमापतिम्। द्विभुजं नागपाशं च शूलपाणिं जटाधरम्॥

इति ध्यात्वा मानसोपचारैः सम्पूज्य भेदपक्षे गन्धादिपूजनं कुर्यात् एवं पूजनं कृत्वा मूलमन्त्रं जपेत्। अस्य पुरश्चरणमयुतद्वयजपात्मकं कुर्यात्। प्रत्यहं शिवं पूजयेत्।

त्वरित रुद्रमन्त्र-पुरश्चरण प्रयोग—किसी देवालय इत्यादि में जपस्थान की व्यवस्था करके वहाँ नित्यकर्म के पश्चात् जप के आसन पर पूर्व की ओर अथवा उत्तर की ओर मुख कर बैठे तथा रुद्राक्ष की माला धारण करके मूल मन्त्र से आचमन तथा प्राणायाम कर देश-काल का उच्चारण कर 'अमुककामनासिद्ध्यर्थं त्वरितरुद्रजपमहं करिष्ये' कहकर सङ्कल्प करना चाहिये। फिर पूर्व में वर्णित विधि से भूतशुद्धि, प्राणप्रतिष्ठा, अन्तर्मातृका, बहिर्मातृका न्यास, श्रीकण्ठादि कलान्यास आदि करके षोडशोपचार से शिवपूजन करके रुद्रस्तव से स्तुति करके त्वरित रुद्रविधान के न्यासादि करे।

मूल मन्त्र—'ॐ यो रुद्रोऽग्नौ योऽप्सु य ओषधीषु यो रुद्रा विश्वा भुवना विवेश तस्मै रुद्राय नमोऽस्तु (तैत्तरीय यजुर्वेद ५।५।९।९)' यह इकतीस अक्षरों का मन्त्र है।

इस त्वरित रुद्रमन्त्र के अथर्वा ऋषि, अनुष्टुप् छन्द, त्वरित रुद्रसंज्ञक देवता तथा त्वरितरुद्र की प्रीति-हेतु जप में विनियोग होता है। इस प्रकार विनियोग करने के उपरान्त मूल मन्त्र से करशुद्धि करके प्रणव का न्यास करतलों में करने के पश्चात् 'ॐ अथर्वर्षये नमः शिरसि' इत्यादि ५ मूलोक्त मन्त्रों से ऋष्यादि न्यास करे। फिर 'ॐ यो रुद्र अङ्गुष्ठाभ्यां नमः' इत्यादि छः मन्त्रों से करन्यास करे। इन्हीं छः मन्त्रों से हृदयादि न्यास भी करे। इसके बाद 'ॐ यः नमः पादयोः' इत्यादि सोलह मन्त्रों से पदन्यास करे। इसके अनन्तर 'ॐ यः शिरसि' इत्यादि १६ मन्त्रों से वर्णन्यास करना चाहिये। इस प्रकार पञ्चन्यासों को सम्पन्न करके शुभदा मुद्रा प्रदर्शित करनी चाहिये।

शुभदा मुद्रा—अङ्गुलियों के अग्रभाग को उनके मूल में लगाकर उनको अङ्गूठे से दबाने पर जो मुद्रा बनती है, वह शुभदा मुद्रा कही जाती है; यह शान्ति-प्रदायिनी होती है।

विमर्श—मुद्राएँ केवल अङ्गुलियों से ही प्रदर्शित नहीं होतीं; अपितु शरीर के विभिन्न अङ्गों से भी मुद्राओं को बनाकर प्रदर्शित किया जाता है। मुद्राप्रदर्शन से पापों का क्षय होता है तथा सभी देवताओं को उनकी विशेष मुद्राओं से अपने अनुकूल किया जा सकता है। कहा भी है—

योजनात् सर्वदेवानां द्रावणात् पापसंहतेः। तस्मात् मुद्रेति साख्याता सर्वकामार्थसाधनी॥
(वाचस्पत्यम्)

कामना-भेद से अलग-अलग अङ्गों से भी मुद्रा का प्रदर्शन किया जाता है। हेमाद्रि के अनुसार लक्ष्मी चाहने वाले को शिर से, तेज चाहने वाले को नेत्रों के द्वारा, अन्न की कामना से मुख द्वारा, रोगनाशहेतु ग्रीवा द्वारा, सुखाकांक्षी को हृदय से, ज्ञान के चाहने वाले को नाभि द्वारा, सन्तति की इच्छा में गुह्य द्वारा, पशु की चाहना के लिये जङ्घाओं (पिण्डलियों) द्वारा, ग्राम की चाहना वाले को अङ्ग से मुद्रा का प्रदर्शन करना चाहिये। वशीकरण के लिये वाम बाहु का प्रदर्शन करना चाहिये। पापक्षय, अभिचारकर्म अथवा व्याधि दूर करने के लिये शरीर के बाह्य भाग (पीठ से) मुद्रा का प्रदर्शन भगवान् शङ्कर के समक्ष करना चाहिये—

श्रीकामः शीर्ष्णि कुर्वीत तेजस्कामस्तु नेत्रयोः। मुखे त्वन्नाद्यकामस्तु ग्रीवायां रोगनाशनम्॥
हृदये सुखकामस्तु नाभौ ज्ञानप्रदं भवेत्। प्रजाकामस्तु गुह्ये वै पशुकामस्तु जङ्घयोः॥
जानुभ्यां ग्रामकामस्तु सर्वकामस्तु गुह्ययोः। वशीकरणकामस्तु वामबाहुं प्रदर्शयेत्॥
पापक्षयेऽभिचारे वा व्याधेरपगमे तथा। बहिः शरीरात् कुर्वीत शिवस्याग्रे तु संस्मरेत्॥

मुद्रादर्शन मन्त्र—'ॐ एष ते रुद्रभागः सहस्राम्बिकया जुषस्व स्वाहा' इस मन्त्र से मुद्रा का प्रदर्शन करे। फिर मूल में उल्लिखित चार ध्यानों में से किसी एक से ध्यान करना चाहिये—

प्रथम प्रकार का ध्यान—रुद्र चतुर्भुज देव हैं, जो तीन नेत्रों वाले, वरदायक तथा अभयदायक हैं। उनके ऊपरी हाथों में शूल तथा डमरू है एवं अधोहस्तों के द्वारा गोदी में बैठी उमा, जो कि कमलों से युक्त अवस्थित हैं, धारित हैं। उनके दोनों हाथों में कुम्भ तथा मातुलुङ्ग (नीबू) है।

द्वितीय प्रकार का ध्यान—चतुर्भुज, त्रिनेत्र, शुद्ध स्फटिक के समान कान्तिमान्, जो उग्रकर्मों में उग्र हैं, ऐसे उमापति का ध्यान करता हूँ। दो भुजाओं वाले नागपाश से युक्त जटाधर शङ्कर का मन से ध्यान करने पर साधक पापों से मुक्त हो जाता है।

तृतीय प्रकार का ध्यान—चतुर्भुज, त्रिनेत्र, शुद्ध स्फटिक-सदृश दोनों हाथों में अमृतपूर्ण कलशों से युक्त स्थिर आसन पर योगमुद्रा में विराजमान, सर्वकामप्रद, शान्त, करुणा करने वाले श्रीशङ्कर का ध्यान करता हूँ।

चतुर्थ प्रकार का ध्यान—उग्र कर्मों की सिद्धि-हेतु श्रीशङ्कर के उग्र स्वरूप का ध्यान करना चाहिये, जो कि द्विभुज, नागपाश से युक्त, शूल धारण किये तथा जटाधारी होते हैं।

इस प्रकार से ध्यान कर मानसोपचारों से शिवपूजन करना चाहिये। भेदानुसार उनका अलग-अलग प्रकार के गन्ध से पूजन करने के उपरान्त मूल मन्त्र का जप करना चाहिये।

इसके पुरश्चरण के लिये दो अयुत (बीस सहस्र) जप करना चाहिये। जपकाल में प्रतिदिन शिव का पूजन करते रहना चाहिये।

अधःशाय्येकभक्ताशी ब्रह्मचारी हविष्यभुक्। अयुते द्वे जपेत्पूर्वं प्रत्यहं पूजयेच्छिवम्॥
जुहुयात्तद्दशांशेन तद्दशांशेन तर्पणम्। मार्जनं तद्दशांशेन दशांशेन तु भोजयेत्॥
एवं कृते तु सिद्धिः स्यात्फलार्थं तु ततोजपेत्। पुरश्चरणमेवं तु कृत्वा सम्पूज्य शङ्करम्॥
जपेत्त्वरितरुद्रं तु सर्वकामसमृद्धये।

जपफल—जपकाल में भूमि पर शयन करे, एक समय भोजन करे, ब्रह्मचारी तथा हविष्यभोजी होकर रहे। प्रथम दो अयुत की सङ्ख्या में त्वरितरुद्र मन्त्र का जप करे तथा प्रतिदिन पूजन करता रहे। फिर जप के दशांश का हवन, हवन का दशांश तर्पण, तर्पण का दशांश मार्जन तथा मार्जन का दशांश ब्राह्मणभोजन कराना चाहिये। ऐसा करने से सफलता मिलती है अर्थात् मन्त्र सिद्ध हो जाता है। जब मन्त्र सिद्ध हो जाय तो सत्फल की प्राप्ति के लिये आगे जप करना चाहिये। इस प्रकार से पुरश्चरण करके शङ्कर को पूजकर त्वरित रुद्रमन्त्र का जप करने से सभी काम सफल होते हैं।

श्रीकामः शान्तिकामो वा जपेल्लक्षमतन्द्रितः॥
बिल्वसमिद्भिः श्रीकामः शान्तिकामःशमीमयैः। जुहुयादाज्यसम्मिश्रैस्तर्पणं मार्जनं तथा॥
जप्त्वा लक्षं तु पुत्रार्थी पायसंजुहुयात्ततः। वित्तार्थी श्रीफलैर्होममायुष्कामस्तु दूर्वया॥
तिलैराज्येन सम्मिश्रैस्तेजस्कामो घृतेन वै। व्रीहीभिः पशुकामस्तु राष्ट्रकामस्तु वै यवैः॥
पायसं सर्वकामेन होतव्यं शर्करान्वितम्। मध्वाक्तान्याम्रपत्राणि तीव्रज्वरविनाशिने॥

लक्ष्मी की कामना वाला, शान्ति चाहने वाला इस मन्त्र का सावधान होकर एक लाख की सङ्ख्या में जप करे। बिल्व की समिधाओं से श्रीकामी को तथा शमी (छेङ्कुर) की समिधा से शान्तिकामी को घृत-मिश्रित हवन, तर्पण, मार्जन करना चाहिये। पुत्र चाहने वाले को सिद्ध मन्त्र को एक लाख की सङ्ख्या में जप कर फिर पायस (खीर) से हवन करना चाहिये। धन चाहने वाले को बेलफलों से तथा आयुवृद्धि चाहने वाले को दूर्वा की समिधा के साथ तिल एवं घृत मिलाकर हवन करना चाहिये एवं तेजस्कामी को दूर्वा की समिधा एवं घृत से हवन करना चाहिये। पशुकामी को व्रीहि से तथा राष्ट्रकामी (राज्यप्राप्ति) को जौ से हवन करना चाहिये। समस्त कामनाओं की पूर्ति के लिये पायस का होम करना चाहिये। उस पायस में भी शर्करा मिलानी चाहिये। तीव्र ज्वर के विनाश के लिये आम के पत्तों को मधु में डुबोकर हवन करना चाहिये।

हिमभूतज्वरेणैव गुडूचीभिर्हुनेद्ध्रुवम्। सर्वरोगविनाशाय सूर्यस्याभिमुखो जपेत्॥
अयुते द्वे जपे होमः कार्योऽर्कसमिधा शुभः। औदुम्बैररन्नकामस्तेजस्कामस्तु खादिरैः॥
अपामार्गसमिद्धोमाद्भूतबाधा विनश्यति। ग्रहबाधाविनाशाय जपेदश्वत्थसन्निधौ॥
लवणान्वितदध्यक्तस्तीक्ष्णाग्राश्वत्थसम्भवाः । हूयन्ते समिधः शुष्काः स्वाहान्ते मन्त्रमुच्चरेत्॥
दशपञ्चाहुतीर्हुत्वा गच्छगच्छेत्युदीरयेत्। यावद्धोमो बलिर्देयः पुरुषाहारसम्मितः॥
एवं कृते प्रमुच्येत पुमान् स्त्री वा महाग्रहात्।

शीतज्वर (पुराना मलेरिया) के लिये गिलोय की समिधा का हवन निश्चित लाभकारी होता है। सभी रोगों के नाश के लिये इस मन्त्र का जप सूर्य के सम्मुख करना चाहिये। दो अयुत जप में अर्क की समिधा से होम करना

चाहिये। अन्नकामी को गूलर की समिधा से एवं तेजस्कामी को खदिर की समिधा से हवन करना चाहिये। अपामार्ग की समिधाओं के द्वारा इस मन्त्र से किया गया हवन भूतबाधा का नाशक होता है। ग्रहबाधा के नाश के लिये पीपल वृक्ष के समीप इस त्वरित रुद्र मन्त्र का जप करना चाहिये। अश्वत्थ (पीपल) वृक्ष के नोकदार सूखी समिधाओं को त्वरित रुद्रमन्त्र के अन्त में स्वाहा लगाकर समिधाओं में लवण तथा दही चुपड़कर प्रत्येक पन्द्रह आहुतियाँ देकर 'गच्छ गच्छ' कहना चाहिये। इस प्रकार होम की समाप्ति जब तक नहीं होती तब तक एक व्यक्ति के आहार की मात्रा में बलि देनी चाहिये (अथवा सम्पूर्ण होम के अन्त में बलि देनी चाहिये)। ऐसा करने से जिस पुरुष अथवा स्त्री को महाग्रह ने जकड़ लिया वह उस ग्रह (भूत-प्रेत-पिशाच आदि) की पकड़ से मुक्त हो जाता है।

यं जेतुमिच्छेत्पुरुषस्तत्स्थानाभिमुखो जपेत्॥
जुहुयाच्छतपत्राणि स दुष्टः क्षयमाप्नुयात्। लाजाहोमेन कन्यार्थी कन्यामाप्नोति रूपिणीम्॥
लाजाश्च मधुसम्मिश्राः श्वेतपुष्पाणि वापुनः। हूयन्ते हरिते देशे तस्य विश्ववशो भवेत्॥
वामाङ्गमुन्नतं कार्य्यं स्त्रीवशित्वे विचक्षणैः। हस्त्यश्वामात्यशान्त्यर्थं तिलैश्चाज्येन संयुतैः॥
होमस्थाने तु संस्थाप्य कुम्भमेकंजलान्वितम्। मन्त्रं जप्त्वाष्टसाहस्त्रं कुम्भे स्पृश्य प्रयत्नतः॥
अभिषेकं तु तेषां वै शालां प्रोक्ष्यप्रदक्षिणम्। ग्रहग्रामादिशान्तिस्तु सर्वैः कार्या तु पूर्ववत्॥
वास्तुपूजा प्रकर्तव्या प्राच्यां दिशि पदेशुभे। ईशानाय बलिः कार्यः पशूनां पतये तथा॥
एवं कृते पशूनां तु प्रजानां शान्तिमाप्नुयात्।

जिस व्यक्ति को जीतना हो, उसके निवास की ओर मुख करके मन्त्र-जप करना चाहिये। फिर शतपत्र का हवन करना चाहिये; वह दुष्ट व्यक्ति क्षमा माँग लेता है। लाजाओं का होम करने से स्त्री की चाहना करने वाले को रूपवती कुमारी प्राप्त होती है। जो मधुमिश्रित लाजा (धान की खील) से तथा श्वेत पुष्पों से होम करता है, उसके वशीभूत समस्त संसार हो जाता है। यह होम विजित प्रदेश में करना चाहिये। हाथी, घोड़ा, आमात्य आदि की शान्तिहेतु तिल एवं घृत से युक्त हवन करना चाहिये तथा होमस्थान में जलपूर्ण कलश स्थापित करना चाहिये। अठारह सहस्र मन्त्रों का जप उस कलश को स्पर्श करके करना चाहिये; फिर उन हाथी-घोड़ों आदि की शाला का प्रोक्षण (पोंछा) उस जल से प्रदक्षिणक्रम से करना चाहिये। इसी प्रकार से ग्रह एवं ग्राम आदि की शान्ति भी की जाती है। पूर्व दिशा में वास्तुपूजा करनी चाहिये। ईशान के लिये एवं पशुपति के लिये बलि देनी चाहिये। ऐसा करने से पशुओं एवं प्रजाओं की शान्ति होती है।

अद्भुतेषु च सर्वेषु निशायां ग्रामबाह्यतः॥
उपविश्य जपेद्रुद्रं त्वरितं बलिभिः सह। होमः पलाशसमिधैः कर्तव्यो घृतसंयुतैः॥
ईशानाय बलिः कार्य्यो यस्यां दिशितदद्भुतम्। तदाशापतये चैव पशूनां पतये तथा॥
वृष्टिकामो जपेल्लक्षं खिलैर्होमो घृतान्वितैः। बलिपूजा प्रकर्तव्या शिवस्य वरुणस्य च॥
सर्वस्मिन्नपि चैवार्थे त्वरितस्य जपोभवेत्। अयुतद्वयजाप्यं तु यावल्लक्षं ततोऽधिकम्॥
एवं कृते तु सिद्धिः स्यान्निष्कामः प्राप्नुयाच्छिवम्। ऐहिकामुष्मिकान् भोगान् भुक्त्वा सायुज्यमाप्नुयात्॥

इति श्रीत्वरितरुद्रमन्त्रपुरश्चरणं समाप्तम्।

अद्‌भुत वस्तुओं के दर्शन होने पर उन उत्पातों की शान्ति के लिये रात्रि के समय ग्राम से बाहर बलि पदार्थ रखकर रुद्रजप (त्वरित रुद्र मन्त्र का जप) करना चाहिये। जप के उपरान्त पलाश की समिधाओं को घृत में डुबोकर होम करना चाहिये। जिस दिशा में वह अद्‌भुत उत्पात (धूमकेतु, उल्का आदि) दिखाई दे, उसी दिशा में ईशान के निमित्त बलि देनी चाहिये। साथ ही उस दिशा के स्वामी को तथा पशुपति को भी बलि देनी चाहिये। वर्षा कराने के लिये एक लाख त्वरित रुद्रमन्त्र का जप कराने के उपरान्त घृत से होम (पलाश की समिधा से) करना चाहिये तथा शिव एवं वरुण के लिये बलिपूजा देनी चाहिये। सभी अन्य कार्यों के लिये भी त्वरित रुद्र का जप दो अयुत (२०,०००) से लेकर एक लाख तक अथवा आवश्यकतानुसार अधिक भी कराना चाहिये। ऐसा करने से सफलता मिलती है तथा निष्काम व्यक्ति यदि इस जप एवं होम को करता है तो उसे शिव की प्राप्ति होती है। वह इस लोक में सुख भोगकर सायुज्य मुक्ति को प्राप्त होता है।

पार्थिवलिङ्गपूजनविधानम्

मन्त्रमहोदध्यादिषु—तत्रादौ प्रातर्नित्यकर्म्म समाप्य सुमुहूर्त्ते शिवालये पुण्यस्थाने वा गत्वा तत्र स्थानशुद्धिं सम्पाद्य स्वासने उदङ्मुख उपविश्य भस्मत्रिपुण्ड्ररुद्राक्षधारणं च कुर्यात्। ततः ॐ नमः शिवाय इत्यनेनाचम्य प्राणानायम्य गणपतिस्मरणं कृत्वा देशकालौ सङ्कीर्त्य 'अमुकगोत्रोऽमुकशर्मा मम श्रुतिस्मृतिपुराणोक्तफलावाप्तये अमुककामनासिद्ध्यर्थं श्रीभवानीशङ्करप्रसन्नतार्थं पार्थिवलिङ्गपूजां करिष्ये' अथवा 'अमुककामोऽमुकसंख्यया एतावन्तं कालं पार्थिवलिङ्गानि स्वयं ब्राह्मणद्वारा वा पूजयिष्ये, तदङ्गतया भूतशुद्धिं प्राणप्रतिष्ठां मातृकान्यासादिकर्म्म च करिष्ये' इति सङ्कल्प्य पृथ्वि त्वयेति मन्त्रस्य मेरुपृष्ठऋषिः। सुतलं छन्दः। कूर्म्मो देवता। आसनोपवेशने विनियोगः। 'ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता। त्वं च धारय मां देवि पवित्रं कुरु चासनम्॥ १॥' इति भूमिं प्रार्थ्य ॐ पृथिव्यै नमः। ॐ आधारशक्त्यै नमः। ॐ विश्वशक्त्यै नमः। ॐ चिच्छक्त्यै नमः। ॐ मायाशक्त्यै नमः इति गन्धपुष्पै पूजयेत्। ततो मूलेन शिखां बद्ध्वा आचम्य स्वात्मदृष्ट्यावलोकनेन दिव्यान् विघ्नान् 'अस्त्राय फट्' इत्यभिमन्त्रितजलप्रक्षेपणान्तरिक्षस्थान्,

ॐ अपसर्पन्तु ये भूता ये भूता भूमिसंस्थिताः। ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया॥ १॥
अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम्। सर्वेषामविरोधेन ब्रह्मकर्म्म समारभे॥ २॥

इति मन्त्राभ्यां वामपार्ष्णिघातत्रयेण भौमान्तरिक्षगान् विघ्नानुत्सारये। ततः ॐ सर्वभूतनिवारकाय शार्ङ्गाय सशरास्त्रराजाय सुदर्शनाय हुं फट् इति छोटिकाभिस्तालत्रयेण च दिग्बन्धं विधाय ॐ अस्त्राय फट् इति करशुद्धिं कृत्वा ॐ गुरुभ्यो नमः। ॐ परमगुरुभ्यो नमः। ॐ परात्परगुरुभ्यो नमः। ॐ परमेष्ठिगुरुभ्यो नमः। ॐ आचार्यगुरवे नमः। ॐ नमो महद्भ्यः इति नत्वा भूतशुद्धिं कुर्य्यात्।

शिवपार्थिवलिङ्गपूजन का विधान—सर्वप्रथम प्रातःकालीन नित्यकर्मों को समाप्त करके शुभ मुहूर्त में शिवालय अथवा पुण्यस्थान में जाकर वहाँ स्थान को शुद्ध करके अपने आसन पर पूर्वाभिमुख अथवा उत्तराभिमुख अवस्थित होकर भस्मत्रिपुण्ड्र एवं रुद्राक्ष धारण करने के उपरान्त 'ॐ नमः शिवाय' कहकर आचमन-प्राणायाम कर श्रीगणेश जी का स्मरण करे। फिर देश-काल का उल्लेख करते हुए 'अमुकगोत्रोत्पन्नोऽमुकशर्मा (वर्मा / गुप्ता) मम श्रुतिस्मृतिपुराणोक्तफलावाप्तये अमुककामनासिद्ध्यर्थं श्रीभवानीशङ्करप्रसन्नतार्थं पार्थिवलिङ्गपूजां करिष्ये' अथवा 'अमुककामोऽमुकसंख्यया एतावन्तं कालं पार्थिवलिङ्गानि स्वयं वा ब्राह्मणद्वारा पूजयिष्ये, तदङ्गतया भूतशुद्धिं प्राणप्रतिष्ठां मातृकान्यासादिकर्म च करिष्ये' इस प्रकार से सङ्कल्प करके मूल में लिखित विनियोग पढ़कर 'ॐ पृथ्वि त्वया०' इत्यादि मन्त्र से भूमि की प्रार्थना कर मूलोक्त 'ॐ पृथिव्यै नमः' इत्यादि पाँच मन्त्रों से गन्ध एवं

पुष्पों द्वारा पृथ्वी की पूजा करे। फिर मूल मन्त्र से शिखा में गाँठ लगाकर अपनी आत्मदृष्टि से देखकर दिव्य विघ्नों का अपसारण करे। 'अस्त्राय फट्' कहकर जल छोड़े तथा 'ॐ अपसर्पन्तु ये भूताः ये भूता भूमिसंस्थिताः; ये भूता विघ्नकर्तारः ते नश्यन्तु शिवाज्ञया॥ १॥ अपक्रामन्तु भूतानि पिशाचा सर्वतोदिशम्। सर्वेषामविरोधेन ब्रह्मकर्म समारम्भे॥ २॥' इन मन्त्रों के द्वारा समस्त भूतों के निवारक शार्ङ्ग सशस्त्र राजा सुदर्शन को 'हुं फट्' कहकर तीन बार चुटकी बजाकर दिग्बन्ध करके 'ॐ अस्त्राय फट्' कहकर शुद्धि करके मूल में लिखित 'ॐ गुरुभ्यो नमः' इत्यादि छः मन्त्रों को पढ़कर भूतशुद्धि करनी चाहिये।

अथ भूतशुद्धिः—हृदयस्थं प्रदीपकलिकाकारं जीवं ॐ हंसः सोहमिति मन्त्रेण ब्रह्माण्डस्थितसहस्रदल-पद्मान्तर्गतशिवेन संयोज्य 'ॐ लँहाँ सद्योजाताय निवृत्तिकलात्मने हुं फट्' इति पादादिजानुपर्य्यन्तं न्यसेत्॥ १॥ ॐ वँहीँ वामदेवाय प्रतिष्ठाकलात्मने हुं फट् इति जान्वादिनाभिपर्य्यन्तं०॥ २॥ ॐ रँ हूँ अघोराय विद्याकलात्मने हुं फट् इति नाभ्यादिहृदयान्तं०॥ ३॥ ॐ यँहैँ तत्पुरुषाय शान्तिकलात्मने हुं फट् इति हृदयादिभ्रूमध्यान्तं०॥ ४॥ ॐ हँ हौँ ईशानाय शान्त्यतीताय कलात्मने हुं फट् इति भ्रूमध्यादि ब्रह्मरन्ध्रान्तं च विन्यसेत्। एवं भूतानि सञ्चिन्त्य जन्मान्तरे दुःखप्रदं पापपुरुषमसद्वासनात्मकं वामकुक्षिस्थितं ॐ यँ इति वायुबीजं पूरके षोडशवारं जपित्वा विशोष्य ॐ रं इति वह्निबीजं कुम्भके चतुःषष्टिवारं जप्त्वा तं दहेत्। ततः ॐ यँ इति वायुबीजं रेचके द्वात्रिंशद्वारं जप्तेन तद्भस्म शरीराद्बहिर्निष्कास्य पुनः वँ इति षोडशधा सुधाबीजजप्तेन तद्भस्म सम्प्लाव्य लँ इति षोडशधा जप्तेन भूबीजेन घनीकृत्य कनकाण्डवत् विभाव्य नित्यशुद्धबुद्धमुक्तस्वभावं ब्रह्मैवाहमिति भावयेत्। ततः ॐ हों ईशानाय नमः मूर्ध्नि॥ १॥ ॐ हें तत्पुरुषाय नमः मुखे॥ २॥ ॐ हुं अघोराय नमः हृदि॥ ३॥ ॐ हिं वामदेवाय नमः गुह्ये॥ ४॥ ॐ हं सद्योजाताय नमः पादयोः॥ ५॥ इति न्यसेत्। एवमुत्पन्ने देवात्मके देहे ब्रह्माण्डस्थितपरमात्मनः सकाशाज्जीवं हंसः सोहमिति हृदयमानीय स्वप्राणप्रतिष्ठां कुर्य्यात्। इति भूतशुद्धिः।

भूतशुद्धि इस प्रकार करे—अपने हृदय में प्रदीपकलिका के आकार के (ज्योतस्वरूप) जीव को 'ॐ हंसः सोहम्' इस मन्त्र से ब्रह्माण्ड-स्थित सहस्रदल पद्मान्तर्गत शिव से संयोजित कर 'ॐ लं हां सद्योजाताय निवृत्तिकालात्मने हुं फट्' इस मन्त्र से पैरों के घुटनों तक न्यास करे। फिर 'ॐ वं हीं वामदेवाय प्रतिष्ठाकलात्मने हुं फट्' इस मन्त्र से घुटनों से लेकर नाभिपर्यन्त न्यास करे। फिर 'ॐ रं हूं अघोराय विद्याकलात्मने हुं फट्' इस मन्त्र से नाभि से लेकर हृदय-पर्यन्त न्यास करे। फिर 'ॐ यं हैं तत्पुरुषाय शान्तिकलात्मने हुं फट्' इस मन्त्र से हृदय से लेकर भ्रूमध्य-पर्यन्त न्यास करे। फिर 'ॐ हूं हौं ईशानाय शान्त्यतीताय कलात्मने हुं फट्' इस मन्त्र से भ्रूमध्य से लेकर ब्रह्मरन्ध्र-पर्यन्त न्यास करे। इस प्रकार भूतों का चिन्तन कर जन्मान्तरों में दुःखप्रद असद्वासनात्मक वामकुक्षिस्थित पापपुरुष को 'ॐ यं' इस वायुबीज का पूरक (प्राणायाम) में बत्तीस बार जप करके उसकी भस्म को शरीर से बाहर निकालकर 'ॐ रं' इस अग्निबीज को कुम्भक प्राणायाम में चौंसठ बार जपकर उसको जला दे। फिर 'ॐ यं' इस वायुबीज को रेचक प्राणायाम की घनीभूत करके कनकाण्ड (सोने की अण्डे) की भाँति भावना करके 'मैं नित्य शुद्ध बुद्ध स्वभाव ब्रह्म हूँ' ऐसी भावना करे। तब 'ॐ हों ईशानाय नमः' कहकर शिर में, 'ॐ हें तत्पुरुषाय नमः' से मुख में, 'ॐ हुं अघोराय नमः' से हृदय में, 'ॐ हिं वामदेवाय नमः' से गुह्य (गुप्ताङ्ग) में एवं 'ॐ हं सद्योजाताय नमः' से पैरों में न्यास करे। इस प्रकार साधक का शरीर देवात्मक हो जाता है। तब उसमें ब्रह्माण्ड-स्थित परमात्मा के समीप जीव 'हंसः सोहं' इस मन्त्र के द्वारा हृदय में लाकर स्वयं की प्राणप्रतिष्ठा करे।

अथ स्वशरीरप्राणप्रतिष्ठा—अस्य प्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुरुद्रा ऋषयः। ऋग्यजुःसामानि च्छन्दांसि। प्राणशक्तिर्देवता। आँ बीजम्। ह्रीं शक्तिः। क्रौं कीलकम्। स्वशरीरप्राणप्रतिष्ठापने विनियोगः। 'ॐ ब्रह्मविष्णुरुद्रऋषिभ्यो नमः शिरसि। ॐ ऋग्यजुःसामच्छन्दोभ्यो नमः मुखे। ॐ प्राणशक्त्यै देवतायै नमः हृदये। ॐ आँ बीजाय नमः गुह्ये। ॐ ह्रीं शक्त्यै नमः पादयोः। ॐ क्रौं कीलकाय नमः सर्वाङ्गे' इति ऋष्यादिन्यासः। ॐ ह्राँआँअँकँखँगँघँङँआँआकाश-वायुतेजोजलपृथिव्यात्मने आँ अङ्गुष्ठाभ्यां नमः॥ ॐ ह्रीँइँचँजँझँञँ ईंशब्दस्पर्शरूपरसगन्धात्मने ईं तर्जीभ्यां नमः॥ ॐ ह्रूँऊँटँठँडँढँणँ ऊँ श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मने मध्यमाभ्यां नमः॥ ॐ ह्रैँऐँतँथँदँधँनँऐँ वाक्पाणिपादपायूपस्थात्मने ऐँ अनामिकाभ्यां नमः॥ ॐ ह्रौँऔँपँफँबँभँमँऔँ वचनादानगतिविसर्गानन्दात्मने औँ कनिष्ठिकाभ्यां नमः। ह्रःअँयँरँलँवँ शँषँसँहँळँक्षँअँमनोबुद्ध्यहङ्कारचित्तज्ञानात्मने अः करतलकरपृष्ठाभ्यां नमः। इति करन्यासः। तत एवं हृदयादिन्यासं कुर्य्यात्। ॐ ह्राँअँकँ० १९ आँ हृदयाय नमः॥ १॥ ॐ ह्रीँ इँचँ० १७ ईं शिरसे स्वाहा॥ २॥ ॐ ह्रूँऊँटँ १७ ऊँ शिखायै वषट्॥ ३॥ ॐ ह्रैँऐँतँ० १७ ऐं कवचाय हुम्॥ ४॥ ॐ ह्रौँ औँ पँ० १९ औँ नेत्रत्रयाय वौषट्॥ ५॥ ॐ ह्रः अँयँ० २४ अं अस्त्राय फट्॥ ६॥ इति हृदयादिन्यासः।

साधक द्वारा स्वयं के शरीर की प्राणप्रतिष्ठा—सर्वप्रथम मूल में लिखित 'अस्य प्राणप्रतिष्ठामन्त्रस्य०' इत्यादि वाक्य को पढ़कर स्वशरीर-प्राणप्रतिष्ठा के विनियोग का जल छोड़े। फिर ॐ ब्रह्मविष्णुरुद्रऋषिभ्यो नमः शिरसि इत्यादि छः मन्त्रों से ऋष्यादि न्यास करे। फिर आगे लिखे मन्त्रों से क्रमशः अङ्गुष्ठ, तर्जनी, मध्यमा, अनामिका, कनिष्ठिकाओं एवं करतलपृष्ठों के द्वारा नमस्कार करते हुए न्यास करे। इसी प्रकार से इन्हीं मन्त्रों से हृदयादि न्यास भी क्रमशः 'हृदयाय नमः, शिरसे स्वाहा, शिखायै वषट्, कवचाय हुं, नेत्रत्रयाय वौषट् तथा अस्त्राय फट्' कहकर करना चाहिये।

प्राणशक्तिध्यानम्

अथ प्राणशक्तेर्ध्यानम्—

रक्ताम्भोधिस्थपोतोल्लसदरुणसरोजाधिरूढाकराब्जैः पाशं कोदण्डमिक्षूद्भवमणिगुणमप्यङ्कुशं पञ्चबाणान्।
बिभ्राणासृक्कपालं त्रिनयनलसिता पीनवक्षोरुहाढ्या देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः॥ १॥

इति ध्यात्वा स्वहृदि करं निधाय ॐ आँह्रीँ क्रौँ यँरँलँवँशँषँसँहौंहंसः मम प्राणा इह प्राणाः॥ १॥ ॐ आँह्रींक्रौँ यँरँ० मम जीव इह स्थितः॥ २॥ ॐ आँह्रींक्रौँ यँ० मम सर्वेन्द्रियाणि वाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा॥ ३॥ इति वारत्रयं पठित्वा पञ्चदशप्रणवावृत्तीः कृत्वा क्रमेण मम संस्कारा जाता इति भावयेत्। इति प्राणप्रतिष्ठां कृत्वा ततः पूर्वोक्तपद्धतिकाण्डोक्तमन्तर्मातृकाबहिर्मातृकान्यासं च कृत्वा पञ्चाक्षरोदितं श्रीकण्ठादि-कलान्यासं च कुर्य्यात्। एवं न्यासं कृत्वा सूर्य्यायार्घ्यं दत्त्वा 'ॐ सर्वाधारधरे देवि त्वद्रूपां मृत्तिकामिमाम्। ग्रहीष्यामि प्रसन्ना त्वं लिङ्गाय भव सुप्रभे॥' इति भूमिं प्रार्थ्य 'ॐ ह्रां पृथिव्यै नमः' इति षडर्णेनाभिमन्त्र्य 'उद्धृतासि वराहेण कृष्णेन शतबाहुना। मृत्तिके त्वां च गृह्णामि प्रजया च धनेन च॥ ॐ हराय नमः' इति शुचिस्थानात् (पाषाण-वेणुकीटकेशास्थिवालुकादिदोषरहितामीशानकोणगताम्) मृदं शस्त्रेणोत्कीर्य सुस्निग्धां शुभ्रां मृदमानाय निःशर्करां कृत्वा प्रत्यहं पूजनाय संशुद्धे ताम्रादिपात्रे निदध्यात्। ततस्तां दृष्ट्यावलोकनेन संशोध्य ॐ (वँ) इति अमृत-बीजेनाभिमन्त्रितजलप्रक्षेपेण सम्पीड्य तेन पिण्डं कृत्वा तस्मात्पिण्डादल्पां मृदमादाय ॐ ह्रीं ग्लौं गं गणपतये ग्लौं गं ह्रीं इत्येकादशा११क्षरमन्त्रेण बालगणेश्वरं वराभयलसत्पाणिपद्मं निर्माय ततः 'ॐ महेश्वराय नमः' इति मनोहरं लिङ्गमङ्गुष्ठादिदशाङ्गुलान्तं सङ्घट्टनं विधाय एवमन्यान्यपि लिङ्गानि यथासङ्कल्पितानि कृत्वा अवशिष्टमृदा 'ॐ ॐ ऐं हुं क्षं क्लीं कुमाराय नमः' इति दशाक्षरमन्त्रेण षण्मुखं कुमारं च कृत्वा पङ्क्त्यन्ते स्थापयेत्।

तावत् पीठपूजा। पीठं जलेन प्रोक्ष्य तत्र पूर्वादिदिक्षु ॐ वामायै नमः ॥ १ ॥ ॐ ज्येष्ठायै नमः ॥ २ ॥ ॐ रौद्र्यै नमः ॥ ३ ॥ काल्यै नमः ॥ ४ ॥ ॐ कलविकरण्यै नमः ॥ ५ ॥ ॐ बलविकरण्यै नमः ॥ ६ ॥ ॐ बलप्रमथिन्यै नमः ॥ ७॥ ॐ सर्वभूतदमन्यै नमः ॥ ८ ॥ (मध्ये) मनोन्मन्यै नमः ॥ ९ ॥ इति पीठशक्तीः सम्पूज्य 'ॐ नमो भगवते सकलगुणात्मशक्तियुक्तायानन्ताय योगपीठात्मने नमः' इति पुष्पाञ्जलिना आसनं दत्त्वा तत्र स्वपुरतः 'ॐ शूलपाणये नमः' इति पीठमध्ये संस्थापयेत्। तत आचम्य प्राणानायम्य ॐ अस्य श्रीसदाशिवमन्त्रस्य वामदेव ऋषिः। पङ्क्तिश्छन्दः। श्रीसदाशिवो देवता। ॐ बीजम्। नमः शक्तिः। शिवाय कीलकं। मम साम्बसदाशिवप्रीत्यर्थे पार्थिवलिङ्गपूजने विनियोगः। ॐ वामदेवऋषये नमः शिरसि ॥ १ ॥ ॐ पङ्क्तिच्छन्दसे नमः मुखे ॥ २ ॥ ॐ सदाशिवदेवतायै नमः हृदये ॥ ३ ॥ ॐ बीजाय नमः गुह्ये ॥ ४ ॥ ॐ नमः शक्तये नमः पादयोः ॥ ५ ॥ ॐ शिवाय कीलकाय नमः सर्वाङ्गे ॥ ६ ॥ इति ऋष्यादिन्यासः। ॐ अङ्गुष्ठाभ्यां नमः ॥ १ ॥ ॐ नं तर्जनीभ्यां नमः ॥ २ ॥ ॐ मं मध्यमाभ्यां नमः ॥ ३ ॥ ॐ शिं अनामिकाभ्यां नमः ॥ ४॥ ॐ वां कनिष्ठिकाभ्यां नमः ॥ ६ ॥ ॐ यं करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः। एवं हृदयादिषडङ्गन्यासं कुर्यात्। ॐ नं तत्पुरुषाय नमो हृदये ॥ १ ॥ ॐ मं अघोराय नमः पादयोः ॥ २ ॥ ॐ शिं सद्योजाताय नमो गुह्ये ॥ ३ ॥ ॐ वां वामदेवाय नमो मूर्ध्नि ॥ ४ ॥ ॐ यं ईशानाय नमो मुखे ॥ ५ ॥ एवं न्यासविधिं कृत्वा ध्यायेत्।

अथ ध्यानम्—

ॐ ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं
रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम्।
पद्मासीनं समन्तात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं
विश्वाद्यं विश्ववन्द्यं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम्॥

इति ध्यात्वा मानसोपचारैः सम्पूज्य प्राणप्रतिष्ठां कुर्यात्।

प्राणशक्ति का ध्यान—रक्ताम्भोधि (लाल समुद्र) के ऊपर स्थित पोत में अरुण सरोज के ऊपर विराजमान, पाश, धनुष, इक्षूद्भव मणिगुण, अङ्कुश तथा पञ्चबाणों के साथ रक्तपूर्ण कपालयुक्त, त्रिनेत्र, पीनवक्षोरुद्रयुक्त, बालसूर्य के वर्ण वाली प्राणशक्ति परादेवी हमारे लिये सुख करने वाली हो—ऐसा ध्यान कर अपने हृदय पर हाथ लगाकर 'ॐ आं, ह्रीं, क्रौं यं रं लं वं शं षं सं हौं हंसः मम प्राणा इह प्राणाः' इत्यादि मूल में लिखित तीन मन्त्रों को तीन बार पढ़कर पन्द्रह आवृत्ति प्रणव की करके मन में यह भावना करे कि क्रमशः मेरे संस्कार सम्पन्न हो गये हैं। इस प्रकार से प्राणप्रतिष्ठा करके फिर पूर्व में पद्धतिकाण्ड में वर्णित अन्तर्मातृका, बहिर्मातृका न्यास करके पञ्चाक्षर मन्त्र के अनुष्ठान में वर्णित श्रीकण्ठादि कलान्यास करे। फिर सूर्य को अर्घ्य दे तथा मूलोक्त 'ॐ सर्वाधारधरे०' इत्यादि मन्त्र से भूमि की प्रार्थना कर 'ॐ पृथिव्यै नमः' इस मन्त्र के द्वारा अभिमन्त्रित कर 'उद्धृतासि वराहेण०' इस मन्त्र के साथ 'ॐ हराय नमः' कहकर शुद्ध स्थान से मृदु मिट्टी लाकर छानकर प्रतिदिन के लिये ताम्रपात्र में पूजित कर रख ले तथा दृष्टि से शुद्ध कर 'वं' इस अमृतबीज से जल डालकर सान ले। उसका पिण्ड बना ले और उस पिण्ड में से थोड़ी मिट्टी लेकर 'ॐ ह्रीं ग्लौ० गं गणपतये ग्लौं गं ह्रीं' इस मन्त्र से ग्यारह बालगणपति बनाकर 'ॐ महेश्वराय नमः' कहकर सुन्दर लिङ्ग बना ले। इस प्रकार मिट्टी से सङ्कल्पित सङ्ख्या में लिङ्ग बनाने के पश्चात् जो मिट्टी बचे, उससे 'ॐ ॐ ऐं हुं क्षं, क्लीं कुमाराय नमः' इस दशाक्षर मन्त्र से स्वामि कार्तिकेय की छः मुखी मूर्ति बनाकर लिङ्गों की पङ्क्ति के अन्त में स्थापित करे। फिर मूल में लिखित मन्त्रों से वामादि ९ पीठशक्तियों की पूजा करे। तदनन्तर 'ॐ नमो भगवते सकलगुणात्मशक्तियुक्तायानन्ताय योगपीठात्मने नमः' कहकर पुष्पाञ्जलि द्वारा

आसन देकर पुनः मूल में लिखित मन्त्रों से विनियोग कर ऋष्यादि न्यास, करन्यास, हृदयादि षडङ्ग न्यास करके 'ॐ ध्यायेन्नित्यं महेशं०' इत्यादि श्लोक से श्री शिवजी का ध्यान कर मानसोपचारों से पूजा करे।

देवप्राणप्रतिष्ठा

अस्य श्रीप्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः ऋग्यजुःसामानि च्छन्दांसि क्रियामयवपुः प्राणाख्या देवता। आं बीजम्। ह्रीं शक्तिः। क्रौं कीलकम्। देवे प्राणप्रतिष्ठापने विनियोगः। ॐ ब्रह्मविष्णुरुद्र ऋषिभ्यो नमः शिरसि॥ १॥ ॐ ऋग्यजुःसामच्छन्दोभ्यो नमो मुखे॥ २॥ ॐ प्राणाख्यदेवतायै नमः हृदि॥ ३॥ ॐ आं बीजाय नमो गुह्ये॥ ४॥ ॐ ह्रीं शक्तये नमः पादयोः॥ ५॥ ॐ क्रौं कीलकाय नमः सर्वाङ्गे इति कृत्वा ॐ आँह्रींक्रौंयँरँलँ वँशँषँसँहँसः सोहं शिवस्य प्राणा इह प्राणाः॥ १॥ ॐ आँह्रीँ क्रौँ यँरँलँवँशँषँसँहँसः सोहं शिवस्य जीव इह स्थितः॥ २॥ आँह्रीँ क्रौँ यँरँलँवँशँषँसँहँसः सोहं शिवस्य सर्वेन्द्रियाणि वाङ्मनस्त्वक्चक्षुश्श्रोत्रत्वग्जिह्वाघ्राणपाणिपादपायूस्थानि इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा॥ ३॥ एवं प्राणप्रतिष्ठां कृत्वा ध्यायेत्—

बिभ्रद्दोर्भिः कुठारं मृगमभयवरौ सुप्रसन्नो महेशः सर्वालङ्कारदीप्तः सरसिजनिलयो व्याघ्रचर्म्मार्त्तवासाः।
ध्येयो मुक्ताङ्गरागामृतरसकणिकाद्रिप्रभः पञ्चवक्त्रस्त्र्यक्षः कोटीरकोट्युच्चटितहिमरुचिः सर्वदा चन्द्रमौलिः॥

इति ध्यात्वा नमस्कारं कुर्यात्। तद्यथा—

नमोऽस्तु स्थाणुरूपाय ज्योतिर्लिङ्गामृतात्मने। चतुर्मूर्तेश्च पुंछायाभासिताङ्गाय शम्भवे॥
सर्वज्ञज्ञानविज्ञानप्रदानैकमहात्मने। नमस्ते देवदेवेश सर्वभूतहितेरत॥
अनन्तकान्तिसम्पन्न अनन्तासनसंस्थित। अनन्तकान्तिसम्भोग परकान्त नमोऽस्तु ते॥
वज्ररूप महारूप सर्वरूपोत्तमोत्तम। पशुपाशार्णवासीन दृढव्रत नमोऽस्तु ते॥
स्वभावनिर्मलाकार सर्वोपाधिविनाशन। योगियोगिन्महायोग योगीश्वर नमोऽस्तु ते॥

इति नत्वा स्थापितं लिङ्गं स्पृशन् 'ॐ भूः पुरुषं साम्बसदाशिवमावाहयामि॥ १॥' इत्यावाह्य—

ॐ स्वामिन्सर्वजगन्नाथ यावत्पूजावसानकम्। तावत्त्वं प्रीतिभावेन लिङ्गेऽस्मिन्सन्निधो भव॥ १॥

इति पुष्पाञ्जलिं दत्त्वा 'ॐ ग्लौं गं गणपतये ग्लौं गं ह्रीं' इत्येकादशार्णमन्त्रेण गणपतिं सम्पूज्य ॐ ऐँ हुँ क्षुँ क्लीँ कुमाराय नमः' इति दशाक्षरमन्त्रेण स्कन्दं पूजयेत्॥ ३॥

देव की प्राणप्रतिष्ठा—मूल में लिखित 'अस्य श्रीप्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः' इत्यादि से विनियोग का जल छोड़कर फिर आगे दिये छः मन्त्रों से क्रमशः शिर, मुख, हृदय, गुह्य, दोनों पैर तथा सर्वाङ्ग में नमः करके 'ॐ आँ ह्रीं क्रौं यं रं लं वं शं षं सं हंसः सोहं प्राणा इह प्राणाः।' इत्यादि तीन मन्त्रों से देव (शिव) की प्राणप्रतिष्ठा करके ध्यान करे ध्यान के लिये 'बिभ्रद्दोर्भिः कुठारं०' इत्यादि श्लोक का प्रयोग करे। फिर 'नमोस्तु स्थाणुरूपाय०' इत्यादि पाँच श्लोकों से नमस्कार करना चाहिये। नमस्कार के उपरान्त लिङ्ग का स्पर्श करके 'ॐ भूः पुरुषं साम्बसदाशिवं आवाहयामि०' इत्यादि तीन मन्त्रों से आवाहन कर 'ॐ स्वामिन्सर्वजगन्नाथ०' इत्यादि एक श्लोक से पुष्पाञ्जलि दे। फिर 'ॐ ह्रीं ग्लौं गं गणपतये ग्लौं गं ह्रीं' इस ग्यारह अक्षर के मन्त्र से गणपति को पूजकर 'ॐ ऐं हुं क्षुं क्लीं कुमाराय नमः' इस दश अक्षर के मन्त्र से स्कन्द (स्वामी कार्तिकेय) की पूजा करनी चाहिये।

शिवपूजनम्

अथ शिवपूजनम्; तत्रादौ ध्यानम्—

दक्षाङ्कस्थं गणपतिमुखं प्रामृशन्दक्षदोष्णा वामोरुस्थां नगपतनयाङ्के गुहं चापरेण।
इष्टाभीती परकरयुगे धारयन्निन्दुकान्तिरव्यादस्मांस्त्रिभुवननतो नीलकण्ठस्त्रिनेत्रः॥

एवं ध्यात्वा—ॐ नमोस्तुनीलग्रीवायसहस्राक्षायमीढुषेअथोयेऽअस्यसत्त्वानोहंतेभ्योकरन्नमः॥१॥ ॐ श्रीसाम्बसदाशिवाय नमः पाद्यं समर्पयामि इति पाद्यं दद्यात्॥१॥ ॐ गायत्रीत्रिष्टुब्जगत्यनुष्टुप्पंक्त्यासह। बृहत्युष्णिहाकुकुप्सूचीभिःशम्यन्तु त्वा॥२॥ ॐ श्रीसाम्बसदाशिवाय नमः अर्घ्यं समर्पयामि इत्यर्घ्यम्॥२॥ ॐ त्र्यम्बकंयजामहेसुगन्धिम्पुष्टिवर्द्धनम्। उर्व्वारुकमिवबन्धनान्मृत्योर्मुक्षीयमामृतात्॥३॥ ॐ साम्बसदाशिवाय नमः आचमनं समर्पयामि इत्याचमनम्॥३॥ ॐ मधुव्वाताऽऋतायते० इति मधुपर्कम्॥४॥ ॐ साम्बसदाशिवाय नमः इत्याचमनीयम्॥५॥ ॐ व्वरुणस्योत्तंभनमसि व्वरुणस्यस्कंभसर्ज्जनीस्थोव्वरुणस्यऋतसदन्यसिव्वरुणस्यऽऋतसदनमसिव्वरुणस्यऋतसदनमासीद॥६॥ ॐ साम्बसदाशिवाय नमः जलस्नानं समर्पयामि इति जलस्नानम्॥६॥ ॐ पयःपृथिव्यांपयऽओषधीषुपयोदिव्यन्तरिक्षे पयोधाः। पयस्वतीःप्रदिशःसन्तुमह्यम्॥७॥ ॐ साम्बसदाशिवाय नमः पयःस्नानं समर्पयामि इति पयःस्नानम्॥७॥ ॐ दधिक्राव्णोऽअकारिषंजिष्णोरश्वस्यव्वाजिनः। सुरभिनोमुखाकरत्प्राणआयूंषितारिषत्॥८॥ ॐ साम्बसदाशिवाय नमः दधिस्नानं समर्पयामि दधिस्नानं, पुनर्जलस्नानम्॥८॥ ॐ घृतंघृतपावानःपिबतव्वसांव्वसापावानःपिबतान्तरिक्षस्यहविरसिस्वाहादिशःप्रदिशऽआदिशोव्विदिशऽउद्दिशोदिग्भ्यःस्वाहा॥९॥ ॐ साम्बसदाशिवाय नमः घृतस्नानं समर्पयामि इति घृतस्नानं, पुनर्जलस्नानम्॥९॥ ॐ मधुव्वाताऽऋतायतेमधुक्षरन्तिसिन्धवःमाध्वीर्न्नःसन्त्वोषधीःमधुनक्तमुतोषसोमधुमत्पार्थिवंरजः मधुद्यौरस्तुनःपितामधुमान्नोव्वनस्पतिर्म्मधुमाँऽ२अस्तुसूर्यःमाध्वीर्गावोभवन्तुनः॥१०॥ ॐ साम्बसदाशिवाय नमः मधुस्नानं समर्पयामि इति मधुस्नानं पुनर्जलस्नानम्॥१०॥ ॐ अपांरसमुद्वयसंसूर्य्येसन्तंसमाहितम्। अपांरसस्ययोरसस्तंवोगृह्णाम्युत्तममुपयामगृहीतोसीन्द्रायत्वाजुष्टंगृह्णाम्येषतेयोनिरिन्द्रायत्वाजुष्टतमम्॥११॥ ॐ साम्बसदाशिवाय नमः शर्करोदकस्नानं समर्पयामि इति शर्करोदकस्नानं पुनर्जलस्नानम्॥११॥ ॐ पञ्चनद्यःसरस्वतीमपियन्तिसस्रोतसः। सरस्वतीतु पञ्चधासोदेशेऽभवत्सरित्॥१२॥ ॐ साम्बसदाशिवाय नमः पञ्चामृतस्नानं समर्पयामि इति पञ्चामृतस्नानम्॥१२॥ ॐ शुद्धवालःसर्वशुद्धवालोमणिवालस्तऽआश्विनाःश्येतःश्येताक्षोरुणस्तेरुद्रायपशुपतयेकर्णायामाऽअवलिप्तारौद्रानभोरूपाःपार्ज्जन्याः॥१३॥ ॐ साम्बसदाशिवाय नमः शुद्धोदकस्नानं समर्पयामि इति शुद्धोदकस्नानम्॥१३॥ ततः स्नानान्ते ॐ नमोरुद्र० इति षोडशभिर्ऋग्भिः अभिषेकं कुर्यात्। ततः ॐ प्रमुञ्चधन्न्वनस्त्वमुभयोरार्त्न्योर्ज्याम्। याश्चतेहस्तऽइषवःपराताभगवोव्वप॥१४॥ ॐ साम्बसदाशिवाय नमः वस्त्रं कौपीनं समर्पयामि इति वस्त्रकौपीनम्॥१४॥ ॐ विज्यंधनुःकपर्दिनोव्विशल्योबाणवाँ२उत। अनेशन्नस्यवाऽइषवआभुरस्यनिषंगधिः॥१५॥ ॐ साम्बसदाशिवाय नमः आभरणं समर्पयामि इत्याभरणम्॥१५॥ ॐ ब्रह्मजज्ञानंप्रथमंपुरस्ताद्विसीमतःसुरुचोव्वेनऽआवःसबुध्न्या उपमाऽअस्यव्विष्ठाःसतश्चयोनिमसतश्चव्विवः॥१६॥ ॐ साम्बसदाशिवाय नमः यज्ञोपवीतं समर्पयामि इति यज्ञोपवीतम्॥१६॥ आचमनं दद्यात्॥ ॐ नमःश्वभ्यःश्वपतिभ्यश्चवोनमोनमोभवायचरुद्रायचनमःशर्वायचपशुपतयेचनमोनीलग्रीवायचशितिकण्ठायचनमःकपर्दिने॥१७॥ ॐ साम्बसदाशिवाय नमः गन्धं समर्पयामि इति गन्धम्॥१७॥ नमः शम्भवायचमयोभवायचनमःशङ्करायचमयस्करायचनमःशिवायचशिवतरायच॥१८॥ ॐ साम्बसदाशिवाय नमः अक्षतान् समर्पयामि इत्यक्षताः॥१८॥ नमःपार्यायचावार्य्यायचनमःप्रतरणायचोत्तरणायचनमस्तीर्थ्यायचकूल्यायचनमःशष्प्यायचफेन्यायचनमः॥१९॥ ॐ साम्बसदाशिवाय नमः पुष्पं समर्पयामि इति पुष्पाणि॥१९॥ ॐ नमोबिल्मिनेचकवचिनेचनमोवर्म्मिणेचवरूथिनेचनमः। श्रुतायचश्रुतसेनायचनमोदुन्दुभ्याय चाहनन्यायचनमोधृष्णवे॥२०॥ ॐ साम्बसदाशिवाय नमः बिल्वपत्रं समर्पयामि इति बिल्वपत्राणि॥२०॥ ॐ काण्डात्काण्डात्प्ररोहन्ती परुषःपरुषस्परि। एवानोदूर्वेप्रतनुसहस्रेणशतेन च॥२१॥ ॐ साम्बसदाशिवाय नमः दूर्वा समर्पयामि इति दूर्वाम्॥२१॥ एवं पुष्पान्तपूजां कृत्वा आवरणार्चनं कुर्यात्।

शिवपूजाविधि—'दक्षाङ्कस्थं गणपतिमुखं' इत्यादि श्लोक से सर्वप्रथम भगवान् शिव का ध्यान करे। श्लोक का भावार्थ निम्न प्रकार है—'जो अपने दाहिने अङ्क (गोद) में स्थित गणपति के मूल को दाहिने हाथ से सहला रहे हैं, जिनके वाम ऊरु पर स्थित पार्वती जी की गोद में श्री कार्तिकेय बैठे हैं, उन्हें अपने अपरहस्त (वामहस्त) से दुलार रहे हैं। अपने अन्य दो हाथों में इष्ट (वरदमुद्रा) तथा अभय मुद्रा धारण किये हैं तथा अपने चन्द्रमा के समान धवल कान्ति के शरीर से त्रिभुवन को जगमगा रहे हैं, वे नीलकण्ठ तथा त्रिनेत्र हैं।'

इस प्रकार ध्यान करके 'नमोस्तु नीलग्रीवाय सहस्राय०' इत्यादि मन्त्र से पाद्य प्रदान करे। फिर 'गायत्रीत्रिष्टुप्०' इत्यादि मन्त्र द्वारा अर्घ्य प्रदान करे। फिर 'त्र्यम्बकं यजामहे०' इत्यादि से आचमन दे। फिर 'ॐ मधुव्वाता ऋतायते०' इत्यादि से मधुपर्क दे। पुनः 'ॐ साम्बसदाशिवाय नमः' कहकर आचमन कराये। फिर 'ॐ वरुणस्य स्तम्भनमसि०' इत्यादि से जलस्नान कराये। फिर 'ॐ पयः पृथिव्यां०' इत्यादि से दुग्धस्नान कराये। फिर 'ॐ दधिक्रब्णो०' इत्यादि से दधिस्नान तथा पुनः जल से स्नान कराये। फिर 'ॐ घृतं घृतपावानः०' इत्यादि से घृतस्नान कराकर पुनः जलस्नान कराये। फिर 'ॐ मधुव्वाता०' इत्यादि से मधुस्नान कराकर पुनः जलस्नान कराये। फिर 'ॐ अपाꣳ रसमुद्वयꣳ०' इत्यादि से शर्करोदक स्नान कराकर पुनर्जलस्नान कराये। फिर 'ॐ पञ्चनद्यः सरस्वती०' इत्यादि मन्त्र से पञ्चामृत स्नान कराये। फिर 'शुद्धवालः सर्वशुद्धवालो०' इत्यादि से शुद्धोदक स्नान समर्पित करे। फिर शुद्धोदक स्नान के अन्त में 'ॐ नमस्ते रुद्र०' इत्यादि १६ ऋचाओं से अभिषेक कराये। फिर 'ॐ प्रमुञ्चधन्वन०' इत्यादि मन्त्र से कौपीन प्रदान करे॥ १४॥ फिर 'ॐ विज्ज्यन्धनुः कपर्दिनो०' से आभरण दे॥ १५॥ फिर 'ॐ ब्रह्मजज्ञानं०' इत्यादि मन्त्र से यज्ञोपवीत देकर फिर आचमन कराये। फिर 'ॐ नमः अश्वभ्यः अश्वपतिभ्यः०' मन्त्र से गन्ध दे। फिर 'नमः शम्भवाय०' से अक्षत, फिर 'नमः पार्याय०' से पुष्प, फिर 'नमोः बिल्मिने०' इत्यादि से बिल्वपत्र और अन्त में फिर 'काण्डात् काण्डात् प्ररोहन्ती०' से दूर्वा चढ़ाये। इस प्रकार पूजोपरान्त फिर आवरणपूजा करे।

तद्यथा—ॐ अघोराय नमः॥ १॥ ॐ पशुपतये नमः॥ २॥ ॐ शिवाय नमः॥ ३॥ ॐ विरूपाय नमः॥ ४॥ ॐ विश्वरूपाय नमः॥ ५॥ ॐ भैरवाय नमः॥ ६॥ ॐ त्र्यम्बकाय नमः॥ ७॥ ॐ शूलपाणये नमः॥ ८॥ ॐ कपर्दिने नमः॥ ९॥ ॐ ईशानाय नमः॥ १०॥ ॐ महेशाय नमः॥ ११॥ इत्येकादशरुद्रान् सम्पूज्य ततः ॐ भगवत्यै नमः॥ १॥ ॐ उमादेव्यै नमः॥ २॥ ॐ शङ्करप्रियायै नमः॥ ३॥ ॐ पार्वत्यै नमः॥ ४॥ ॐ गौर्यै नमः॥ ५॥ ॐ कालिन्द्यै नमः॥ ६॥ ॐ काटिव्यै नमः॥ ७॥ ॐ विश्वधारिण्यै नमः॥ ८॥ ॐ विश्वेश्वर्यै नमः॥ ९॥ ॐ विश्वमात्रे नमः॥ १०॥ ॐ शिवायै नमः॥ ११॥ इति शक्तीः पूजयेत्। एवं सगणं रुद्रं सम्पूज्य वेद्यामष्टमूर्तीः अक्षतादिना पूजयेत्। तद्यथा प्राच्याम् ॐ शर्वाय क्षितिमूर्तये नमः॥ १॥ ईशान्याम् ॐ भवाय जलमूर्तये नमः॥ २॥ उदीच्याम् ॐ रुद्रायाग्निमूर्तये नमः॥ ३॥ वायव्याम् ॐ उग्राय वायुमूर्तये नमः॥ ४॥ प्रतीच्याम् ॐ भीमायाकाशमूर्तये नमः॥ ५॥ नैर्ऋत्याम् ॐ पशुपतये यजमानमूर्तये नमः॥ ६॥ दक्षिणस्याम् ॐ महादेवाय सोममूर्तये नमः॥ ७॥ आग्नेय्याम् ॐ ईशानाय सूर्यमूर्तये नमः॥ ८॥ इति सम्पूज्य प्रणालिकायां 'ह्रीं उमायै नमः' इति पूजयेत्। तद्बहिः पूर्वादिषु इन्द्रादिदशदिक्पालान् सम्पूजयेत्। इत्यावरणपूजा।

ततः ॐ नर्मःकपर्दिने चव्व्युप्तकेशायचुनर्मःसहस्राक्षायच शुतर्धन्वनेचुनमोगिरिशुयार्यचशिपिविष्टायचुनमों- मीढुष्टमायचेषुमतेचुनमोंह्रस्वाय॥२२॥ ॐ साङ्गाय साम्बसदाशिवाय नमः धूपं समर्पयामि इति धूपम्॥२२॥ ॐ नर्मऽआशवेचाजिरायचुनमःशीघ्र्यायचुशीभ्यायचुनमऽऊर्म्याय चावस्वुन्यायच नमोंनादेयायचुद्वीप्यायच॥२३॥ ॐ साङ्गाय साम्बशदाशिवाय नमः दीपं समर्पयामि इति दीपम्॥२३॥ ॐ नमोंज्येष्ठायच कनिष्ठायचुनर्मःपूर्व-

जार्यचापरजार्यचनमौमध्यमार्यचापगल्भार्यचनमोजघन्यायचबुध्न्यायचनमःसोभ्याय॥२४॥ ॐ साङ्गाय साम्बसदाशिवाय नमः नैवेद्यं समर्पयामि। इति नैवेद्यम्॥२४॥ ॐ त्र्यम्बकम्यजामहेसुगन्धिंपुष्टिवर्द्धनम्। उर्वारुकमिवबन्धनान्मृत्योर्मुक्षीयमामृतात्॥२५॥ ॐ साङ्गाय साम्बसदाशिवाय नमः आचमनीयं समर्पयामि॥२५॥ ॐ इमारुद्रायतवसेकपर्दिनेक्षयद्वीरायप्रभरामहेमतीः। यथाशमसद्द्विपदेचतुष्पदेविश्वंपुष्टंग्रामेऽअस्मिन्ननातुरम्॥२६॥ ॐ साङ्गाय साम्बसदाशिवाय नमः ताम्बूलम् समर्पयामि इति ताम्बूलम्॥२६॥ ॐ श्रीश्चते लक्ष्मीश्च० ॐ साङ्गाय साम्बसदाशिवाय नमः ऋतुफलम् समर्पयामि इति ऋतुफलम्॥२७॥ ॐ हिरण्यगर्भःसमवर्ततताग्रेभूतस्यजातःपतिरेकऽआसीत् सदाधारपृथिवीन्द्यामुतेमाङ्कस्मै देवाय हविषाविधेम॥२८॥ ॐ साङ्गाय साम्बसदाशिवाय नमः दक्षिणां समर्पयामि। इति दक्षिणाम्॥२८॥ एवं सम्पूज्य साक्षतजलेन तर्पणं कार्य्यम्॥ ॐ भवं देवं तर्पयामि॥ १ ॥ ॐ शर्वं देवं तर्पयामि॥ २ ॥ ॐ ईशानं देवं तर्पयामि॥ ३ ॥ ॐ पशुपतिं देवं तर्पयामि॥ ४॥ ॐ उग्रं देवं तर्पयामि॥ ५ ॥ ॐ रुद्रं देवं तर्पयामि॥ ६ ॥ ॐ भीमं देवं तर्पयामि॥ ७॥ ॐ महान्तं देवं तर्पयामि॥ ८ ॥ ॐ भवस्य देवस्य पत्नीं तर्पयामि॥ १॥ ॐ शर्वस्य देवस्य पत्नीं तर्पयामि॥ २ ॥ ॐ ईशानस्य देवस्य पत्नीं तर्पयामि॥ ३ ॥ ॐ पशुपतेर्देवस्य पत्नीं तर्पयामि॥ ४॥ ॐ उग्रस्य देवस्य पत्नीं तर्पयामि॥ ५ ॥ ॐ रुद्रस्य देवस्य पत्नीं तर्पयामि॥ ६ ॥ ॐ भीमस्य देवस्य पत्नीं तर्पयामि॥ ७॥ ॐ महतो देवस्य पत्नीं तर्पयामि॥ ८ ॥ एवं तर्पणं कृत्वा कर्पूरगर्भिताभिरेकादशवर्तिकाभिः कर्पूरेण वा आरार्तिकं कुर्य्यात्॥

आवरण पूजा—मूल में लिखित 'ॐ अघोराय नमः' इत्यादि ११ (ग्यारह) मन्त्रों से आवरणरुद्रों का पूजन करे। फिर गणों-सहित रुद्र की पूजा करके वेदी पर शिव की अष्टमूर्तियों की पूजा अक्षत आदि से करे (साथ ही 'ॐ उमादेव्यै नमः' से ११ शक्तियों का पूजन करे)। इनके ८ मन्त्र मूल में लिखे हैं। फिर शिवजी की जलप्रणालिका (पनाली) में 'ॐ ह्रीं उग्रायै नमः' से पूजा करे। अन्त में उसके बाहर इन्द्रादि दश दिक्पालों की पूजा करनी चाहिये।

आवरण-पूजोपरान्त 'ॐ नमः कपर्दिने०' इत्यादि मूलोक्त मन्त्र से धूप प्रदान करे। फिर 'ॐ नमः आशवो०' इत्यादि से दीप प्रदान करे। फिर 'ॐ नमो ज्येष्ठाय' से नैवेद्य दे। फिर 'ॐ त्र्यम्बकं यजामहे०' इत्यादि से आचमन कराये। फिर 'ॐ इमारुद्राय०' से ताम्बूल देकर 'ॐ श्रीश्चते लक्ष्मीश्च०' इत्यादि से ऋतुफल प्रदान करे। फिर 'हिरण्यगर्भः समवर्त्तताग्रे०' से दक्षिणा समर्पित करे।

तर्पण—फिर उपर्युक्त पूजनोपरान्त मूल में लिखे 'ॐ भवं देवं तर्पयामि०' इत्यादि आठ मन्त्रों से जल द्वारा तर्पण करना चाहिये। तदुपरान्त 'ॐ भवस्य देवस्य पत्नीं तर्पयामि' इत्यादि आठ मन्त्रों से रुद्रों की आठो पत्नियों का तर्पण करना चाहिये। फिर तर्पण के उपरान्त कर्पूर-गर्भित ग्यारह बत्तियों से अथवा केवल कपूर से आरार्त्तिक (आरती) करना चाहिये।

तत्र नीराजनम्—

ॐ कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारम्।
सदा वसन्तं हृदयारविन्दे भवं भवानीसहितं नमामि॥

वन्दे देवमुमापतिं सुरगुरुं वन्दे जगत्कारणं वन्दे पन्नगभूषणं मृगधरं वन्दे पशूनां पतिम्।
वन्दे सूर्यशशाङ्कवह्निनयनं वन्दे मुकुन्दप्रियं वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम्॥

शान्तं पद्मासनस्थं शशधरमुकुटं पञ्चवक्त्रं त्रिनेत्रं शूलं वज्रं च खड्गं परशुमभयदं दक्षभागे वहन्तम्।
नागं पाशं च घण्टां डमरुकसहितं साङ्कुशं वामभागे नानालङ्कारयुक्तं स्फटिकमणिनिभं पार्वतीशं नमामि॥

सामान्य नीराजन (छोटी आरती)—'ॐ कर्पूरगौरं करुणावतारं संसारसारं०' इत्यादि श्लोकों से आरती करनी चाहिये।

द्वितीयं शिवनीराजनम्—

जय गङ्गाधर हर जय गिरिजाधीशा। त्वं मां पालय नित्यं कृपया जगदीशा॥
हर हर हर महादेव॥ १॥
कैलासे गिरिशिखरे कल्पद्रुमविपिने। गुञ्जति मधुकरपुञ्जे कुञ्जवने सुघने।
कोकिलकूजतखेलतहंसावनललिता। रचयित कलाकलापं नृत्यति मुदसहिता॥
हर हर हर महादेव॥ २॥
तस्मिन् ललितसुदेशे शाला मणिरचिता। तन्मध्ये हरनिकटे गौरी मुदसहिता॥
क्रीडा रचयति भूषारञ्जितनिजमीशम्। इन्द्रादिकसुरसेवित नामयते शीशम्॥
हर हर हर महादेव॥ ३॥
विबुधवधू बहु नृत्यति हृदये मुदसहिता। किन्नर गायन कुरुते सप्तस्वरसहिता॥
धिनकत थैथै धिनकत मृदङ्ग वादयते। क्वणक्वण ललिता वेणुं मधुरं नादयते॥
हर हर हर महादेव॥ ४॥
रुणरुण चरणे चरयति नूपुरमुज्ज्वलिता। चक्रावर्ते भ्रमयति कुरुते तां धिकताम्॥
तां तां लुपचुप तां तां वादयते। अङ्गुष्ठाङ्गुलिनादं लासक्तां कुरुते॥
हर हर हर महादेव॥ ५॥
कर्पूरद्युतिगौरं पञ्चाननसहितम्। त्रिनयनशशिधरमौलिं विषधरकण्ठयुतम्॥
सुन्दरजटाकलापं पावकयुतभालम्। डमरुत्रिशूलपिनाकं करधृतनृकपालम्॥
हर हर हर महादेव॥ ६॥
मुण्डै रचयति माला पन्नगमुपवीतम्। वामविभागे गिरिजारूपं अति ललितम्॥
सुन्दरसकलशरीरे कृतभस्माभरणम्। इति वृषभध्वजरूपं तापत्रयहरणम्॥
हर हर हर महादेव॥ ७॥
शङ्खनिनादं कृत्वा झल्लरि नादयते। नीराजयते ब्रह्मा वेदऋचां पठते॥
अतिमृदुचरणसरोजं हृदिकमले धृत्वा। अवलोकयति महेशं ईशं अभिनत्वा॥
हर हर हर महादेव॥ ८॥
ध्यानं आरतिसमये हृदये अति कृत्वा। रामस्त्रिजटानाथं ईशं अभिनत्वा॥
सङ्गितमेवं प्रतिदिनपठनं यः कुरुते। शिवसायुज्यं गच्छति भक्त्या यः शृणुते॥
हर हर हर महादेव॥ ९॥

इति नीराजनम्।

बृहत् नीराजन (बड़ी आरती)—यदि सम्भव हो तो 'ॐ जय गंगाधर हर जय गिरिजाधीशा। त्वं मां पालय नित्यं कृपया जगदीशा। हर हर हर महादेव' इत्यादि नव श्लोकों से युक्त बड़ी आरती गाकर नीराजन करना चाहिये।

प्रदक्षिणा—ॐ येतीर्त्थानि प्रचरंतिसृकाहस्तानिषङ्गिणः। तेषांᳬसहस्त्रयोजनेवधन्वानि तन्मसि॥१॥ यानि कानि च पापानि जन्मांतरकृतानि च। तानि सर्वाणि नश्यन्तु प्रदक्षिणपदे पदे॥ ॐ साम्बसदाशिवाय नमः प्रदक्षिणं समर्पयामीति प्रदक्षिणत्रयं कुर्यात्। शिवरहस्ये—

प्रदक्षिणत्रयं कुर्य्यात्तथा पञ्च दशाथ वा। प्रदक्षिणत्रयान्न्यूनं नैव कार्य्यं महेश्वरे॥ १॥
पूजां कृत्वा तु यः शम्भोर्न करोति प्रदक्षिणम्। सा पूजा निष्फला ज्ञेया पूजकः स च दाम्भिकः॥ २॥
भक्त्या करोति यः सम्यक् केवलं तु प्रदक्षिणम्। पूजा सर्वा कृता तेन स सम्यक् शिवपूजकः॥ ३॥

प्रदक्षिणा—

ॐ ये तीर्थानि प्रचरन्ति सृकाहस्ता निषङ्गिणः। तेषां सहस्रयोजनेऽवधन्वानि तन्मसि॥ १॥
यानि कानि च पापानि जन्मान्तरकृतानि च। तानि सर्वाणि नश्यन्त प्रदक्षिण पदे पदे॥ २॥

कहकर फिर 'ॐ साम्बसदाशिवाय नमः प्रदक्षिणं समर्पयामि' कहकर तीन प्रदक्षिणा शिवजी को समर्पित करे।

शिवरहस्य के अनुसार प्रदक्षिणा का महत्व—शिवजी की पूजा में तीन-पाँच अथवा दश प्रदक्षिणा करनी चाहिये। शिव की तीन से कम प्रदक्षिणा नहीं करनी चाहिये। जो पूजा करके शम्भु की प्रदक्षिणा नहीं करता है, उसकी पूजा निष्फल समझनी चाहिये तथा उस पूजक को दम्भी समझना चाहिये। जो शिव की सम्यक् रूप से प्रदक्षिणामात्र करता है, उसने मानो शिव का सम्पूर्ण पूजन कर लिया है।

अथ पुष्पाञ्जलिमन्त्रा—ॐ युज्ञेनयुज्ञमयजन्तदेवास्तानिधर्म्माणिप्रथमान्न्यासन्। तेहुनाकम्महिमानःसचन्तु- यत्रपूर्व्वेसाध्याःसन्तिदेवाः॥१॥ ॐ साङ्गाय साम्बसदाशिवाय नमः मन्त्रपुष्पाञ्जलिं समर्पयामि इति पुष्पाञ्जलिं दत्त्वा 'ॐ प्रपन्नं पाहि मामीश भीतं मृत्युग्रहार्णवात्' इति साष्टाङ्गं प्रणामं कुर्य्यात्। ततो यथाशक्ति पञ्चाक्षरमन्त्रं जपित्वा गुह्यातिगुह्य० इति मन्त्रेण जपं समर्प्य क्षमापराधमहिमप्रभृतिपुराणैः प्राकृतैश्च स्तवैः स्तुत्वा देवं प्रार्थयेत्।

ॐ अङ्गहीनं क्रियाहीनं विधिहीनं महेश्वर। पूजितोऽसि मया देव तत् क्षमस्व भ्रमात्कृतम्॥
यद्यप्युपहृतैः पुष्पैरपास्तैर्भावदूषितैः। केशकीटापविद्धैश्च पूजितोऽसि मया प्रभो॥
अन्यत्रासक्तचित्तेन क्रियाहीनेन वा प्रभो। मनोवाक्कायदुष्टेन पूजितोऽसि त्रिलोचन॥
यच्चोपहतपात्रेण कृतमर्घ्यादिकं मया। तामसेन च भावेन तत्क्षमस्व मम प्रभो॥
मन्त्रेणाक्षरहीनेन पुष्पेण विफलेन च। पूजितोऽसि महादेव तत्सर्वं क्षम्यतां मम॥
व्रतं सम्पूर्णतां यातु फलं चाक्षयमश्नुते।
अज्ञानयोगादुपचारकर्म यत्पूर्वमस्माभिरनुष्ठितंते। तदेव सोद्वासनकं दयालो पितेव पुत्रान्प्रतनो जुषस्व॥
अयं दानकालस्त्वहं दानपात्रं भवानेव दाता त्वदन्यं न याचे।
भवद्भक्तिमन्तःस्थिरां देहि मह्यं कृपाशील शम्भो कृतार्थोऽस्मि यस्मात्॥
ॐ नम ओंकाररूपाय नमोऽक्षरवपुर्धृते। नमो नादात्मने तुभ्यं नमो बिन्दुकलात्मने॥
अलिङ्गलिङ्गरूपाय रूपातीताय ते नमः। त्वं माता सर्वलोकानां त्वमेव जगतः पिता॥
त्वं भ्राता त्वं सुहृन्मित्रं त्वं प्रियःप्रियरूपधृक्। त्वं गुरुस्त्वं गतिः साक्षात्त्वं पिता त्वं पितामहः॥
नमस्ते भगवन् रुद्र भास्करामिततेजसे। नमो भवाय रुद्राय रसायाम्बुमयाय च॥
शर्वाय क्षितिरूपाय सदासुरमिणे नमः। पशूनां पतये तुभ्यं पावकामिततेजसे॥
भीमाय व्योमरूपाय शब्दमात्राय तेनमः। महादेवाय सोमाय अमृताय नमोऽस्तु ते॥
उग्राय यजमानाय नमस्ते कर्मयोगिने। पार्थिवस्य च लिङ्गस्य यन्मया पूजनं कृतम्॥
तेन मे भगवान् रुद्रो वाञ्छितार्थं प्रयच्छतु॥

इति प्राथ्र्य अर्घ्योदकमादाय 'ॐ इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतो जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा वाचा कर्म्मणा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत्कृतं यदुक्तं तत्सर्वं ब्रह्मार्पणं भवतु' इति पठित्वा देवस्य चरणयोः क्षिपेत्।

पुष्पाञ्जलि मन्त्र—'ॐ यज्ञेन यज्ञमयजन्तदेवा०' इत्यादि मन्त्र से पुष्पाञ्जलि समर्पित करे। फिर 'ॐ प्रपन्नं पाहि मामीश भीतं मृत्युर्ग्रहाणवात्०' कहकर साष्टाङ्ग प्रणाम करे। फिर यथाशक्ति पञ्चाक्षर मन्त्र (ॐ नमः शिवाय) का जपकर के 'गुह्यातिगुह्यगोप्तात्व०' इत्यादि कहकर जप समर्पित कर शिवक्षमापराधमहिम आदि का पाठ करे। फिर 'ॐ अङ्गहीनं क्रियाहीनं०' इत्यादि पन्द्रह श्लोकों (मन्त्र में लिखित) का पाठ करे। फिर अर्घ्य का जल लेकर 'ॐ इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतो जाग्रत् स्वप्न सुषुप्ति अवस्थासु मनसा वाचा कर्मणा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत्कृतं तदुक्तं यत्सर्वं ब्रह्मार्पणं भवतु।' ऐसा पढ़कर देव (शिव) के चरणों में जल छोड़ें।

ततः ॐ साधु वाऽसाधु वा कर्म्म यद्यदाचरितं मया। तत्सर्वं कृपा देव गृहाणाराधनं मम॥ १॥ इत्यर्घजलं किञ्चिद्देवोपरि निक्षिप्य पुष्पाञ्जलिमादाय 'ॐ रश्मिरूपा महादेवा अत्र पूजितदेवताः। सदाशिवाङ्गलीनास्ताः सन्तु सर्वाः सुखावहाः'॥ १॥ इति देवोपरि निक्षिप्य तेजोरूपं ध्यात्वा ॐ गच्छ गच्छ परं स्थानं स्वस्थानं परमेश्वर। यत्र ब्रह्मादयो देवा न विदुः परमं पदम्॥ १॥ ॐ नमो महादेवाय इति पठित्वा संहारमुद्रया विसृजेत्। ततो गणपतिस्कन्दौ विसृज्य ईशान्यां जलेन मण्डलं कृत्वा 'ॐ व्यापकमण्डलाय नमः' इति सम्पूज्य 'ॐ चण्डेश्वराय नमः' इति निर्माल्यनैवेद्यादिकं संस्थाप्य ध्यायेत्।

चण्डेश्वरं रक्ततनुं त्रिनेत्रं रक्तांशुकाढ्यं हृदि भावयामि। टङ्कं त्रिशूलं स्फटिकाक्षमालां कमण्डलुं बिभ्रतमिन्दुचूडम्॥

इति ध्यात्वा 'ॐ चण्डेश्वराय नमः' इति निर्माल्येन सम्पूज्य 'ॐ ध्वूं फट् चण्डेश्वर इमं बलिं गृह्ण स्वाहा' इति तत्त्वमुद्रया चरणोदकधारादानेन समर्प्य—

ॐ बलिदानेन सन्तुष्टश्चण्डेशः सर्वसिद्धिदः। शान्तिं करोतु मे नित्यं शिवभक्तिं ददातु च॥
लेह्यचोष्यान्नपानादि ताम्बूलं स्रग्विलेपनम्। निर्माल्यभोजनं तुभ्यं ददामि श्रीशिवाज्ञया॥
इति निर्माल्यपुष्पाञ्जलिं समर्प्य नाराचमुद्रां प्रदर्श्य गच्छगच्छेति विसृजेत्।

ॐ बाणरावणचण्डीशनन्दिभृङ्गिरिट्यादयः। शङ्करस्य प्रसादोऽयं सर्वे गृह्णन्तु शाम्भवाः॥
निर्माल्यसलिलं पीत्वा देवदेवस्य शूलिनः। क्षयापस्मारकुष्ठाद्यैस्सद्यो मुच्येत पातकैः॥
अकालमृत्युहरणं पुण्यं ब्रह्महत्या विनाशनम्। व्याधिघ्नं भक्तकायस्य शिवनिर्णेजनोदकम्॥
इति निर्माल्यजलं पीत्वा प्रणमेत्। पुनर्निर्माल्यपुष्पादिकं लिङ्गं च नद्यादौ जलमध्ये क्षिपेत्।

तदनन्तर 'ॐ साधु वाऽसाधु वा कर्म्म यद्यदाचरितं मया। तत्सर्वं कृपया देव गृहाणाराधनं मम॥' यह कहकर अर्घ्य का थोड़ा-सा जल देव के ऊपर छोड़ना चाहिये। इसके पश्चात् पुष्पाञ्जलि लेकर 'ॐ रश्मिरूपा महादेवा अत्र पूजितदेवताः। सदाशिवाङ्गलीनास्ताः सन्तु सर्वाः सुखावहाः' यह कहकर पुष्पाञ्जलि को देव के ऊपर छोड़े। फिर उनके तेजोरूप का ध्यान करके 'ॐ गच्छ गच्छ परं स्थानं स्वस्थानं परमेश्वर। यत्र ब्रह्मादयो देवाः न विदुः परमं पदम्॥ 'ॐ नमो महादेवाय' कहकर संहार मुद्रा बनाकर विसर्जन करे। फिर गणपति तथा स्कन्द को विसर्जित कर ईशान में जल से मण्डल बनाकर 'ॐ व्यापकमण्डलाय नमः' कहकर पूजन करके 'ॐ चण्डेश्वराय नमः' इस मन्त्र से निर्माल्य नैवेद्य आदि को स्थापित कर 'चण्डेश्वरं रक्ततनुं त्रिनेत्रं रक्तांशुकाढ्यं हृदि भावयामि। टङ्कं त्रिशूलं स्फटिकाक्षमालां कमण्डलुं विभ्रतमिन्दुचूडम्॥' इस श्लोक के अनुसार चण्डेश्वर का ध्यान करे। फिर 'ॐ चण्डेश्वराय नमः' ऐसा कहकर निर्माल्य से चण्डेश्वर (भगवान् शिव के गणों) की पूजा करे। फिर 'ॐ ध्वूं फट्

चण्डेश्वर इमं बलिं गृह्ण स्वाहा' कहकर तत्त्वमुद्रा बनाकर चण्डेश्वर को बलि दे तथा शिवचरणोदक की धारा भी समर्पित करे। फिर 'ॐ बलिदानेन सन्तुष्टः' इत्यादि दो श्लोकों से निर्माल्य पुष्पाञ्जलि समर्पित करके नाराचमुद्रा प्रदर्शित कर 'गच्छ गच्छ' कहकर चण्ड का विसर्जन करे।

निर्माल्योदकदान—'ॐ बाणरावणचण्डीश०' इत्यादि तीन श्लोकों के मन्त्र से शिवनिर्माल्य जल को पीकर प्रणाम करे तथा फिर निर्माल्यादि को तथा पार्थिव लिङ्गों को नदी आदि के जल में डाल देना चाहिये।

पार्थिवपूजनमहिमा

मन्त्रमहोदधौ—

यो लिङ्गं पूजयेन्नित्यं शिवभक्तिपरायणः। मेरुतुल्योऽपि तस्याशु पापराशिर्लयं व्रजेत्॥
दोग्ध्रीणां तु गवां लक्षं यो दद्याद्वेदपाठिने। पार्थिवं योऽर्चयेल्लिङ्गं तयोर्लिङ्गार्चको वरः॥
चतुर्दश्यां तथाष्टम्यां पौर्णमास्यां विधुक्षये। पयसा स्नापयेल्लिङ्गं धरादानफलं व्रजेत्॥
लिङ्गपूजां विधायाग्रे स्तोत्रं वा शतरुद्रियम्। प्रजपेत्तन्मना भूत्वा शिवलोके महीयते॥
यत्संख्याकं यजेल्लिङ्गं तन्मितं होममाचरेत्। आज्यान्वितैस्तिलैरग्नौ घृतैर्वा पायसेन वा॥
शिवमन्त्रेण तस्यान्ते ब्राह्मणान्भोजयेच्छतम्। एवं कृते समस्तेष्टसिद्धिर्भवति निश्चितम्॥

पार्थिव-पूजन का महत्त्व (मन्त्रमहोदधि के अनुसार)—जो शिवभक्ति-परायण होकर नित्य ही पार्थिव शिवलिङ्गों का पूजन करता है, उसके द्वारा किये गये पापों की राशि यदि मेरु पर्वत के बराबर भी बड़ी हो तो भी वह शीघ्र ही नष्ट हो जाती है। एक व्यक्ति ने वेदपाठी ब्राह्मण को एक लाख गायें दान में दी हों तथा दूसरे ने केवल पार्थिव शिवलिङ्गों का पूजन (एक लाख या सवा लाख) की सङ्ख्या में किया हो तो उन दोनों में से पार्थिव लिङ्गपूजक को अधिक शुभ फल मिलता है। जो व्यक्ति चतुर्दशी अथवा अष्टमी अथवा पूर्णिमा अथवा अमावास्या के दिन दूध से शिवलिङ्ग को स्नान कराता है (अथवा पार्थिव लिङ्गों को स्नान कराता है), उस व्यक्ति को पृथ्वी के दान करने का फल प्राप्त होता है। जो सर्वप्रथम लिङ्गपूजा करके फिर शतरुद्रिय सूक्त का पाठ भक्तिपूर्वक करता है, वह शिवसायुज्य को प्राप्त होकर शिवलोक में आनन्द भोगता है। जितनी सङ्ख्या में लिङ्गों की अर्चा हो, उतनी सङ्ख्या में ही होम करना चाहिये। घृत से लिप्त तिलों से अग्नि में होम करना चाहिये अथवा केवल घृत अथवा घृत-पायस से होम करना चाहिये। होम शिवमन्त्र से करना चाहिये तथा होमान्त में एक सौ ब्राह्मणों को भोजन कराना चाहिये; इससे निश्चित ही सभी मनोरथ सफल होते हैं।

पार्थिवपूजने कामनाभेदाच्छिवलिङ्गसङ्ख्या

अथ कामनाभेदेन सङ्ख्याभेदः शान्तिसारे—

दैशिकात्सकलं ज्ञात्वा कुर्य्याल्लिङ्गं फलप्रदम्। विद्यार्थी लिङ्गसाहस्रं धनार्थी च तदर्द्धकम्॥
पुत्रार्थी सप्तसाहस्रं कन्यार्थी तु शतत्रयम्। वन्ध्या लिङ्गायुतं कुर्यात्सर्वपापहरं शुभम्॥
राज्यार्थी शतसाहस्रं कान्तार्थी शतपञ्चकम्। मोक्षार्थी कोटिगुणितं भूकामश्च सहस्रकम्॥
रूपार्थी तु त्रिसाहस्रं तीर्थार्थी द्विसहस्रकम्। सुहृत्कामः सहस्रं स्याद्वस्त्रार्थी शतमष्टकम्॥
मारणार्थी सप्तशतं मोहनार्थी शताष्टकम्। उच्चाटनपरश्चैव सहस्रं तु यथोक्तवत्॥
स्तम्भनं तु सहस्रेण जारणे च तदर्द्धवत्। निगडान्मुक्तिकामस्तु सहस्रं सार्द्धमीरितम्॥

महाराजभये पञ्चशतं चौरादिसङ्कटे। शतद्वयं च डाकिन्या भये पञ्चशतं परम्॥
दरिद्रः पञ्चसाहस्रमयुतं सर्वकामदम्॥

कामनाभेद से सङ्ख्याभेद (शान्तिसार के अनुसार)—आचार्य से सम्पूर्ण विधि जानकर जो पार्थिव शिवलिङ्ग का पूजन करता है, उसको फल प्राप्त होता है। विद्यार्थी को एक सहस्र पार्थिव शिवलिङ्गों का निर्माण कर अर्चा करनी चाहिये। धनार्थी को पाँच सौ लिङ्गों का अर्चन प्रतिदिन करना चाहिये। पुत्रार्थी को सात सहस्र तथा कन्यार्थी (विवाह के इच्छुक) को तीन सौ, वन्ध्या स्त्री को अयुत (दश सहस्र) लिङ्गों की अर्चना करनी चाहिये; यह उसके सम्पूर्ण पापों का हरण कर शुभ फल देता है। राज्यार्थी को सौ सहस्र (१००,०००) अर्थात् एक लाख, स्त्री चाहने वाले को ५००, मोक्षार्थी को पाँच करोड़, भूमि चाहने वाले को एक सहस्र, रूपार्थी को तीन सहस्र, तीर्थार्थी को दो सहस्र, सुहृत्कामी (मित्रार्थी) को एक सहस्र, वस्त्रार्थी को आठ सौ, मारणार्थी को सात सौ, मोहनार्थी को आठ सौ एवं उच्चाटनार्थी एक सहस्र लिङ्गार्चन यथोक्त विधि से करना चाहिये। स्तम्भन-कार्य के लिये एक सहस्र, जारण-हेतु पाँच सौ एवं जेल से मुक्त होने के लिये पन्द्रह सौ की सङ्ख्या कही गयी है। महान् राजभय की शान्ति के लिये तथा चौरादि के सङ्कट से मुक्त होने के लिये पाँच सौ, डाकिनी के दोष में दो सौ तथा भयमुक्ति-हेतु पाँच सौ पार्थिव लिङ्गपूजन उत्तम होता है। यदि दरिद्रता का नाश करना हो तो पाँच सहस्र तथा सभी कार्यों की सिद्धि के लिये अयुत सङ्ख्या (१०,०००) में पार्थिव लिङ्ग का पूजन करना चाहिये।

मन्त्रमहोदधौ—

लक्षपार्थिवलिङ्गानां पूजानाद्धुवि मुक्तिभाक्। लक्षं तु मृडलिङ्गानां पूजनात्पार्थिवो भवेत्॥
या नारी मृडलिङ्गानि सहस्रं पूजयेत्सती। भर्तुः सुखमखण्डं सा प्राप्यते पार्वती भवेत्॥
नवनीतस्य लिङ्गानि सम्पूज्येष्टमवाप्नुयात्। भस्मना गोमयस्यापि वालुकायास्तथा फलम्॥
क्रीडन्ति पृथुका भूमौ कृत्वा लिङ्गं रजोमयम्। पूजयन्ति विनोदेन तेऽपि स्युः क्षितिनायकाः॥

मन्त्रमहोदधि के अनुसार सङ्ख्याभेद—एक लाख पार्थिव शिवलिङ्गों का पूजन करने वाला मुक्ति का भागी होता है। यदि राज्यकामी एक लाख पूजन करता है तो वह राजा हो जाता है। जो सती स्त्री एक सहस्र शिवलिङ्गों का पूजन करती है, वह पार्वती जी की भाँति अपने पति का अखण्ड सुख प्राप्त करती है। नवनीत (मक्खन) का शिवलिङ्ग बनाकर जो पूजन करता है, उसे अभीष्ट-सिद्धि होती है। यही फल भस्म अथवा गोबर अथवा बालू का भी होता है। यदि भूमि में खेलने वाले पृथुक (बच्चे) भी विनोद में धूलि से लिङ्ग बनाकर उनकी पूजा करते हैं तो वे भी क्षितिनायक (राजा या शासक = उच्चाधिकारी) बन जाते हैं।

विमर्श—यहाँ मूल में बच्चों के लिये संस्कृत शब्द पृथुकाः प्रयोग हुआ है। यह बहुवचन है। एकवचन रूप पृथुकः है। इसका पालिरूप पुथुक अथवा पुथुको होता है, फिर पुथुक का बिगड़कर पुदु या पिदु तथा पृथुको = पुथुको का पिथियो या पिदियों हो जाता है। यही फिर ग्रीक भाषा में Paid, Pais या Paedo, Pedes आदि हो गया है, जिसका अर्थ बालक (Child) होता है। इसी शब्द से अंग्रेजी के Paediatrics (कौमारभृत्य = बालरोग चिकित्सा) तथा Paediatrician (बालरोग चिकित्सक) आदि शब्द बने हैं, जिनका प्रयोग आधुनिक चिकित्सा विज्ञान में किया जाता है। इनमें Paediatrician (पीडियाड्रीशियन) तथा Paediatric शब्दों का निर्माण Paedia+iatros शब्दों के मेल से हुआ है, जो कि संस्कृत के 'पृथुकात्रेयः' शब्द का घिसा हुआ रूप है, जिसका

आत्रेय = पुनर्वसु आत्रेय होता है। आयुर्वेद के इतिहास में अग्निवेश के गुरु महर्षि पुनर्वसु आत्रेय का नाम प्रसिद्ध है। आत्रेय के नाम पर चिकित्सा का सम्प्रदाय एवं परम्परा अद्यावधि प्रचलन में है। आत्रेय के शिष्य भी आत्रेय कहलाते थे। आयुर्वेद अष्टाङ्ग है; अतः उनमें एक अङ्ग का नाम 'कौमारभृत्य' (बालरोगचिकित्सा) है। अतः जो वैद्य बालरोग-विशेषज्ञ होते थे, उनको 'पृथुकात्रेय' अर्थात् बच्चों का आत्रेय (Physician) या वैद्य कहा जाता था। जब आयुर्वेद का ज्ञान ग्रीक में पहुँचा तब पृथुकात्रेय शब्द घिसकर ग्रीक भाषा में 'पिदिकात्रेयस्' हो गया, जिसका बिगड़ा हुआ रूप अंग्रेजी में 'पिडियाट्रिक्स' है। यह सब लिखने का तात्पर्य यह है कि प्राचीन काल में भारत से ही सब विद्याएँ यूरोप में पहुँची हैं तथा वैदिक संस्कृत भाषा ही यूरोप की लैटिन, ग्रीक, जर्मन, फ्रेञ्च, स्पेनिश, रूसी, अंग्रेजी आदि भाषाओं की जननी है।

प्रातर्गोमयलिङ्गानि नित्यं यस्त्रीणि पूजयेत्। बृहतीबिल्वयोः पत्रैर्नैवेद्यं गुडमर्पयेत्॥
एवं मासत्रयं कुर्वन्ननल्पं लभते धनम्। एकादशैव लिङ्गानि गोमयोत्थानि यो यजेत्॥
प्रातर्मध्याह्नयोः सायं निशीथे प्रतिवासरम्। स सर्वाः सम्पदः पायात् षण्मासादेवमाचरन्॥
एकादश यजेन्नित्यं शालिपिष्टमयानि यः। लिङ्गानि मासमात्रेण स कल्मषचयं दहेत्॥
स्फाटिकं पूजितं लिङ्गमेनोनिकरनाशनम्। सर्वकामप्रदं पुंसामुदुम्बरसमुद्भवम्॥
रेवाश्मजं सर्वसिद्धिप्रदं दुःखविनाशनम्। यथाकथञ्चिल्लिङ्गस्य पूजा नित्यकृतेष्टदा॥
यो यजेत्पिचुमन्दोत्थैः पत्रैर्गोमयजं शिवम्। क्रुद्धं महेश्वरं ध्यायन्स पराजयते रिपून्॥

जो प्रतिदिन प्रातःकाल गोमय (गाय के गोबर) से लिङ्ग बनाकर तीन की सङ्ख्या में पूजता है तथा कटेरी के फल, बेलपत्र तथा गुड़ का नैवेद्य चढ़ाता है, उसे तीन मास तक पूजन करने के उपरान्त प्रचुर मात्रा में धन की प्राप्ति होती है। जो गोबर के ग्यारह लिङ्ग प्रतिदिन प्रातः, मध्याह्न, सायंकाल तथा आधी रात को बनाकर उनकी पूजा करता है, उसे छः मास में सर्वसम्पदा की प्राप्ति होती है। जो शालि चावलों के आटे से प्रतिदिन ग्यारह लिङ्ग बनाकर पूजता है, उसके एक मास तक पूजन करने से सभी पाप भस्म हो जाते हैं। जो स्फटिक से बने शिवलिङ्ग की पूजा करता है, उसके कलङ्कों के समूह (मनोविकार) नष्ट हो जाते हैं। गूलर को पीसकर बने लिङ्गों का पूजन सर्वार्थ-साधक होता है। नर्मदा नदी के पत्थर से निर्मित लिङ्ग की पूजा सब प्रकार से सफलता देकर सभी दुःखों को नष्ट करती है। किसी भी प्रकार से शिवलिङ्ग बनाकर की गई पूजा नित्य होने पर अभीष्ट सिद्ध करती है। जो पिचुमन्द के पत्तों (नीम के पत्तों) को पीसकर तथा गोबर मिलाकर बनाये गये शिवलिङ्गों की पूजा करता है तथा शङ्कर के क्रोधी स्वरूप का ध्यान करता है, उसके शत्रु नष्ट होते हैं।

शान्तिसारे नित्यपूजने सङ्ख्या—

एकं पापहरं प्रोक्तं द्विलिङ्गं चाथ सिद्धिदम्। त्रिलिङ्गं सर्वकामानां कारणं परमाद्भुतम्॥
यत्फलं पाकयज्ञेषु हविर्यज्ञेषु यत्फलम्। एकाहात्तदवाप्नोति लिङ्गार्चनरतः सदा॥
गवां शतसहस्रस्य सम्यग्दत्तस्य यत्फलम्। दशाहात्तदवाप्नोति सम्यग्लिङ्गार्चने रतः॥
वाजपेयशतैरिष्ट्वा यल्लभन्ते द्विजोत्तमाः। विप्रो विंशतिरात्रेण रुद्रभक्त्या तदाप्नुयात्॥
अश्वमेधसहस्रस्य सम्यगिष्टस्य यत्फलम्। मासेन तदवाप्नोति रुद्रलिङ्गार्चने रतः॥
राजसूयसहस्रस्य सम्यगिष्टस्य यत्फलम्। मासेन तदवाप्नोति शिवलिङ्गार्चने रतः॥
सर्वतीर्थाभिषेकस्य सर्वदानफलानि च। सर्वयज्ञफलं चैव उपवासफलानि च॥

सम्यगिष्टफलः सर्वक्षेमाचारः समाधिना। नवमासात्समासाद्य ब्राह्मणो विजितेन्द्रियः।
सर्वमेतदवाप्नोति लिङ्गे योऽर्चयते शिवम्॥

यस्तु संवत्सरं पूर्णं पूजयदेकलिङ्गकम्। तस्य तुष्टः प्रयच्छामि गाणपत्यं न संशयः॥
माघे मासि समुद्युक्तस्त्रिसन्ध्यं योऽर्चयेच्छिवम्। लभेत्षाण्मासिकं पुण्यं मासेनैव न संशयः॥
यथा माघे तथाऽऽषाढे कार्त्तिके तु विशेषतः। त्रिषु पुण्यं समं ज्ञेयं मासेष्वेतेषु यत्फलम्॥
यस्तु पूजयते नित्यं लिङ्गं त्रिभुवनेश्वरम्। स स्वर्गराज्यमोक्षाणां क्षिप्रं भवति भाजनम्॥

शान्तिसार के अनुसार नित्य पूजनसङ्ख्या—नित्य एक लिङ्ग की पूजा पापनाशक, दो लिङ्गों की पूजा सिद्धिदायक एवं तीन लिङ्गों की पूजा सभी कामनाओं को पूरी करने वाली तथा अद्भुत फल देने वाली होती है। जो फल पाकयज्ञों तथा हविर्यज्ञों से प्राप्त होता है, वह फल केवल एक दिन के लिङ्गार्चन से मिलता है। जो फल विधिपूर्वक एक सौ सहस्र (१००,०००) गोदान का मिलता है, वह दश दिन के सम्यक् लिङ्गार्चन से मिल जाता है। श्रेष्ठ ब्राह्मण एक सौ वाजपेय यज्ञों के द्वारा जो फल प्राप्त करते हैं, वही फल कोई ब्राह्मण बीस रात्रिपर्यन्त रुद्रभक्ति से प्राप्त कर लेता है। अच्छी प्रकार से एक सहस्र अश्वमेध यज्ञों का जो फल मिलता है, वही फल एक मास के लिङ्गार्चन से मिलता है। जो फल सहस्रों राजसूय यज्ञों के करने से मिलता है, वह एक मास तक लिङ्गार्चन करने वाले साधक को मिल जाता है। जो फल सभी तीर्थों के स्नान से तथा सभी प्रकार के दान से मिलता है, जो सभी यज्ञों का फल है अथवा जो सभी उपवासों का फल है, जो समाधि लगाने पर फल प्राप्त होता है, वह फल विजितेन्द्रिय ब्राह्मण को नौ मास तक लिङ्गार्चन करने-मात्र से ही मिल जाता है।

जो एक वर्ष तक निरन्तर लिङ्ग का पूजन करता है, उसे मैं प्रसन्न होकर उच्च पद प्रदान करता हूँ, इसमें संशय नहीं है। जो माघ मास में प्रातः, मध्याह्न तथा सायङ्काल तीनों सन्ध्याओं में शिव की अर्चना करता है, उसे केवल एक मास में ही छः मास की पूजा का फल मिल जाता है। जिस प्रकार का फल माघ मास में शिवार्चन से मिलता है, उसी प्रकार का फल आषाढ़ मास अथवा कार्तिक मास में भी लिङ्गार्चन से प्राप्त होता है। जो नित्य ही त्रिलोकीनाथ शिव के लिङ्ग की पूजा करता है, वह स्वर्ग के राज्य तथा मोक्ष का भागीदार शीघ्र ही बन जाता है।

शिवनारदसंवादे—

तत्रापि पार्थिवं लिङ्गं क्षिप्रं सिद्धिप्रदं भवेत्। पार्थिवेन तु लिङ्गेन बहवः सिद्धिमागताः॥
कृते रत्नमयं लिङ्गं त्रेतायां हेमसम्भवम्। द्वापरं पारदं श्रेष्ठं पार्थिवं तु कलौ युगे॥

शिव-नारद संवाद के अनुसार महत्त्व—पार्थिव लिङ्ग की अर्चा अन्य प्रकार से लिङ्गपूजा की अपेक्षा शीघ्र सफलता देती है। पार्थिव शिवलिङ्ग से अनेक प्रकार की सफलता मिलती है। रत्नमय लिङ्ग सतयुग में, त्रेतायुग में स्वर्णनिर्मित लिङ्ग, द्वापर में पारदनिर्मित लिङ्ग तथा कलियुग में पार्थिव लिङ्ग (मिट्टी से बने) की पूजा श्रेष्ठ कही गयी है।

लिङ्गमानं मन्त्रमहोदधौ—

अङ्गुष्ठमानादधिकं वितस्त्यवधि सुन्दरम्। पार्थिवं रचयेल्लिङ्गं न न्यूनं नाधिकं च तत्॥

मन्त्रमहोदधि के अनुसार लिङ्गमान—एक अङ्गुल के नाप से लेकर एक बितस्ति (बित्ती भर) का लिङ्ग श्रेष्ठ होता है; पर जो भी पार्थिव लिङ्ग बनाये जायँ, वे एक ही मान के होने चाहिये, उन्हें छोटे-बड़े नहीं होने

चाहिये। जैसे या तो प्रत्येक अङ्गुष्ठ प्रमाण का बने, यदि अधिक नाप का बनता है तो सभी लिङ्ग उस नाप के बनाने चाहिये तथा एक बित्ती से अधिक मान पार्थिव लिङ्ग का नहीं रखना चाहिये।

लिङ्गमाहात्म्यं नन्दिभविष्ययोः—

आयुष्मान्बलवाञ्छ्रीमान्पुत्रवान्धनवान्सुखी। वरमिष्टं लभेल्लिङ्गं पार्थिवं यः समाचरेत्॥

मृद्भस्मगोशकृत्पिण्डं ताम्रकांस्यमयं तथा। कृत्वा लिङ्गं सकृत्पूज्य वसेत्कल्पायुतं दिवि॥

इति पार्थिवलिङ्गपूजनप्रयोगः समाप्तः।

नन्दीश्वर तथा **भविष्यपुराण** के अनुसार—जो पार्थिव लिङ्ग बनाकर अर्चना करता है, वह आयुष्मान्, श्रीमान्, बलवान्, पुत्रवान्, धनवान् तथा सुखी होता है एवं मनोवाञ्छित फल प्राप्त करता है। जो मिट्टी, भस्म, गोबर, ताम्र, कांस्यमय लिङ्ग बनाकर पूजा करता है, वह अयुत कल्प-पर्यन्त स्वर्ग में निवास करता है।

दक्षिणामूर्तिशिवमन्त्रपुरश्चरणम्

शारदातिलके मूलमन्त्रो यथा—

ॐ ह्रीं दक्षिणामूर्त्तये तुभ्यं वटमूलनिवासिने। ध्यानैकनिरताङ्गाय नमो रुद्राय शम्भवे ह्रीं ॐ॥

षट्त्रिंशदक्षरो मन्त्रः सर्वकामफलप्रदः। अस्य श्रीदक्षिणामूर्तिशम्भुमन्त्रस्य शुकऋषिः। अनुष्टुपछन्दः। दक्षिणामूर्तिशम्भुर्देवता। सर्वेष्टसिद्ध्यर्थे जपे विनियोगः। ॐ शुकऋषये नमः शिरसि॥ १॥ ॐ अनुष्टुपछन्दसे नमः मुखे॥ २॥ ॐ दक्षिणामूर्तिशम्भुर्देवतायै नमः हृदये॥ ३॥ इति ऋष्यादिन्यासः। ॐ ह्रीं दक्षिणामूर्तये ह्रीं अङ्गुष्ठाभ्यां नमः॥ १॥ ॐ ह्रीं तुभ्यं ह्रीं तर्जनीभ्यां नमः॥ २॥ ॐ ह्रीं वटमूलनिवासिने ह्रीं मध्यमाभ्यां नमः॥ ३॥ ॐ ह्रीं ध्यानैकनिरताङ्गाय ह्रीं अनामिकाभ्यां नमः॥ ४॥ ॐ ह्रीं नमो रुद्राय ह्रीं कनिष्ठिकाभ्यां नमः॥ ५॥ ॐ ह्रीं शम्भवे ह्रीं करतलकरपृष्ठाभ्यां नमः॥ ६॥ इति करन्यासः। एवं हृदयादिन्यासं कृत्वा अङ्गन्यासं कुर्य्यात्। ॐ ह्रीं नमः मूर्ध्नि॥ १॥ ॐ दं नमः भाले॥ २॥ ॐ क्षिं नमः नेत्रयोः॥ ३॥ ॐ णां नमः श्रोत्रयोः॥ ४॥ ॐ मूं नमः गण्डयोः॥ ५॥ ॐ तँ नमः नासिकयोः॥ ६॥ ॐ यं नमः मुखे॥ ७॥ ॐ तुं नमः दक्षिणबाहुमूले॥ ८॥ ॐ भ्यं नमः दक्षिणकूर्परे॥ ९॥ ॐ वं नमः दक्षिणमणिबन्धे॥ १०॥ ॐ टं नमः दक्षिणहस्ताङ्गुलीमूले॥ ११॥ ॐ सूं नमः दक्षहस्ताङ्गुल्यग्रे॥ १२॥ ॐ लं नमः वामबाहुमूले॥ १२॥ ॐ निं नमः वामकूर्परे॥ १४॥ ॐ वां नमः वाममणिबन्धे॥ १५॥ ॐ सिं नमः वामहस्ताङ्गुलीमूले॥ १६॥ ॐ नें नमः वामहस्ताङ्गुल्यग्रे॥ १७॥ ॐ ध्यां नमः गले॥ १८॥ ॐ नैं नमः स्तनयोः॥ १९॥ ॐ कं नमः हृदये॥ २०॥ ॐ निं नमः नाभिमण्डले॥ २१॥ ॐ रं नमः कट्योः॥ २२॥ ॐ तां नमः गुह्ये॥ २३॥ ॐ गां नमः दक्षपादमूले॥ २४॥ ॐ यं नमः दक्षिणजानुनि॥ २५॥ ॐ नं नमः दक्षिणगुल्फे॥ २६॥ ॐ मं नमः दक्षपादाङ्गुलीमूले॥ २७॥ ॐ रुं नमः दक्षपादाङ्गुल्यग्रे॥ २८॥ ॐ द्रां नमः वामपादमूले॥ २९॥ ॐ यं नमः वामजानुनि॥ ३०॥ ॐ शं नमः वामगुल्फे॥ ३१॥ ॐ भं नमः वामपादाङ्गुलीमूले॥ ३२॥ ॐ वें नमः वामपादाङ्गुल्यग्रे॥ ३३॥ ॐ ह्रीं नमः इति व्यापकेन सर्वाङ्गे न्यसेत्॥ ३४॥ एवमङ्गन्यासं कृत्वा ध्यायेत्—

हेमाचलतटे रम्ये सिद्धकिन्नरसेविते। विविधद्रुमशाखाभिः सर्वतोवारितातपे॥

सुपुष्पितैर्लताजालैराश्लिष्टकुसुमद्रुमैः। शिलाविवरनिर्गच्छन्निर्झरानिलसेविते॥

गायद्भृङ्गाङ्गनासङ्घे नृत्यद्बर्हिकदम्बके। कूजत्कोकिलसङ्घेन मुखरीतकृदिङ्मुखे॥

परस्परविनिर्मुक्तमात्सर्यमृगसेविते। आद्यैः शुकाद्यैर्मुनिभिरजस्रं समुपस्थितम्॥

पुरन्दरमुखैर्देवैः सेवायातैर्विलोकितम्। वटवृक्षं महोच्छ्रायं पद्मरागफलोज्ज्वलम्॥

गारुत्मतमयैः पत्रैर्निबिडैरुपशोभितम्। नवरत्नमयाकल्पैर्लम्बमानैरलङ्कृतम् ॥
स्थलजैर्जलजैः पुष्पैरामोदितमलङ्कृतम्। शृण्वद्भिर्वेदशास्त्राणि शुकवृन्दैर्निषेवितम्॥
संसारतापविच्छेदकुशलच्छायमद्भुतम् । विचिन्त्य तस्य मूलस्थे रत्नसिंहासने शुभे॥
आसीनममिताकल्पं शरच्चन्द्रनिभाननम्। स्तूयमानं मुनिगणैर्दिव्यज्ञानाभिलाषिभिः॥
संस्मरेज्जगतामाद्यं दक्षिणामूर्तिमव्ययम्।

इति विचिन्त्य—

कैलासाद्रिनिभं शशाङ्कशकलस्फूर्जज्जटामण्डितं नासालोकनतत्परं त्रिनयनं वीरासनाध्यासितम्।
मुद्राटङ्ककुरङ्गजानुविलसत्पाणिं प्रसन्नाननं कक्षाबद्धभुजङ्गमं मुनिवृतं वन्दे महेशं परम्॥

इति ध्यायेत्। एवं धात्वा पूर्वोक्ते शिवपञ्चाक्षरोदिते पीठे पाद्याद्यैः षोडशोपचारैर्यथाविधि दक्षिणामूर्त्याख्यं शिवं सम्पूज्य जपं कुर्य्यात्। अस्य मन्त्रस्य सिद्ध्यर्थं विंशतिसहस्राधिकं लक्षत्रयात्मकं जपपुरश्चरणं कार्यम्। ततो जपान्ते दशांशेन क्षीरसंयुतैः शुद्धैस्तिलैर्होमं कृत्वा तत्तदशांशेन तर्पणमार्जनब्राह्मणभोजनानि कुर्यात्।

तथा च शारदातिलके—

अयुतद्वयसंयुक्तं गुणलक्षं जपेन्मनुम्। तद्दशांशं तिलैः शुद्धैर्जुहुयात्क्षीरसंयुतैः॥
एवं कृतपुरश्चर्यः सिद्धमन्त्रो भवेत्सुधीः। भिक्षाहारो जपेन्मासं मनुमेनं जितेन्द्रियः॥
नित्यं सहस्रमष्टार्द्धं परं विन्दति वाङ्मयम्। त्रिवारं जप्तमेतेन मनुना सलिलं पिबेत्॥
नित्यशो दक्षिणामूर्तिं ध्यायन्साधकसत्तमः। शास्त्रव्याख्यानसामर्थ्यं लभते वत्सरान्तरे॥
ब्राह्मीसैन्धवसिद्धार्थवचाकुष्ठकणोत्पलैः । सुगन्धिसंयुतैः कल्कैः शृतं ब्राह्मीरसे घृतम्॥
मनुनानेन सञ्जप्तमयुतं साधु साधितम्। निपीतं कविताकान्तिरक्षायुःश्रीधृतिप्रदम्॥

इति दक्षिणामूर्तिशिवमन्त्रपुरश्चरणं समाप्तम्।

श्री दक्षिणामूर्ति शिवमन्त्र का पुरश्चरण—'दक्षिणा अनुकूला मूर्ति यस्य स दक्षिणामूर्तिः' अर्थात् शिव की जो मूर्ति साधकों के लिये सर्वाधिक अनुकूल एवं शीघ्र फलप्रद हो, उसे दक्षिणामूर्ति कहते हैं। दक्षिणामूर्ति शिव की आराधना दक्षिण भारत में अधिक होती है।

दक्षिणामूर्ति मन्त्र (प्रथम)—'ॐ ह्रीं दक्षिणामूर्त्तये तुभ्यं वटमूलनिवासिने ध्यानैकनिरताङ्गाय नमो रुद्राय शम्भवे ह्रीं ॐ।' यह छत्तीस अक्षरों का मन्त्र है, जो सभी कामनाओं को पूर्ण करने वाला है।

विनियोग—अस्य श्रीदक्षिणामूर्तिशम्भुमन्त्रस्य शुकऋषिः अनुष्टुप् छन्दः, दक्षिणामूर्तिशम्भुर्देवता सर्वेष्टसिद्ध्यर्थे जपे विनियोगः' कहकर विनियोग का जल छोड़ना चाहिये।

ऋष्यादिन्यास मूल में लिखे 'ॐ शुकऋषये नमः शिरसि' इत्यादि तीन मन्त्रों से करे। फिर मूलोक्त 'ॐ ह्रीं दक्षिणामूर्त्तये ह्रीं अङ्गुष्ठाभ्यां नमः' इत्यादि छः मन्त्रों से करन्यास करे। इन्हीं छः मन्त्रों से हृदयादि न्यास भी कर ले। फिर 'ॐ ह्रीं नमः मूर्ध्नि' इत्यादि मूलपाठ में लिखित चौंतीस मन्त्रों से शरीर के विभिन्न अङ्गों में न्यास करे। फिर देव का इस प्रकार ध्यान करे—

हेमाचल पर्वत के रम्य तट पर सिद्ध तथा किन्नरों से सेवित, विविध वृक्षों की शाखाओं से जहाँ वर्षा एवं घाम का निवारण होता है, जहाँ सुपुष्पित लताजालों से पुष्प वाले वृक्ष वेष्टित हैं, जहाँ शिलाविवरों से झरने निकलते हैं, जिनके स्पर्श से शीतल वायु के प्रवाह का सेवन होता है, जहाँ पर भृङ्गों की अङ्गनायें गाती हैं तथा मयूर नाचते हैं,

कदम्बवृक्षों पर कोयलों का समूह कूजता है, जिससे दिशाएँ मुखरित होती हैं, मत्सरोत्पन्न मृग उन्मुक्त भाव से जहाँ पर परस्पर आलिङ्गन करते हैं, आदि मुनियों (शुकादि मुनियों) के जहाँ पर निवास हैं, जहाँ इन्द्रादि देवता सेवा के लिये आते हुए देखे जाते हैं, जहाँ अत्यन्त ऊँचा वटवृक्ष पद्मरागमणि के समान शोभायमान है, जिसमें पन्ने के समान हरे पत्ते लगे हैं तथा जिसमें नवरत्नों की शोभा है, जहाँ स्थलकमलों के पुष्प शोभित हैं तथा जहाँ वेदशास्त्रों का निर्घोष हो रहा है एवं शुकों का समूह उसे दोहरा रहा है। यह वटवृक्ष संसार के ताप को नष्ट करने वाला अद्भुत वृक्ष है। उसके मूल में रत्नसिंहासन पर अव्यय दक्षिणामूर्ति शिव विराजित हैं—ऐसा ध्यान करता हूँ। वे अमित अकल्प शरद् चन्द्रमा के समान कान्ति वाले हैं तथा दिव्य ज्ञान की अभिलाषा वाले मुनिगणों द्वारा सेवित हैं। ऐसा चिन्तन कर फिर 'जिनकी जटाओं पर कैलास पर्वत के समान हिमधवल चन्द्रकला शोभित है तथा जिनका ध्यान अपने नासाग्र पर है, ऐसे त्रिनेत्र वीरासन पर बैठे हैं, जिनके हाथ मुद्रा टङ्क कुरङ्ग के समान छवियुक्त है, जिनका मुख प्रसन्न है, जिनकी काँख में भुजङ्ग लिपटे हैं, जो मुनियों से घिरे हैं, उन परम महेश्वर की वन्दना करता हूँ।' इस प्रकार ध्यान करके फिर सफलता के लिये शिवपञ्चाक्षर मन्त्र के अनुष्ठान में कथित (पूर्वकथित) पीठ पर पाद्य आदि सोलह उपचारों से यथाविधि दक्षिणामूर्ति शिव को पूजकर उनके मूल मन्त्र को जपना चाहिये। इस प्रकार तीन लाख बीस सहस्र सङ्ख्या में जप करना चाहिये। यह पुरश्चरण है। जप की समाप्ति पर दशांश दूधयुक्त शुद्ध तिलों से होम कर, उसके दशांश तर्पण, मार्जन तथा ब्राह्मणभोजनादि कराना चाहिये।

शारदातिलक में कहा गया है कि तीन लाख बीस हजार मन्त्र जप करना चाहिये एवं जप के उपरान्त उसका दशांश दुग्धयुक्त शुद्ध तिलों से हवन करना चाहिये। इस प्रकार पुरश्चरण करने पर विद्वान् को मन्त्र सिद्ध हो जाता है। जो जितेन्द्रिय साधक एक मास तक भिक्षा में प्राप्त अन्न का भोजन करते हुये नित्य एक हजार आठ मन्त्रों का जप करता है, वह सभी शास्त्रों में निष्णात हो जाता है। जो उत्तम साधक प्रतिदिन इस मन्त्र का तीन बार जप करके जल पीता है, वह एक वर्ष के पश्चात् शास्त्रों के व्याख्यान का सामर्थ्य प्राप्त कर लेता है। ब्राह्मी, सैन्धव, सिद्धार्थ, वचा, कूठ को चूर्ण करके उनका कल्क बनाकर ब्राह्मीरस में घी मिलाकर इस मन्त्र के दस हजार जप से सम्यक् रूप से सिद्ध कर पान करने से साधक के कविताकान्ति की रक्षा होती है एवं उसे आयु, लक्ष्मी तथा धैर्य की प्राप्ति होती है।

द्वितीयो दक्षिणामूर्तिमन्त्रः

तत्रैव मूलं यथा—ॐ नमो भगवते दक्षिणामूर्तये मह्यं मेधां प्रयच्छ स्वाहा। द्वाविंश२२त्यक्षरो मनुः। भूतशुद्ध्यादिश्रीकण्ठादिकलान्तन्यासं शिवपञ्चाक्षरवत् कृत्वा 'अस्य श्रीदक्षिणामूर्तिमन्त्रस्य चतुर्मुखऋषिः गायत्रीछन्दः दक्षिणामूर्तिः वेदव्याख्यानतत्परो देवता सर्वेष्टसिद्धये विनियोगः'। ॐ चतुर्मुखऋषये नमः शिरसि। गायत्रीछन्दसे नमः मुखे। ॐ दक्षिणामूर्तिदेवतायै नमः हृदये। इति ऋष्यादिन्यासः। ॐ आँ ॐ नमो भगवते अङ्गुष्ठाभ्यां नमः॥ १॥ ॐ ईँ ॐ दक्षिणामूर्तये तर्जनीभ्यां नमः॥ २॥ ॐ ऊँ ॐ मह्यं मध्यमाभ्यां नमः॥ ३॥ ॐ ऐं ॐ मेधां अनामिकाभ्यां नमः॥ ४॥ ॐ ॐ प्रयच्छ कनिष्ठिकाभ्यां नमः॥ ५॥ ॐ अः ॐ स्वाहा करतलकरपृष्ठाभ्यां नमः॥ ६॥ इति करन्यासः। एवमेव हृदयादिन्यासं कृत्वा पूर्वोक्तं 'हेमाचलतटे रम्ये' इत्यादि विचिन्त्य ध्यायेत्।

स्फटिकरजतवर्णं मौक्तिकीमक्षमालाममृतकलशविद्याज्ञानमुद्राः कराग्रैः।
दधतमुरगकक्षं चन्द्रचूडं त्रिनेत्रं विधृतविविधभूषं दक्षिणामूर्तिमीडे॥

इति ध्यात्वा पञ्चाक्षरोदिते पीठे यजेत्।

अथ यन्त्रपूजा—शैवोक्तपीठपूजां विधाय मध्ये मूर्तिं संस्थाप्य पाद्यादिपुष्पान्तैरुपचारैः सम्पूज्य आवरणपूजां कुर्यात्। तद्यथा—षट्कोणकेसरेष्वग्न्यादिकोणेषु मध्ये दिक्षु च। ॐ आँ ॐ हृदयाय नमः॥ १॥ ॐ ईँ ॐ शिरसे स्वाहा॥ २॥ ॐ ऊँ ॐ शिखायै वषट्॥ ३॥ ॐ ऐं ॐ कवचाय हुम्॥ ४॥ ॐ औँ ॐ नेत्रत्रयाय वौषट्॥ ५॥ ॐ अः ॐ

अस्त्राय फट्॥ ६॥ इत्यङ्गानि सम्पूज्य ततो बाह्ये पत्रेष्वष्टसु पूर्वादिक्रमेण ॐ सरस्वत्यै नमः॥ १॥ ॐ ब्रह्मणे नमः॥ २॥ ॐ सनकाय नमः॥ ३॥ ॐ सनन्दनाय नमः॥ ४॥ ॐ सनातनाय नमः॥ ५॥ ॐ शुकाय नमः॥ ६॥ ॐ व्यासाय नमः॥ ७॥ ॐ गणेश्वराय नमः॥ ८॥ इति पूजयेत्। ततस्तद्बहिः पूर्वादिचतुर्दिक्षु ॐ सिद्धेभ्यो नमः॥ १॥ ॐ गन्धर्वेभ्यो नमः॥ २॥ ॐ योगीन्द्रेभ्यो नमः॥ ३॥ ॐ विद्याधरेभ्यो नमः॥ ४॥ इति पूजयेत्। तद्बहिः भूगृहे पूर्वादिषु इन्द्रादिलोकपालान्पूजयेत्। तद्बहि वज्राद्यायुधानि च सम्पूजयेत्। एवं पञ्चावरणपूजां कृत्वा प्रधानदेवं धूपदीपनैवेद्यताम्बूलदक्षिणानीराजनैः सम्पूज्य स्तवेन स्तुत्वा लक्षमन्त्रं जपेत्। तथा च शारदातिलके—

लक्षमेकं जपेन्मन्त्रं ब्रह्मचारिव्रते स्थितः। जुहुयात्सघृतैः पद्मैर्दशांशं संस्कृतेऽनले॥
इत्थं पूजादिभिः सिद्धे मन्त्रेऽस्मिन् साधकोत्तमः। वल्लभो जायते वाचां बृहस्पतिरिवापरः॥
मन्त्रेणानेन सञ्जप्तैर्विशुद्धैः सलिलैः सुधीः। अभिषिञ्चेत्स्वशिरसि श्रियमारोग्यमाप्नुयात्॥
कण्ठमात्रे जले स्थित्वा जपेन्मन्त्रसहस्रकम्। प्रत्यहं मण्डलादर्वाक्कवीनामग्रणीर्भवेत्॥
गौर्या पार्श्वस्थया सार्द्धं श्रीकामी चिन्तयन्विभुम्। अयुतं प्रजपेन्मन्त्रं भूयसीं श्रियमाप्नुयात्॥
भुञ्जानः प्रयतो मन्त्री गोमूत्रे शृतमोदनम्। भिक्षान्नमथवा मन्त्रमयुतद्वितयं जपेत्॥
अश्रुतान्वेदशास्त्रादीन् व्याचष्टे नात्र संशयः। सिद्धगन्धर्वमुनिभिर्योगीन्द्रैरपि सेविते॥
ज्ञानवागर्थिनां प्रीत्यै कथितौ मन्त्रनायकौ॥

इति दक्षिणामूर्तिशिवमन्त्रानुष्ठानम्।

द्वितीय दक्षिणामूर्ति मन्त्र—यह दक्षिणामूर्ति भगवान् शिव की आराधना का दूसरा मन्त्र है। इसमें केवल बुद्धिप्राप्ति की प्रार्थना की गई है; अतः यह सर्वश्रेष्ठ मन्त्र है; क्योंकि जिसके पास श्रेष्ठ बुद्धि है, उसका सब प्रकार से कल्याण होता है। मूल मन्त्र इस प्रकार है—ॐ नमो भगवते दक्षिणामूर्तये मह्यं मेधां प्रयच्छ स्वाहा।

यह बाईस अक्षरों का मन्त्र है। इसकी सिद्धि के लिये प्रथम भूतशुद्धि आदि कृत्यों से लेकर श्रीकण्ठादि कलान्यास-पर्यन्त कर्म सम्पादित करे तथा शिवपञ्चाक्षर मन्त्र-साधन की भाँति करना चाहिये। इस दक्षिणामूर्ति मन्त्र के चतुर्मुख ऋषि, गायत्री छन्द, दक्षिणामूर्ति वेदव्याख्यान तत्परदेवता हैं तथा सर्वेष्टसिद्धि-हेतु इसका विनियोग होता है।

विनियोग के पश्चात् मूल में लिखित 'ॐ चतुर्मुखऋषये नमः शिरसि' इत्यादि तीन मन्त्रों से ऋष्यादि न्यास करे। फिर ॐ आं अङ्गुष्ठाभ्यां नमः' इत्यादि छः मन्त्रों से करन्यास करे तथा पुनः इन्हीं छः मन्त्रों से क्रमशः हृदयादि न्यास करे। पूर्व मन्त्र में (प्रथम दक्षिणामूर्ति मन्त्र में) कथित 'हेमाचलतटे रम्ये०' इत्यादि से चिन्तन करने के उपरान्त 'स्फटिकरजतवर्णं मौक्तिकीमक्षमालाममृतकलशविद्याज्ञानमुद्राकराग्रैः। दधतमुरगकक्षं चन्द्रचूडं त्रिनेत्रं विधृतविविधभूषं दक्षिणामूर्तिमीडे॥' (जिनका वर्ण स्फटिक एवं रजत के समान है, जो मुक्ता एवं रुद्राक्ष की माला पहिने हैं, जो अपने हाथों में अमृतकलश विद्या एवं ज्ञानमुद्रा धारण किये हैं, जो सर्प का कौपीन धारण किये, चन्द्रचूड, त्रिनेत्र तथा विविध भूषा धारण किये हैं; उन दक्षिणामूर्ति की मैं पूजा करता हूँ)—इस प्रकार का ध्यान करना चाहिये। उनका पूजन पञ्चाक्षर मन्त्र में वर्णित पीठ पर करना चाहिये।


यन्त्रपूजा—शैवोक्त पीठपूजा करके उसके मध्य में दक्षिणामूर्ति की मूर्ति स्थापित करके पाद्यादि पुष्पान्त उपचारों से पूज कर आवरणपूजा करना चाहिये। वह इस प्रकार है—षट्कोण में, केसरों में, आग्नेयादि कोणों मध्य में तथा चारो दिशाओं में 'ॐ आं हृदयाय नमः' इत्यादि छः मन्त्रों से अङ्गों की पूजा करके बाहर के आठों पत्रों पर पूर्वादिक्रम से 'ॐ सरस्वत्यै नमः' इत्यादि आठ मन्त्रों से पूजा करे। फिर उसके बाद पूर्वादि चारो दिशाओं में 'ॐ सिद्धेभ्यो नमः' इत्यादि चार मन्त्रों से पूजन करे। फिर उसके बाहर भूगृह में पूर्वादि दिशाओं में इन्द्रादि आठ लोकपालों का पूजन कर पुनः उनके बाहर उन्हीं के समीप उनके वज्रादि आयुधों का पूजन करना चाहिये। इस

प्रकार यन्त्र के पाँचों आवरणों की पूजा करके प्रधानदेव (दक्षिणामूर्ति) का धूप, दीप, नैवेद्य, ताम्बूल, दक्षिणा, नीराजन से पूजन कर स्तोत्र से स्तुति कर मूल मन्त्र का एक लाख जप करना चाहिये। जैसा कि शारदातिलक में कहा भी है—

ब्रह्मचारी रहकर एक लाख मन्त्रों का जप करे। फिर जप का दशांश घृतलिप्त कमलपुष्पों का हवन अग्नि में करना चाहिये। इस पूजादि के द्वारा मन्त्र सिद्ध कर लेने पर वह उत्तम साधक बृहस्पति के समान वाणी में सामर्थ्य को प्राप्त हो जाता है। इस मन्त्र को जपते हुए शुद्ध जल से शिव के सिर पर अभिषेक करने से लक्ष्मी तथा आरोग्य की प्राप्ति होती है। कण्ठमात्र जल में स्थित होकर यदि एक सहस्र मन्त्र (द्वितीय दक्षिणामूर्ति मन्त्र) का जप सूर्योदय के पूर्व प्रतिदिन करे तो वह मन्त्रसाधक विद्वानों में अग्रणी हो जाता है। लक्ष्मी की कामना वाला साधक गौरी के साथ पार्श्व में विराजमान शिव का चिन्तन करे तथा अयुत (दस सहस्र) की सङ्ख्या में इस मन्त्र का जप करे तो उसे अपार लक्ष्मी की प्राप्ति होती है।

मन्त्रसाधक को प्रयत्नपूर्वक गोमूत्र में पकाया हुआ भात खाना चाहिये अथवा भिक्षान्न का सेवन करना चाहिये। अथवा द्वितीय दक्षिणामूर्ति के मन्त्र को एक अयुत का दुगुना अर्थात् दो अयुत (चालीस सहस्र) की सङ्ख्या में जप करना चाहिये। ऐसा साधक भले ही वेदशास्त्रों को न सुना हो; परन्तु वह उनका पारङ्गत विद्वान् हो जाता है, इसमें कोई संशय नहीं है। यह सिद्धों, गन्धर्वों, मुनियों एवं योगियों द्वारा सेवित मन्त्र है; जिसे मैंने ज्ञान एवं वाणी को चाहने वालों के लिये प्रकट किया है। यह मन्त्रों का नायक है।

श्रीदक्षिणामूर्तिमन्त्रयन्त्रम्



आपदुद्धारकवटुकभैरवमन्त्रानुष्ठानविधानम्

रुद्रयामले—

कदाचिद्गिरिजा शम्भुं पप्रच्छोपासनाविधिम्। येनेदं सर्वलोकानां मनेप्सितफलं भवेत्॥

आपदुद्धारक वटुकभैरव मन्त्रानुष्ठान-विधान—एक समय की बात है (रुद्रयामल के अनुसार) कि अकस्मात् देवी पार्वती ने भगवान् शङ्कर से उपासना-विधि को पूछा, जिससे कि सभी लोकों को मनोवाञ्छित फल की प्राप्ति हो सके।

श्रीपार्वत्युवाच—

प्राणनाथ जगन्नाथ जगदादिजगन्मय। शम्भो शङ्कर देवेश वटुकाराधनं वद॥
एकादशसहस्रं तु भजनं हि त्वयोदितम्। विधिं तस्य विशेषेण ब्रूहि त्वं शङ्कराधुना॥

पार्वती जी ने पूछा—हे प्राणनाथ! जगत् के स्वामी, जगत् के आदि, जगत् में व्याप्त, शम्भो, शङ्कर, देवेश! आप मुझसे वटुकभैरव की आराधना-विधि बताइये। आपने जो ग्यारह सहस्र भजन कहे हैं, उनकी विधि भी आप इस समय बताइये।

शिव उवाच—

सम्यक् पृष्टं त्वया देवि लोकदुःखविमोचनम्। मया वटुकरूपं हि धृतं सर्वसुखावहम्॥
अन्ये देवास्तु कालेन प्रसन्नाः सम्भवन्ति हि। वटुकः सेवितः सद्यः प्रसीदति ध्रुवं शिवे॥
दुःखे च सेवितः शीघ्रं दुःखं नाशयते क्षणात्। सुखे च सेवितो नित्यं सुखं वर्द्धयते बहु॥
तस्मात्सेव्यो नरैश्चायं सर्वकामफलाय वै। सेवोपायं प्रवक्ष्यामि यथा सिद्धिर्भवेद्ध्रुवम्॥
शृणु देवि प्रवक्ष्यामि वटुकस्य महात्मनः। विधानं परमं गोप्यं ब्रह्मादीनां सुदुर्लभम्॥
मन्त्रं वै वसुसंक्षेपात्कथयिष्यामि वल्लभे। येन विज्ञानमात्रेण त्रैलोक्यं साधयेत्सुधीः॥
एकदा देवदेवेशि तपसे मन्दराचलम्। गतोऽहं परमानन्दान्मूलप्रकृतिमीश्वरम्॥
चक्रे परमसन्तुष्टां तपसा भावितात्मना। साकाशरूपिणी देवी प्रोवाच वचनं मुदा॥
तुष्टाहं शङ्करं प्रीता वरं वरय दुर्लभम्।

शिव उवाच—

वटुकस्य विधानं मे परमं भक्तितो वरम्॥
परमाशयान्मन्त्रस्य येन सिध्यति सर्वथा। मनोरमाणि मन्त्रस्य सर्वकार्याणि साम्प्रतम्॥
इति वाक्यं च मे श्रुत्वा मूलभूता सनातनी। उवाच यादृशं देवी विधानं शृणु वल्लभे॥
वटुकाख्यस्य देवस्य भैरवस्य महात्मनः। ब्रह्मविष्णुमहेशाद्यैर्वन्दितस्य दयानिधेः॥

श्री शिवजी बोले—हे देवि! लोगों के कष्ट को दूर करने के लिये आपने बहुत अच्छी बात पूछी है। मैंने सबके लिये सुखप्रद वटुक का रूप धारण किया है। अन्य देवता तो देर में प्रसन्न होते हैं; परन्तु वटुक की सेवा करने पर हे पार्वति! वे शीघ्र ही निश्चित प्रसन्न हो जाते हैं। यदि दुःख में उनकी आराधना की जाय तो शीघ्र ही दुःख दूर होकर सुख की प्राप्ति हो जाती है। सुख में उनकी आराधना करने पर नित्य बहुत सुख की वृद्धि होती है। अतः मनुष्यों को सर्वकामफलप्रद वटुक का सेवन करना चाहिये। अब मैं सेवा का उपाय कहता हूँ, जिससे निश्चित ही सफलता मिलती है। हे देवि! सुनो, अब मैं वटुक का गोपनीय दुर्लभ विधान कहता हूँ। हे प्रिये! अब मैं संक्षेप

में उनका मन्त्र कहता हूँ, जिसे जानकर तीनों लोक सध जाते हैं। एक समय की बात है कि मैं मन्दराचल पर्वत पर मूल प्रकृति भगवती की उपासना के लिये गया था, उन्हें मैंने तप से प्रसन्न किया तो उन्होंने आकाशरूपिणी होकर कहा—हे शङ्कर! मैं तुमसे प्रसन्न हूँ, तुम दुर्लभ वर माँगो, तो मैंने उनसे वटुकभैरव की उपासना-विधि पूछी। तब उन्होंने जो कि ब्रह्मा विष्णु महेश से वन्दित हैं, दया की निधान हैं, मुझे महात्मा वटुकभैरव की उपासना-विधि तथा मनोरम मन्त्रादि को बताया।

वटुकभैरवपूजनप्रयोगः

तत्र प्रयोगः शारदातिलके—सुमुहूर्ते शिवालयादिषु कृतनित्यक्रियो धृतभस्मत्रिपुण्ड्ररुद्राक्षः कूर्मसंशोधिते स्वासने उदङ्मुख उपविश्य मूलेनाचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य 'मम मन्त्रसिद्धिपूर्वकं श्रीआपदुद्धारप्रीत्यर्थमेकविंशतिलक्षात्मकं जपादिरूपपुरश्चरणमहं करिष्ये' इति सङ्कल्प्य तदङ्गत्वेन भूतशुद्धिं प्राणप्रतिष्ठामन्तर्मातृकाबहिर्मातृकान्यासं च कृत्वा पूर्वोक्तशिवपञ्चाक्षरोदितं श्रीकण्ठादिकलान्तं न्यासं च कृत्वा मूलमन्त्रन्यासं च कुर्यात्।

मूलमन्त्रो यथा—'ह्रीं वटुकाय आपदुद्धारणाय कुरुकुरु वटुकाय ह्रीं—इत्येकविंशतिवर्णो मन्त्रः। अस्य मन्त्रस्य बृहदारण्यक ऋषिः। अनुष्टुप्छन्दः। आपदुद्धारणभैरवो देवता। ह्रीं बीजं वँशक्तिः आँ कीलकम्। श्रीवटुकभैरवप्रीतये जपे विनियोगः। ॐ बृहदारण्यऋषये नमः शिरसि॥ १॥ ॐ अनुष्टुप्छन्दसे नमः मुखे॥ २॥ ॐ श्रीवटुकभैरवदेवतायै नमः हृदि॥ ३॥ ॐ ह्रीं बीजाय नमः गुह्ये॥ ४॥ ॐ वं शक्तये नमः पादयोः॥ ५॥ ॐ आं कीलकाय नमः॥ ६॥ चतुर्विधपुरुषार्थसिद्ध्यर्थे विनियोगाय नमः सर्वाङ्गे॥ ७॥ इति ऋष्यादिन्यासः। ॐ ह्रों वों ईशानाय नमः अङ्गुष्ठयोः॥ १॥ ॐ हें वें तत्पुरुषाय नमः तर्जन्योः॥ २॥ ॐ हुं वुं अघोराय नमः मध्यमयोः॥ ३॥ ॐ ह्रिं विं वामदेवाय नमः अनामिकयोः॥ ४॥ ॐ हं वं सद्योजाताय नमः कनिष्ठिकयोः॥ ५॥ इति करन्यासः॥ ॐ ह्रों वों ईशानाय नमः शिरसि॥ १॥ ॐ हें वें तत्पुरुषाय नमः वक्त्रे॥ २॥ ॐ हुं वुं अघोराय नमः हृदि॥ ३॥ ॐ ह्रिं विं वामदेवाय नमः गुह्ये॥ ४॥ ॐ हं वं सद्योजाताय नमः पादयोः॥ ५॥ इति देहन्यासः। ॐ ह्रों वों ईशानाय नमः ऊर्ध्ववक्त्रे॥ १॥ ॐ हें वें तत्पुरुषाय नमः पूर्ववक्त्रे॥ २॥ ॐ हुं वुं अघोराय नमः दक्षिणवक्त्रे॥ ३॥ ॐ ह्रिं विं वामदेवाय नमः उत्तरवक्त्रे॥ ४॥ ॐ हं वं सद्योजाताय नमः पश्चिमवक्त्रे॥ ५॥ इति वक्त्रन्यासः। एवं ह्रस्वशक्तिबीजमकाराढ्यं न्यासत्रयं कृत्वा एवमेव दीर्घशक्तिबीजवकारपुरःसरं अङ्गुल्यादिन्यासत्रयं पूर्ववत् कुर्यात्।

अथ हृदयादिन्यासः—ॐ ह्रां वां हृदयाय नमः॥ १॥ ॐ ह्रीं वीं शिरसे स्वाहा॥ २॥ ॐ ह्रूं वूं शिखायै वषट्॥ ३॥ ॐ हैं वैं कवचाय हुम्॥ ४॥ ॐ ह्रौं वौं नेत्रत्रयाय वौषट्॥ ५॥ ॐ हः वः अस्त्राय फट्॥ ५॥ एवं षडङ्गन्यासं कृत्वा यथाकामनया ध्यायेत्।

अथ सात्त्विकध्यानम्—

वन्दे बालं स्फटिकसदृशं कुन्तलोल्लासिवक्त्रं दिव्याकल्पैर्नवमणिमयैः किङ्किणीनूपुराद्यैः।
दीप्ताकारं विशदवसनं सुप्रसन्नं त्रिनेत्रं हस्ताब्जाभ्यां वटुकमनिशं शूलदण्डौ दधानम्॥

अथ राजसध्यानम्—

उद्यद्भास्करसन्निभं त्रिनयनं रक्ताङ्गरागस्त्रजं स्मेरास्यं वरदं कपालमभयं शूलं दधानं करैः।
नीलग्रीवमुदारभूषणशतं शीतांशुचूडोज्ज्वलं बन्धूकारुणवाससं भयहरं वन्दे सदा भावये॥

अथ तामसध्यानम्—

ध्यायेन्नीलाद्रिकान्तं शशिशकलधरं मुण्डमालं महेशं दिग्वस्त्रं पिङ्गकेशं डमरुमथ सृणिं खड्गपाशाभयानि।
नागं घण्टां कपालं करसरसिरुहैर्बिभ्रतं भीमदंष्ट्रं सर्पाकल्पं त्रिनेत्रं मणिमयविलसत्किङ्किणीनूपुराढ्यम्॥

सात्त्विकं ध्यानमाख्यातमपमृत्युनिवारणम्। आयुरारोग्यजननमपवर्गफलप्रदम्॥
राजसं ध्यानमाख्यातं धर्मकामार्थसिद्धिदम्। तामसं शत्रुशमनं कृत्याभूतग्रहापहम्॥

एवं ध्यात्वा पीठपूजापूर्वकं यन्त्रादिपूजां कुर्य्यात्। तद्यथा—ॐ धं धर्म्माय नमः ॥ १ ॥ ॐ ज्ञां ज्ञानाय नमः ॥ २ ॥ ॐ वैं वैराग्याय नमः ॥ ३ ॥ ॐ ऐं ऐश्वर्य्याय नमः ॥ ४ ॥ ॐ अं अधर्माय नमः ॥ ५ ॥ ॐ अं अज्ञानाय नमः ॥ ६ ॥ ॐ अं अवैराग्याय नमः ॥ ७ ॥ ॐ अं अनैश्वर्याय नमः ॥ ८ ॥ इति पीठदेवता गन्धपुष्पैः सम्पूज्य ॐ वामायै नमः ॥ १ ॥ ॐ ज्येष्ठायै नमः ॥ २ ॥ ॐ रौद्र्यै नमः ॥ ३ ॥ ॐ काल्यै नमः ॥ ४ ॥ ॐ कलविकरण्यै नमः ॥ ५ ॥ ॐ बलविकरण्यै नमः ॥ ६ ॥ ॐ बलप्रमथिन्यै नमः ॥ ७ ॥ ॐ सर्वभूतदमन्यै नमः ॥ ८ ॥ ॐ मनोन्मन्यै नमः ॥ ९ ॥ इति पीठशक्तीः सम्पूज्य 'ॐ नमो भगवते सकलगुणात्मशक्तियुक्ताय अनन्ताय योगपीठात्मने नमः' इति पुष्पाञ्जलिना आसनं दद्यात्। ततस्तत्र यथाविधि ताम्रकलशं संस्थाप्य तत्र वरुणमावाह्य सम्पूज्य तदुपरि पट्टवस्त्रं प्रसार्य्य तत्र शक्तिगन्धाष्टकेन भैरवयन्त्रं लिखेत्। शक्तिगन्धाष्टकं यथा—

चन्दनागरुकर्पूरचौरकुङ्कुमरोचनाः । जटामांसी कपियुता शक्तेर्गन्धाष्टकं विदुः ॥

वटुकभैरव उपासना-विधि—शारदातिलक में कहा गया है कि शुभ मुहूर्त में शिवालय आदि में यह कार्य करना चाहिये। सर्वप्रथम नित्यकर्मों से निवृत्त होकर भस्म, रुद्राक्ष, त्रिपुण्ड्र आदि धारण कर पूर्व के पद्धतिकाण्ड में कथित कूर्मशोधनादि करके अपने आसन पर बैठकर मूल मन्त्र से आचमन करके फिर प्राणायाम करके देश-काल का उच्चारण करके 'मम मन्त्रसिद्धिपूर्वकं श्री आपदुद्धारप्रीत्यर्थं एकविंशतिलक्षात्मकं जपादिरूपपुरश्चरणमहं करिष्ये' ऐसा सङ्कल्प करके उसके अङ्गत्वरूप में भूतशुद्धि, प्राणप्रतिष्ठा, अन्तर्मातृका, बहिर्मातृका न्यास करके पूर्वोक्त शिवपञ्चाक्षरोदित श्रीकण्ठादि कला न्यास करके मूल मन्त्र का न्यास करना चाहिये।

मूल मन्त्र—ह्रीं वटुकाय आपदुद्धरणाय कुरुकुरु वटुकाय ह्रीं—यह इक्कीस अक्षरों का मन्त्र है। विनियोग—इस मन्त्र के बृहदारण्यक ऋषि हैं, अनुष्टुप् छन्द है, आपदुद्धारक वटुकभैरव देवता हैं, 'ह्रीं' बीज है 'वं' शक्ति है, 'आं' कीलक है। इसका विनियोग वटुकभैरव की प्रसन्नता के लिये किया जाता है।

विनियोग के उपरान्त ॐ बृहदारण्यक ऋषये नमः शिरसि' इत्यादि मूल में लिखित सात मन्त्रों से क्रमशः ऋष्यादि न्यास करना चाहिये। फिर 'ॐ ह्रों वों ईशानाय नमः अङ्गुष्ठयोः' इत्यादि पाँच मन्त्रों से करन्यास करना चाहिये। फिर मूलोक्त 'ह्रों वों ईशानाय नमः शिरसि' इत्यादि पाँच मन्त्रों से देहन्यास करना चाहिये। फिर 'ॐ ह्रों वों ईशानाय नमः ऊर्ध्ववक्त्रे' इत्यादि पाँच मन्त्र से वक्त्रादि न्यास करना चाहिये। इस प्रकार ह्रस्व शक्तिबीज तथा मकार से युक्त तीनों न्यासों को सम्पन्न कर तथैव दीर्घ शक्तिबीज वकार-पुरस्सर अङ्गुल्यादि तीनों न्यासों को करके फिर 'ॐ ह्रां वां हृदयाय नमः' इत्यादि पाँच मन्त्रों से षडङ्ग न्यास करके जैसी साधक की सात्त्विक; राजस या तामस कामना हो, उसी प्रकार के वटुकभैरव का ध्यान करना चाहिये। ध्यान के मन्त्र मूल में दिये गये हैं, यहाँ उन तीनों प्रकार के मन्त्रों के भावार्थ दिये जाते हैं—

सात्त्विक ध्यान—बालस्फटिक के समान कुन्तलों से उल्लासयुक्त मुख के साथ दिव्य कल्पों, मणियों, किंकिणियों, नूपुरों आदि से सज्जित, दीप्ताकार, विशद वसन, सुप्रसन्न, त्रिनेत्र, हाथों में शूल एवं दण्ड को धारण किये हुए वटुक की वन्दना करता हूँ।

राजस ध्यान—सूर्य के समान त्रिनेत्र, शरीर में रक्त अङ्गराग से लिप्त, प्रसन्न मुख वाले, हाथों में वरदमुद्रा, शूल, कपाल तथा अभय मुद्रा को धारण किये हुए, नील कण्ठ वाले, उदार, सैकड़ों भूषण धारण करने वाले, उज्ज्वल चन्द्रकला को धारण किये हुए, बन्धूकपुष्प (गुलदुपहरिया) के समान लाल रङ्ग के वस्त्रों को पहिने, भय को हरने वाले वटुकभैरव की सदा भावना करे।

तामस ध्यान—नीलाचल पर्वत की भाँति कान्ति वाले, चन्द्रकला को माथे पर धारण करने वाले, मुण्डमाला से युक्त, दिगम्बर, पिङ्गल वर्ण की जटाओं वाले, डमरू, सृणि (अङ्कुश), खड्ग, पाश, अभय मुद्रा, नाग, घण्टा,

कपाल को अपने करकमलों में लिये, विकट राल डाढ़ों वाले, सर्पों से वेष्टित, त्रिनेत्र, मणिमय किंकिणियों से शोभित तथा नूपुरयुक्त महेश का ध्यान करे।

त्रिविध ध्यान का फल—सात्त्विक ध्यान से अपमृत्यु का निवारण होता है। आयु-आरोग्य की प्राप्ति होती है तथा मोक्ष का फल मिलता है। राजस ध्यान धर्म, अर्थ एवं काम—इन तीनों पुरुषार्थों की प्राप्ति कराता है तथा तामस ध्यान से शत्रुओं का शमन तथा कृत्या, भूत, ग्रहादि का नाश होता है।

इस प्रकार ध्यान करके प्रथम पीठ की पूजा करने के उपरान्त यन्त्रादि की पूजा करनी चाहिये।

पीठपूजा—मूल में लिखित 'ॐ धं धर्माय नमः' इत्यादि आठ मन्त्रों से पीठदेवताओं की पूजा करे। यह पूजा गन्ध से की जाती है। फिर उसी से आगे मूल में लिखित 'ॐ वामायै नमः' इत्यादि नौ मन्त्रों से पीठशक्तियों की पूजा करनी चाहिये। फिर 'ॐ नमो भगवते सकलगुणात्मशक्तियुक्ताय अनन्ताय योगपीठात्मने नमः' कहकर पुष्पाञ्जलि द्वारा आसन दे। फिर उस पीठ पर विधिपूर्वक ताम्रकलश को पूर्वकथित मन्त्रों के द्वारा स्थापित करना चाहिये। फिर उस कलश पर वरुण का आवाहन करके पूजा करके तब उसके ऊपर रेशमी वस्त्र बिछाकर शक्तिगन्धाष्टक के द्वारा भैरव यन्त्र लेखन करना चाहिये।

आपद्भैरवयन्त्रोद्धारः

अथ यन्त्रोद्धारः रुद्रयामले—

यन्त्रोद्धारमिमं देवि त्रैलोक्ये चातिदुर्लभम्। तद्यन्त्रं च प्रवक्ष्यामि यत्र देवं च पूजयेत्॥ १॥
मध्ये चाष्टदलं पद्मं कर्णिकाकेसरोज्ज्वलम्। त्रिकोणं च ततः कृत्वा षट्कोणं च ततो न्यसेत्॥ २॥
वर्तुलं चाष्टपत्रं च चतुरस्रं त्रयात्मकम्। एवं यन्त्रं च सम्पूज्य स्वस्थो भूत्वा जपेन्नरः॥ ३॥

एवं यन्त्रं संलिख्य अथवा यथाशक्ति सुवर्णनिर्मितं यन्त्रं वा। तत्र सावयवां स्वर्णनिर्मितां भैरवप्रतिमां सात्त्विकादिध्यानप्रतिपादितां स्थापयेत्। ततः प्राणप्रतिष्ठां कृत्वा यथाविधि पूजयेत्। तद्यथा—देवेश भक्तिसुलभ परिवारसमन्वित। यावत्त्वां पूजयिष्यामि तावदेव इहावह॥ १॥ ॐ सद्यो जातं प्रपद्यामिसद्योजातायवैनमोनमः भवेभवेनातिभवेभवस्वमांभवोद्भवाय नमः। इति मन्त्रेणावाहनमुद्रां प्रदर्श्य ॐ भगवन् भैरव इहागच्छ आवाहनीभव इत्यावाहयेत्। ततः ॐ वामदेवायनमोज्येष्ठायनमःश्रेष्ठायनमोरुद्रायनमः कालायनमः कलविकरणायनमो-बलविकरणायनमः॥१॥ मूलं पठित्वा स्थापनीमुद्रां प्रदर्श्य स्थापनीभव इति संस्थापयेत्॥ २॥ ततो मूलं पठित्वा सन्निधापनमुद्रया इह सन्निधेहि सन्निधानो भवेति सन्निधाय॥ ३॥ ॐ अघोरेभ्योथघोरेभ्योघोरघोरतरेभ्यः सर्व्वेभ्यः सर्व्वसर्व्वेभ्योनमस्तेऽस्तुरुद्ररूपेभ्यः॥१॥ मूलं पठित्वा सन्निरोधनमुद्रया इह सन्निरुद्ध सन्निरोधिनीभव इति सन्निरोध्य॥ ४॥ ततो मूलं पठित्वा 'ॐ तत्पुरुषायविद्महेमहादेवायधीमहि। तन्नोरुद्रः प्रचोदयात्' इति मन्त्रेण योनिमुद्रां प्रदर्श्य सम्मुखो भव इति सम्मुखीकृत्य॥ ५॥ मूलान्ते ॐ ईशानः सर्व्वविद्यानामीश्वरः सर्व्वभूतानाम्। ब्रह्माधिपति-र्ब्रह्मणोधिपतिर्ब्रह्माशिवोमेअस्तुसदाशिवोम्॥१॥ इति वन्दनं कुर्य्यात्॥ ६॥ ततो मूलमन्त्रान्ते तत्तन्मन्त्रैः पाद्यादि-पुष्पान्तैरुपचारैः 'ॐ श्रीमद्बटुकभैरवाय नमः' इति मन्त्रेण सम्पूज्य आवरणपूजान्ते धूपदीपादि निवेदयेत्।


रुद्रयामल तन्त्रग्रन्थ के अनुसार यन्त्रोद्धार—किसी भी यन्त्र की निर्माण-विधि या लेखन-विधि को उसका उद्धार कहते हैं। यहाँ पर रुद्रयामल में श्री शिव जी देवी पार्वती से आपद् भैरव की पूजा के लिये आपद् भैरव यन्त्र का उद्धार कहते हैं।

हे देवि! अब मैं तुमसे इस त्रैलोक्य में दुर्लभ 'आपद् भैरव यन्त्र' का उद्धार कहता हूँ, जिससे वटुकभैरव की पूजा करनी चाहिये। मध्य में अष्टदल कमल लिखे, जिसमें कर्णिका तथा केसर प्रत्यक्ष दिखते हों। फिर उसके

बाहर त्रिकोण बनाये। त्रिकोण के बाहर षट्कोण बनाना चाहिये। फिर उसके बाहर अष्टपत्रात्मक वर्तुल बनाना (लिखना) चाहिये। उस वर्तुल के बाहर तीन चतुरस्र खींचना चाहिये। इस प्रकार के यन्त्र को पूजित करके साधक को स्वस्थ चित्त से मन्त्र का जप करना चाहिये।

इस प्रकार यन्त्र को लिखकर अथवा लिखने के स्थान पर यदि सामर्थ्य हो तो स्वर्ण के पत्र पर यन्त्र का लेखन कराकर स्थापित करे तथा उसके ऊपर (यन्त्र के ऊपर) स्वर्णनिर्मित बटुकभैरव की प्रतिमा स्थापित कर उसमें सात्त्विकादि ध्यान करे। फिर उसकी प्राणप्रतिष्ठा करके यथाविधि पूजा करनी चाहिये।

श्रीआपदुद्धारणबटुकभैरवयन्त्रं सदैवतं सबीजं समन्त्रमिदम्



भैरवप्रतिमा पूजा-विधि—हे देवेश! आप भक्ति करने पर सुलभ हैं; अतः जब तक मैं पूजा करूँ तब तक आप यहाँ आकर प्रतिष्ठित रहें। इस प्रकार कहकर 'ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः। भवे भवे नातिभवे भवस्व मां भवोद्भवाय नमः' इस मन्त्र का उच्चारण करके आवाहनमुद्रा का प्रदर्शन करे। फिर मूल मन्त्र का उच्चारण करके 'ॐ भगवन् भैरव इहागच्छ आवाहनीभव' कहकर आवाहन करे। तत्पश्चात् 'ॐ वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमः' इस आपद् उद्धारक बटुकभैरव के (इक्कीस वर्णों वाले) मन्त्र का उच्चारण करके स्थापनी मुद्रा का प्रदर्शन करके 'स्थापनी भव' कहकर स्थापित करे। फिर मूल मन्त्र (ॐ ह्रीं बटुकाय आपदुद्धरणाय कुरु-कुरु बटुकाय ह्रीं) का उच्चारण कर सन्निधापन मुद्रा का प्रदर्शन कर 'इह सन्निधेहि सन्निधानीभव' ऐसा कहकर सन्निधान करे। फिर 'ॐ अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः सर्वेभ्यः सर्वसर्वेभ्यो नमस्ते रुद्ररूपेभ्यः' इस वैदिक मन्त्र के उच्चारणोपरान्त मूल मन्त्र पढ़कर सन्निरोधन मुद्रा के प्रदर्शन के साथ 'इह सन्निरुद्ध सन्निरोधिनी भव' कहकर सन्निरोधन करे। पुनः मूल मन्त्र को पढ़कर फिर 'ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात्' इस रुद्रगायत्री को पढ़कर योनिमुद्रा का प्रदर्शन कर 'सम्मुखी भव' कहकर सम्मुखीकरण करना चाहिये। पुनः इक्कीस अक्षरों वाले मूल मन्त्र का उच्चारण करके फिर 'ॐ ईशानः सर्वविद्यानां ईश्वरः सर्वभूतानाम्। ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्माशिवोमे अस्तु सदाशिवोम्' इस वैदिक मन्त्र के उच्चारण द्वारा ईशान शिव की वन्दना करनी चाहिये।

इसके पश्चात् प्रथम इक्कीस वर्णों का आपदुद्धारक वटुकभैरव मन्त्र (ॐ ह्रीं बटुकाय आपदुद्धरणाय कुरु-कुरु बटुकाय ह्रीं) को, जो कि इस प्रसङ्ग में मूल मन्त्र है, प्रत्येक बार उच्चारण करके फिर षोडशोपचार के जो भी वैदिक मन्त्र हैं, उनसे पाद्य से लेकर पुष्पान्त उपचारों द्वारा पूजन करना चाहिये। वैदिक मन्त्र के अन्त में 'श्री मद्वटुकभैरवाय नमः' मन्त्र अवश्य बोलते जाना चाहिये। इसके पश्चात् आवरण-पूजा करनी चाहिये तथा आवरण पूजादि के अन्त में धूप-दीप का निवेदन करना चाहिये।

इस यन्त्र में ग्यारह आवरण होते हैं; प्रत्येक आवरण की पूजा विधि-विस्तारपूर्वक आगे दी जा रही है।

आपदुद्धारकयन्त्रावरणपूजा

अथावरणपूजा पुष्पाञ्जलिमादाय—

ॐ संविन्मयः परो देवः परामृतरसप्रियः। अनुज्ञां देहि वटुक परिवारार्चनाय मे॥ १॥

इति पुष्पाञ्जलिं भैरवोपरि दत्त्वा आज्ञां गृहीत्वा पूज्यपूजकयोर्मध्ये प्राचीं प्रकल्प्य तदनुसारेण अन्या दिशश्च कृत्वा यन्त्रं पूजयेत्। मध्ये त्रिकोणे देवस्याग्रे ॐ ह्रौं वौं ईशानाय नमः ॥ १ ॥ ॐ ह्रैं वैं तत्पुरुषाय नमः ॥ २ ॥ ॐ ह्रूं वूं अघोराय नमः ॥ ३ ॥ ह्रीं वीं वामदेवाय नमः ॥ ४ ॥ ॐ ह्रां वां सद्योजाताय नमः ॥ ५ ॥ इति पूजयेत् ॥ १ ॥

अभीष्टसिद्धिं मे देहि शरणागतवत्सल। भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम्॥

इति पुष्पाञ्जलिं दद्यात् ॥ १ ॥ एवं सर्वत्र। इति प्रथमावरणम् ॥ १ ॥

ततः कर्णिकाद्बहिः अष्टदलेषु पूर्वादिक्रमेण ॐ असिताङ्गभैरवाय नमः ॥ १ ॥ ॐ रुरुभैरवाय नमः ॥ २ ॥ ॐ चण्डभैरवाय नमः ॥ ३ ॥ ॐ क्रोधभैरवाय नमः ॥ ४ ॥ ॐ उन्मत्तभैरवाय नमः ॥ ५ ॥ ॐ कपालभैरवाय नमः ॥ ६ ॥ ॐ भीषणभैरवाय नमः ॥ ७ ॥ ॐ संहारभैरवाय नमः ॥ ८ ॥ इति भैरवाष्टकं सम्पूज्य मूलेन 'अभीष्टसिद्धिं०' इति पुष्पाञ्जलिं दद्यात्। इति द्वितीयावरणम् ॥ २ ॥

ततस्त्रिकोणाद्बहिः आग्नेयादिषट्कोणेषु ॐ ह्रीं भूतनाथाय नमः ॥ १ ॥ ॐ ह्रीं आदिनाथाय नमः ॥ २ ॥ ॐ ह्रीं आनन्दनाथाय नमः ॥ ३ ॥ ॐ ह्रीं सिद्धशावरनाथाय नमः ॥ ४ ॥ ॐ ह्रीं सहजानन्दनाथाय नमः ॥ ५ ॥ ॐ ह्रीं निःसीमानन्दनाथाय नमः ॥ ६ ॥ इति रुद्रयामलोक्तान्सम्पूज्य तत्रैव ॐ ह्रां वां हृदयाय नमः ॥ १ ॥ ॐ ह्रीं वीं शिरसे स्वाहा

नमः ॥ २ ॥ ॐ हूं वूं शिखायै वषट् नमः ॥ ३ ॥ ॐ हैं वैं कवचाय हुं नमः ॥ ४ ॥ ॐ ह्रौं वौं नेत्रत्रयाय वौषट् नमः ॥ ५ ॥ ॐ हः वः अस्त्राय फट् नमः ॥ ६ ॥ इत्यङ्गानि च सम्पूज्य मूलमन्त्रेण पूर्ववत्पुष्पाञ्जलिं दद्यात्। इति तृतीयावरणम् ॥ ३ ॥

ततस्तद्बहिर्वर्तुले पूर्वादीशानपर्यन्तं क्रमेण ॐ ह्रीं डाकिनीपुत्रेभ्यो नमः ॥ १ ॥ ॐ ह्रीं राकिनीपुत्रेभ्यो नमः ॥ २ ॥ ॐ ह्रीं लाकिनीपुत्रेभ्यो नमः ॥ ३ ॥ ॐ ह्रीं काकिनीपुत्रेभ्यो नमः ॥ ४ ॥ ॐ ह्रीं शाकिनीपुत्रेभ्यो नमः ॥ ५ ॥ ॐ ह्रीं हाकिनीपुत्रेभ्यो नमः ॥ ६ ॥ ॐ ह्रीं मालिनीपुत्रेभ्यो नमः ॥ ७ ॥ ॐ ह्रीं देवीपुत्रेभ्यो नमः ॥ ८ ॥ इत्यष्टदिक्षु सम्पूज्य ततो (देवस्य दक्षभागे) ॐ ह्रीं उमापुत्रेभ्यो नमः ॥ ९ ॥ ॐ ह्रीं रुद्रपुत्रेभ्यो नमः ॥ १० ॥ ॐ ह्रीं मातृपुत्रेभ्यो नमः ॥ ११ ॥ (पूर्वेशानयोर्मध्ये ऊर्ध्वम्) ॐ ह्रीं ऊर्ध्वमुखीपुत्रेभ्यो नमः ॥ १२ ॥ (पश्चिमनैर्ऋतयोर्मध्ये अधः) ॐ ह्रीं अधोमुखीपुत्रेभ्यो नमः ॥ १३ ॥ इति त्रयोदश पुत्रान्सम्पूज्य मूलेन पुष्पाञ्जलिं दद्यात्। इति चतुर्थावरणम् ॥ ४ ॥

तद्बहिरष्टदलेषु पूर्वादग्न्यन्तं वामक्रमेण (पूर्वे) ॐ ह्रीं ब्रह्माणीपुत्रवटुकाय नमः ॥ १ ॥ (ईशान्याम्) ॐ ह्रीं माहेश्वरीपुत्रवटुकाय नमः ॥ २ ॥ (उत्तरे) ॐ ह्रीं वैष्णवीपुत्रवटुकाय नमः ॥ ३ ॥ (वायव्याम्) ॐ ह्रीं कौमारीपुत्रवटुकाय नमः ॥ ४ ॥ (पश्चिमे) ॐ ह्रीं इन्द्राणीपुत्रवटुकाय नमः ॥ ५ ॥ (नैर्ऋत्याम्) ॐ ह्रीं महालक्ष्मीपुत्रवटुकाय नमः ॥ ६ ॥ (दक्षिणे) ॐ ह्रीं वाराहीपुत्रवटुकाय नमः ॥ ७ ॥ (आग्नेय्याम्) ॐ ह्रीं चामुण्डापुत्रवटुकाय नमः ॥ ८ ॥ इति सम्पूज्य मूलेन पूर्ववत्पुष्पाञ्जलिं दद्यात्। इति पञ्चमावरणम् ॥ ५ ॥

अष्टदलाद्बहिः चतुरस्राभ्यन्तरे पूर्वादिप्राग्दक्षिणेन दशदिक्षु ॐ ह्रीं हेतुकाय नमः ॥ १ ॥ ॐ ह्रीं त्रिपुरान्तकाय नमः ॥ २ ॥ ॐ ह्रीं वेतालाय नमः ॥ ३ ॥ ॐ अग्निजिह्वाय नमः ॥ ४ ॥ ॐ ह्रीं कालान्तकाय नमः ॥ ५ ॥ ॐ ह्रीं करालाय नमः ॥ ६ ॥ ॐ ह्रीं एकपादाय नमः ॥ ७ ॥ ॐ ह्रीं भीमरूपाय नमः ॥ ८ ॥ (इन्द्रेशानयोर्मध्ये) ॐ ह्रीं अचलाय नमः ॥ १ ॥ (नैर्ऋतवरुणयोर्मध्ये) ॐ ह्रीं हाटकेशाय नमः ॥ २ ॥ इति सम्पूज्य मूलेन पूर्ववत्पुष्पाञ्जलिं दद्यात्। इति षष्ठावरणम्।

ततः त्रिरेखात्मकभूपुरस्य प्रथमरेखायां दिग्विदिगन्तरालेषु षोडशस्थानेषु श्रीकण्ठादिमहासेनान्तान्यजेत्। (पूर्वे) ॐ ह्रीं श्रीकण्ठेशपूर्णोदरीभ्यां नमः ॥ १ ॥ (दक्षिणे) ॐ ह्रीं अनन्तेशविरजाभ्यां नमः ॥ २ ॥ (पश्चिमे) ॐ ह्रीं सूक्ष्मेशशाल्मलीभ्यां नमः ॥ २ ॥ (उत्तरे) ॐ ह्रीं त्रिमूर्तीशलोलाक्षीभ्यां नमः ॥ ४ ॥ (आग्नेये) ॐ ह्रीं अमरेशवर्त्तुलाक्षीभ्यां नमः ॥ ५ ॥ (नैर्ऋते) ॐ ह्रीं अर्घीशदीर्घघोणाभ्यां नमः ॥ ६ ॥ (वायव्याम्) ॐ ह्रीं भारभूतीशदीर्घमुखीभ्यां नमः ॥ ७ ॥ (ईशान्याम्) ॐ ह्री अतिथीशगोमुखीभ्यां नमः ॥ ८ ॥ (पूर्वाग्निमध्ये) ॐ स्थाण्वीशदीर्घजिह्वाभ्यां नमः ॥ ९ ॥ (दक्षिणनैर्ऋत्ययोर्मध्ये) ॐ ह्रीं हरेशकुण्डोदरीभ्यां नमः ॥ १० ॥ (पश्चिमवायुमध्ये) ॐ ह्रीं झिंटीशोर्ध्वकेशीभ्यां नमः ॥ ११ ॥ (उत्तरेशानमध्ये) ॐ ह्रीं भौतिकेशविकृतमुखीभ्यां नमः ॥ १२ ॥ (अग्निदक्षिणमध्ये) ॐ ह्रीं सद्योजातेशज्वालामुखीभ्यां नमः ॥ १३ ॥ (निर्ऋतिवरुणमध्ये) ॐ ह्रीं अनुग्रहेशोल्कामुखीभ्यां नमः ॥ १४ ॥ (वायुसोममध्ये) ॐ ह्रीं अक्रूरेशश्रीमुखीभ्यां नमः ॥ १५ ॥ (ईशानपूर्वमध्ये) ॐ ह्रीं महासेनेशविद्यामुखीभ्यां नमः ॥ १६ ॥ इति सम्पूज्य मूलेन पूर्ववत्पुष्पाञ्जलिं दद्यात्। इति सप्तमावरणम् ॥ ७ ॥

भूपुरस्य द्वितीयरेखायां दिग्विदिगन्तरालेषु षोडशस्थानेषु क्रोधीश्वराद्याषाढान्तान् यजेत्। (पूर्वे) ॐ ह्रीं क्रोधीशमहाकालीभ्यां नमः ॥ १ ॥ (दक्षिणे) ॐ ह्रीं चण्डीशसरस्वतीभ्यां नमः ॥ २ ॥ (पश्चिमे) ॐ ह्रीं पञ्चान्तकेशसर्वसिद्धिगौरीभ्यां नमः ॥ ३ ॥ (उत्तरे) ॐ ह्रीं शिवोत्तमेशत्रैलोक्यविजयाभ्यां नमः ॥ ४ ॥ (आग्नेय्याम्) ॐ ह्रीं एकरुद्रेशमन्त्रशक्तिभ्यां नमः ॥ ५ ॥ (नैर्ऋत्याम्) ॐ ह्रीं कूर्मेशात्मकशक्तिभ्यां नमः ॥ ६ ॥ (वायव्याम्) ॐ ह्रीं एकनेत्रेशभूतमातृकाभ्यां नमः ॥ ७ ॥ (ऐशान्याम्) ॐ ह्रीं चतुराननेशलम्बोदरीभ्यां नमः ॥ ८ ॥ (पूर्वाग्निमध्ये) ॐ ह्रीं अजेशद्राविणीभ्यां नमः ॥ ९ ॥ (दक्षिणनैर्ऋतमध्ये) ॐ ह्रीं सर्वेशनागरीभ्यां नमः ॥ १० ॥ (पश्चिमवायुमध्ये) ॐ ह्रीं सोमेशखेचरीभ्यां नमः ॥ ११ ॥ (उत्तरेशानमध्ये) ॐ ह्रीं लाङ्गलीशमञ्जरीभ्यां नमः ॥ १२ ॥ (अग्नियाम्यमध्ये) ॐ ह्रीं दारुकेशरूपिणीभ्यां नमः ॥ १३ ॥ (नैर्ऋतपश्चिममध्ये) ॐ ह्रीं अर्धनारीशवीरणीभ्यां नमः ॥ १४ ॥ (वायुसोममध्ये) ॐ ह्रीं उमाकान्तेशकाकोदरीभ्यां नमः ॥ १५ ॥ (ईशानपूर्वमध्ये) ॐ ह्रीं आषाढेशपूतनाभ्यां नमः ॥ १६ ॥ इति पूजयेत्। मूलमन्त्रेण पुष्पाञ्जलिं दद्यात्। इति अष्टमावरणम् ॥ ८ ॥

भूपुरस्य तृतीयरेखायां दिग्विदिगन्तरालेषु षोडशस्थानेषु दण्डीश्वरादिभृग्वीशान्तान् पूजयेत्। तत्र (पूर्वे) ॐ ह्रीं दण्डीशभद्रकालीभ्यां नमः ॥ १ ॥ (दक्षिणे) ॐ ह्रीं अत्रीशयोगिनीभ्यां नमः ॥ २ ॥ (पश्चिमे) ॐ ह्रीं मीनेशशङ्खिनीभ्यां नमः ॥ ३ ॥ (उत्तरे) ॐ ह्रीं मेषेशसर्जनीभ्यां नमः ॥ ४ ॥ (आग्नेय्याम्) ॐ ह्रीं लोहि तेशकालरात्रीभ्यां नमः ॥ ५ ॥ (नैर्ऋत्याम्) ॐ ह्रीं शिखीशकुञ्चिकाभ्यां नमः ॥ ६ ॥ (वायव्याम्) ॐ ह्रीं छागलेशकपर्दिनीभ्यां नमः ॥ ७ ॥ (ऐशान्याम्) ॐ ह्रीं द्विरण्डेशवज्रिणीभ्यां नमः ॥ ८ ॥ (पूर्वाग्निमध्ये) ॐ ह्रीं महाकालेशजयाभ्यां नमः ॥ ९ ॥ (दक्षिणनैर्ऋतमध्ये) ॐ ह्रीं त्वगात्मभ्यां वालेशसुमुखेश्वरीभ्यां नमः ॥ १० ॥ (पश्चिमवायव्यमध्ये) ॐ ह्रीं असृगात्मभ्यां भुजङ्गेशरेवतीभ्यां नमः ॥ ११ ॥ (उत्तरेशानयोर्मध्ये) ॐ ह्रीं मांसात्मभ्यां पिनाकीशमाधवीभ्यां नमः ॥ १२ ॥ (आग्नेयदक्षिणमध्ये) ॐ ह्रीं मेदात्मभ्यां खड्गीशवारुणीभ्यां नमः ॥ १३ ॥ (नैर्ऋतपश्चिममध्ये)—ॐ ह्रीं अस्थ्यात्मभ्यां वकेशवायवीभ्यां नमः ॥ १४ ॥ (वायुसोममध्ये) ॐ ह्रीं मज्जात्मभ्यां श्वेतेशरक्षोवधारिणीभ्यां नमः ॥ १५ ॥ (ईशानपूर्वमध्ये) ॐ ह्रीं शुक्रात्मभ्यां भृग्वीशसहजाभ्यां नमः ॥ १६ ॥ ततो भूपुराद्बहिः दक्षिणभागे लकुलेशादित्रयं पूजयेत्—ॐ ह्रीं प्राणात्मभ्यां लकुलीशलक्ष्मीभ्यां नमः ॥ १ ॥ ॐ ह्रीं शक्त्यात्मभ्यां शिवेशव्यापिनीभ्यां नमः ॥ २ ॥ ॐ ह्रीं क्रोधात्मभ्यां संवर्तकेशमहामायाभ्यां नमः ॥ ३ ॥ (ईशानभागे) ॐ ह्रीं योगिनीसहितेभ्यो दिव्ययोगीश्वरेभ्यो नमः ॥ ४ ॥ (आग्नेयकोणे) ॐ ह्रीं योगिनीसहितेभ्योऽन्तरिक्षयोगीश्वरेभ्यो नमः ॥ ५ ॥ (नैर्ऋतकोणे) ॐ ह्रीं योगिनीसहितभूमिस्थयोगीश्वरेभ्यो नमः ॥ ६ ॥ (पूर्वे) गं गणपतये नमः ॥ ७ ॥ (दक्षिणे) भैं भैरवाय नमः ॥ ८ ॥ (पश्चिमे) क्षें क्षेत्रपालाय नमः ॥ ९ ॥ (उत्तरे) दुं दुर्गायै नमः ॥ १० ॥ इति सम्पूज्य मूलमन्त्रेण पुष्पाञ्जलिं दद्यात्। इति नवमावरणम् ॥ ९ ॥

भूपुराद्बहिः पूर्वादिदशदिक्षु इन्द्रादीन् पूजयेत्—ॐ ह्रीं लं इन्द्राय नमः ॥ १ ॥ ॐ ह्रीं रं अग्नये नमः ॥ २ ॥ ॐ ह्रीं मं यमाय नमः ॥ ३ ॥ ॐ ह्रीं क्षं निर्ऋतये नमः ॥ ४ ॥ ॐ ह्रीं वं वरुणाय नमः ॥ ५ ॥ ॐ ह्रीं यं वायवे नमः ॥ ६ ॥ ॐ ह्रीं सं सोमाय नमः ॥ ७ ॥ ॐ ह्रीं इं ईशानाय नमः ॥ ८ ॥ ॐ ह्रीं आं ब्रह्मणे नमः ॥ ९ ॥ ॐ ह्रीं अं अनन्ताय नमः ॥ १० ॥ इति सम्पूज्य मूलमन्त्रेण पुष्पाञ्जलिं दद्यात्। इति दशमावरणम् ॥ १० ॥

ततः पूर्वादिक्रमेण इन्द्रादिदिक्पालसमीपे स्वस्वायुधान्पूजयेत्। तद्यथा—ॐ वज्राय नमः ॥ १ ॥ ॐ शक्तये नमः ॥ २ ॥ ॐ दण्डाय नमः ॥ ३ ॥ ॐ खड्गाय नमः ॥ ४ ॥ ॐ पाशाय नमः ॥ ५ ॥ ॐ अङ्कुशाय नमः ॥ ६ ॥ ॐ गदायै नमः ॥ ७ ॥ ॐ त्रिशूलाय नमः ॥ ८ ॥ ॐ पद्माय नमः ॥ ९ ॥ ॐ चक्राय नमः ॥ १० ॥ इति सम्पूज्य मूलेन पुष्पाञ्जलिं दद्यात्। इति एकादशमावरणम् ॥ ११ ॥

एवमावरणपूजां कृत्वा मूलमन्त्रेण धूपदीपनैवेद्यताम्बूलदक्षिणानीराजनादिभिर्भैरवं सम्पूज्य स्तवराजेन स्तुत्वा साष्टाङ्गं प्रणम्य यथाविधि जपं कुर्यात्। अस्य पुरश्चरणमेकविंशतिलक्षात्मकम्। ततो जपान्ते मधुरसंयुतैस्तिलैर्दशांशहोमं कृत्वा तत्तद्दशांशेन तर्पणमार्जनब्राह्मणभोजनानि कुर्य्यात्। होमान्ते वा चतुर्दश्यां वाष्टम्यां मध्यरात्रे महाबलिदानं कार्य्यम्। एवं सिद्धे मन्त्रे स्वकार्यार्थं प्रयोगान्साधयेत्।

आवरणपूजा—हाथों में पुष्पाञ्जलि लेकर 'ॐ संविन्मयः परो देवः परामृतरसप्रियः। अनुज्ञां देहि वटुक परिवारार्चनाय मे ॥' इस मन्त्र से भैरव के ऊपर पुष्पाञ्जलि छोड़नी चाहिये। फिर उनसे आज्ञा लेकर पूज्य एवं पूजक के मध्य प्राची दिशा है—ऐसी मन में कल्पना करके उसी के अनुसार अन्य दिशाओं की कल्पना करके वटुकभैरव यन्त्र की पूजा करनी चाहिये। यन्त्र के मध्य के त्रिकोण में देव के आगे 'ॐ ह्रौं वौं ईशानाय नमः' इत्यादि मूल में लिखित पाँच मन्त्रों से शिवजी के पाँच मुखों की पूजा क्रम से करनी चाहिये। फिर 'अभीष्टसिद्धिं मे देहि शरणागतवत्सल। भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम्' ऐसा कहकर प्रथमावरण पूजा की पुष्पाञ्जलि देव (भैरव) को समर्पित कर देनी चाहिये।

फिर कर्णिका के बाहर अष्टदलों में पूर्वादिक्रम से 'ॐ असिताङ्गभैरवाय नमः' इत्यादि मूलपाठ में लिखित आठ मन्त्रों से क्रमशः आठ भैरवों की पूजा करे। तत्पश्चात् 'अभीष्टसिद्धिं मे देहि शरणागतवत्सल। भक्त्या समर्पये तुभ्यं द्वितीयावरणार्चनम्' कहकर दूसरे आवरण के देवताओं की पूजाहेतु पुष्पाञ्जलि अर्पित करे।

फिर त्रिकोण के बाहर, आग्नेयादि छः कोणों में 'ॐ ह्रीं भूतनाथाय नमः' इत्यादि छः मन्त्रों से रुद्रयामलोक्त नामों को पूजकर उसी आवरण में उसी क्रम से मूलपाठ में लिखित 'ॐ ह्रां वां हृदयाय नमः' इत्यादि छः मन्त्रों से अङ्गों की पूजा करके फिर मूल मन्त्र (वटुकभैरव के इक्कीस वर्ण के मन्त्र) से पुष्पाञ्जलि देकर तृतीयावरण की पूजा समाप्त करे।

फिर तृतीयावरण के बाहर के वृत्त में पूर्व से लेकर ईशानकोण-पर्यन्त प्रदक्षिणक्रम से 'ॐ ह्रीं डाकिनीपुत्रेभ्यो नमः' इत्यादि आठ मन्त्रों से आठ दिशाओं में पूजा करे। फिर भैरव के दक्षिण भाग में 'ॐ ह्रीं उमापुत्रेभ्यो नमः, ॐ ह्रीं रुद्रपुत्रेभ्यो नमः' तथा 'ॐ ह्रीं मातृपुत्रेभ्यो नमः' इन तीन मन्त्रों से पूजन करे। फिर पूर्व तथा ईशानकोण के मध्य में ऊर्ध्व दिशा में 'ॐ ह्रीं ऊर्ध्वमुखीपुत्रेभ्यो नमः' से पूजन करे फिर पश्चिम एवं नैर्ऋत्य कोण के मध्य में अधो दिशा में 'ॐ ह्रीं अधोमुखीपुत्रेभ्यो नमः' कहकर त्रयोदश पुत्रों की पूजा कर मूल मन्त्र से चतुर्थ आवरण के देवों के लिये पुष्पाञ्जलि समर्पित करे।

फिर चतुर्थ आवरण के बाहर दलों में पूर्व से लेकर अग्निकोण तक वामक्रम से पूर्वादि दिशाओं में मूलोक्त 'ॐ ह्रीं ब्राह्मणीपुत्रवटुकाय नमः' इत्यादि आठ मन्त्रों से ईशानादि अग्निकोण-पर्यन्त पञ्चमावरण का पूजन कर मूलमन्त्र से पुष्पाञ्जलि देनी चाहिये।

तदनन्तर अष्टदलों के बाहर चतुरस्र के भीतर पूर्वादि दिशाओं में प्रदक्षिणक्रम से दशो दिशाओं (पूर्व-आग्नेय-दक्षिण-नैर्ऋत्य-पश्चिम-वायव्य-उत्तर-ईशान-ऊर्ध्व-अधः) में 'ॐ ह्रीं हेतुकाय नमः' इत्यादि दश मन्त्रों से षष्ठावरण का पूजन करे। फिर पूर्व की भाँति मूल मन्त्र द्वारा पुष्पाञ्जलि देनी चाहिये।

फिर यन्त्र में जो तीन रेखाओं वाला भूपुर है, उसकी प्रथम रेखा में दिशा-विदिशाओं के अन्तरालों (बीच के सोलह स्थानों) में श्रीकण्ठ से लेकर महासेन तक सप्तमावरण का पूजन करे। जैसे कि पूर्व में 'ॐ ह्रीं श्रीकण्ठेशपूर्णोदरीभ्यां नमः' (यन्त्र का चित्र पूर्व में द्रष्टव्य है) इस मन्त्र से पूजन करे। फिर दक्षिण में 'ॐ ह्रीं त्रिमूर्तीशलोलाक्षीभ्यां नमः' इत्यादि पूजनकर मूलमन्त्र से पुष्पाञ्जलि देनी चाहिये।

फिर यन्त्र में भूपुर की द्वितीय रेखा में दिग्-विदिग् के अन्तरालों में मूलोक्त 'ॐ ह्रीं क्रोधीशमहाकालीभ्यां नमः' इत्यादि १६ मन्त्रों से पूर्वादि दिशाओं में (प्रदक्षिण) क्रम से अष्टमावरण का पूजन कर अन्त में मूल मन्त्र से पुष्पाञ्जलि प्रदान करे।

फिर भूपुर की तृतीय रेखा में दिशाओं-विदिशाओं के अन्तरालों में सोलह स्थानों में दण्डीश्वर से लेकर भृग्वीश-पर्यन्त नवमावरण का पूजन करे। मन्त्र एवं विधि मूलपाठ में लिखित है; यथा—'ॐ दण्डीशभद्रकालीभ्यां नमः' से पूर्व में, 'ॐ अत्रीशयोगिनीभ्यां नमः' से दक्षिण में, 'ॐ मीनेशशङ्खिनीभ्यां नमः' से पश्चिम में पूजन करे। इत्यादि क्रम से पूजन करके अन्त में मूल मन्त्र से पुष्पाञ्जलि दे। इसके पश्चात् भूपुर के बाहर भी दक्षिण भाग में 'ॐ ह्रीं प्राणात्मभ्यां लकुलीशलक्ष्मीभ्यां नमः' इत्यादि मूलोक्त तीन मन्त्रों से लकुलीश, शिवेश तथा क्रोधात्म की पूजा करे। तथैव ईशान में 'ॐ ह्रीं योगिनीसहितेभ्यो दिव्ययोगीश्वरेभ्यो नमः' से पूजा करे। इस प्रकार बाहरी भाग में कुल दश मन्त्रों से मूल-पाठानुसार पूजा करनी चाहिये।

फिर भूपुर के बाहर पूर्वादि दिशाओं में इन्द्र से लेकर प्रदक्षिणक्रम से अनन्त-पर्यन्त 'ॐ ह्रीं लं इन्द्राय नमः' इत्यादि दश मन्त्रों से पूजा करनी चाहिये। यह दशमावरण की पूजाविधि है।

ग्यारहवें आवरण में दिक्पालों के समीप पूर्वादि दिशाओं में प्रदक्षिणक्रम से 'ॐ वज्राय नमः' इत्यादि दश मन्त्रों से उनके आयुधों की पूजा करे। इस प्रकार से ग्यारहों आवरणों की पूजा सम्पन्न करके मूल मन्त्र से पुष्पाञ्जलि देनी चाहिये। तदुपरान्त आगे दिये गये 'वटुकभैरव स्तवराज' नामक स्तोत्र का मूल पाठ करना चाहिये। फिर साष्टाङ्ग प्रणाम करके यथाविधि मूल मन्त्र का जप करना चाहिये। इसके पुरश्चरणहेतु मन्त्रजप की सङ्ख्या इक्कीस लाख निर्धारित है।

जप की समाप्ति पर शर्करा या मधु से युक्त तिलों (काले तिलों) द्वारा पुरश्चरण सङ्ख्या—इक्कीस लाख का दशमांश (दो लाख दस सहस्र) होम करना चाहिये। होम का दशमांश (२१ सहस्र) तर्पण, तर्पण का दशमांश (इक्कीस सौ=२१००) मार्जन तथा मार्जन का दशमांश अर्थात् दो सौ दस (२१०) ब्राह्मणों को भोजन कराना चाहिये। होम के पश्चात् ही अथवा चतुर्थी अथवा अष्टमी तिथियों में मध्य रात्रि में वटुकभैरव के लिये महाबलि समर्पित करनी चाहिये। इस प्रकार मन्त्र के सिद्ध हो जाने पर अपने कार्य-हेतु प्रयोगों का साधन करना चाहिये।

आपदुद्धारकवटुकभैरवमन्त्रस्य विविधप्रयोगाः

शारदातिलके—

वर्णलक्षं जपेन्मन्त्रं हविष्याशी जितेन्द्रियः। तद्दशांशे प्रजुहुयात्तिलैर्मधुरसंयुतैः॥ १॥
इति सम्पूजयेद्देवं वटुकं प्रोक्तवर्त्मना। धर्मार्थकाममोक्षाणां पतिर्भवति मानवः॥ २॥
विघ्नदुर्गां समाराध्य बलिं दत्त्वा विधानतः। काम्यानि साधयेन्मन्त्री यथोक्तां सिद्धिमाप्नुयात्॥ ३॥
शाल्यन्नं पललं सर्पिर्लाजाचूर्णानि शर्करा। गुडमिक्षुरसापूपैर्मध्वक्तैः परिमिश्रितैः॥ ४॥
कृत्वा कवलमाराध्य देवं प्रागुक्तवर्त्मना। रक्तचन्दनपुष्पाद्यैर्निशि तस्मै बलिं हरेत्॥ ५॥
ततः सिध्यन्ति कार्याणि बलिनानेन मन्त्रिणः। जुहुयात्सर्पिषा मन्त्री यथोक्तां सिद्धिमाप्नुयात्॥ ६॥

आपद् उद्धारक वटुकभैरव मन्त्र के विविध प्रयोग—हविष्यान्न का भोजन कर वर्णलक्ष (चौंसठ लाख) की सङ्ख्या में जितेन्द्रिय होकर जप करे तथा उसका दशांश (६,४०,०००=छः लाख चालीस सहस्र) तिल एवं शर्करा से होम करे। वटुकदेव का विधिपूर्वक पूजन करे तो मनुष्य को धर्म, अर्थ, काम, मोक्ष—चारो पदार्थों की प्राप्ति हो जाती है। विघ्नदुर्गा की आराधना करके विधिपूर्वक उनके निमित्त बलिदान करके साधक अपनी कामनाओं को पूर्ण कर सकता है। शालि चावल, मांस, घृत, लाजाचूर्ण, शर्करा, गुड़, ईख का रस तथा मधु को मिलाकर कवल बनाकर इसका नैवेद्य देवता को (भैरव) को अर्पित करे। फिर लाल चन्दन, रक्त पुष्पादि के द्वारा रात्रि में बलिदान करे तब कार्य सिद्ध होते हैं॥ १-६॥

वश्याय जुहुयाद्दिक्षु शकलैर्वशयेज्जनान्। जुहुयात्पुत्रलाभाय प्रफुल्लैः कैरवैः सुधीः॥ ७॥
धनधान्यादिसम्पत्त्यै जुहुयात्तिलतण्डुलैः। बिल्वप्रसूनैर्जुहुयान्महतीं विन्दति श्रियम्॥ ८॥
लोणैर्मधुरसम्मिश्रैर्वशयेद्वनिताजनान्। वृष्टिकामेन होतव्यं वेतसानां समिद्वरैः॥ ९॥
अन्नेन जुहुयान्नित्यं धनधान्यादिसम्पदे। वश्याय जुहुयान्मन्त्री मधुना दिवसत्रयम्॥ १०॥

रोगोक्तौषधहोमेन रोगा नश्यन्ति तत्क्षणात्। कृत्याद्रोहे ग्रहद्रोहे भूतापस्मारसम्भवे॥ ११॥
व्याघ्राजिने समासीनो जुहुयादयुतं तिलैः। भूतादयः पलायन्ते नेक्षन्ते तां दिशं भयात्॥ १२॥

वशीकरण के लिये इक्षुखण्डों का हवन करना चाहिये। इससे लोग वश में हो जाते हैं। पुत्र की प्राप्ति के लिये कमल के फूलों का हवन करना चाहिये। धन-धान्यादि सम्पत्ति की प्राप्ति के लिये तिल एवं चावलों का हवन करना चाहिये। बेल के फूलों का हवन करने से महान् लक्ष्मी की प्राप्ति होती है। यदि लवण एवं शर्करा का हवन किया जाय तो स्त्रियाँ वश में हो जाती हैं। वृष्टि की इच्छा से वेतस की समिधाओं द्वारा होम करना चाहिये। नित्य ही अन्न (उबले चावल) का होम करने से धन-धान्यादि सम्पदा प्राप्त होती है। वशीकरण के लिये साधक को तीन दिन तक मधु से होम करना चाहिये। जिस रोग की जो औषध (जड़ी-बूटी खनिज आदि) हो, उसका भूतापस्मार आदि रोगों में व्याघ्रचर्म पर बैठकर एक अयुत आहुति तिलों से देनी चाहिये। इससे भूतादि उसी समय भाग जाते हैं तथा उस ओर झाँकते भी नहीं हैं॥ ७-१२॥

कृष्णाष्टमीं समारभ्य यावत्स्यात्तच्चतुर्दशी। तिलैस्तण्डुलसम्मिश्रैर्मधुरत्रयलोलितैः॥ १३॥
त्रिसहस्रं प्रतिदिनं जुहुयात्संस्कृतेऽनले। वटुकेश्वरमभ्यर्च्य भक्ष्यभोज्यफलान्वितम्॥ १४॥
नित्यं निवेद्य नैवेद्यं मध्यरात्रे बलिं हरेत्। एवं जपित्वा प्रयतः सहस्राण्येकविंशतिम्॥ १५॥
समाप्तिदिवसे रात्रावजं हुत्वा बलिं हरेत्। ततः कारयिता राजा तोषयेत्साधकं धनैः॥ १६॥
विधिनानेन सन्तुष्टो वटुकेशः प्रयच्छति। तेजो बलं यशः पुत्रान्कान्तिं लक्ष्मीमरोगताम्॥ १७॥
नश्यन्ति शत्रवः सर्वे वर्द्धन्ते बन्धुबान्धवाः। अवग्रहो न जायेत विषये तस्य भूपतेः॥ १८॥

कृष्णपक्ष की अष्टमी से कृष्णचतुर्दशी-पर्यन्त तिल, चावल तथा मधुरत्रय (गुड़, गुग्गुलु, मधु) के साथ प्रतिदिन तीन सहस्र होम करे तथा वटुकेश्वर की पूजा करके भक्ष्य-भोज्य एवं फलों का नैवेद्य समर्पित कर मध्य रात्रि में बलिदान कर मूल मन्त्र का जप इक्कीस सहस्र की सङ्ख्या में करे। समाप्ति दिवस पर अज (तीन साल पुराना अनाज = जौ) का होम कर बलिदान करे। ऐसा करने पर राजा उस साधक को धन-सम्पत्ति आदि देकर सन्तुष्ट करता है। इस विधान से सन्तुष्ट होकर वटुकभैरव साधक को तेज, यश, पुत्र, कान्ति, लक्ष्मी, आरोग्यता आदि देते हैं। साधक के सभी शत्रु नष्ट हो जाते हैं तथा उसके बन्धु-बान्धव एवं मित्र बढ़ जाते हैं; साथ ही उसके विषय में शासक के मन में कोई अवग्रह (विद्वेष भावना) नहीं रहता है॥ १३-१८॥

जुहुयात्केवलैर्लोणैरयुतं स्तम्भनेच्छया। निविडादिविमोक्षाय प्रयोगोऽयमुदाहृतः॥ १९॥
वचाचूर्णपलं जप्तं गव्येनाज्येन लोलितम्। विभज्य भक्षयेद्वन्ध्या मण्डलात्पुत्रकाङ्क्षिणी॥ २०॥
विनीतं पुत्रमाप्नोति मेधारोग्यबलान्वितम्। आदावन्ते प्रयोगस्य वटुकाय बलिं हरेत्॥ २१॥

शत्रु के स्तम्भन की इच्छा से केवल लवण की अयुत सङ्ख्या में आहुति देनी चाहिये। शत्रु का घेरा तोड़ने के लिये यह प्रयोग बताया गया है। इस मन्त्र को जपने के उपरान्त वचा (मीठी वच) का चूर्ण एक पल (५० ग्राम) की मात्रा में लेकर गोघृत में सानकर उसके चालीस समान भागों में विभाजित कर रख ले। प्रतिदिन एक भाग का सेवन करने से पुत्र की चाहना वाली वन्ध्या स्त्री बुद्धिमान्, स्वस्थ तथा विनीत पुत्र को प्राप्त करती है। इस प्रयोग के आदि एवं अन्त में श्री वटुकभैरव को बलि देनी चाहिये॥ १९-२१॥

द्विविधो बलिराख्यातो राजसः सात्त्विको बुधैः। राजसो मांसरक्ताढ्यः पलत्रयसमन्वितः॥ २२॥
मुद्गपायससंयुक्तो मधुरत्रयलोलितः। सात्त्विको मांसरहितः शेषमन्यत्पुरोक्तवत्॥ २३॥
ब्राह्मणो विनयः शुद्धः सात्त्विकं बलिमाहरेत्।

बलिदान के भेद—विद्वानों ने दो प्रकार का बलिदान कहा है—१. राजस तथा २. सात्विक। राजस बलि मांस एवं रक्त से युक्त होती है तथा इसका प्रमाण १५० ग्राम (एक सौ पचास ग्राम) होना चाहिये। मूँग, खीर तथा मधुरत्रय मिलाकर सात्विक बलि दी जाती है। सात्विक बलि मांसरहित होती है। शेष यदि कोई विशेष बात है तो वह पूर्व में यथास्थान लिख दी गई है। ब्राह्मण को शुद्ध एवं विनीत भाव से सात्विक बलि देनी चाहिये॥ २२-२३॥

साधयेन्मनुनानेन भस्म सर्वार्थसिद्धिदम्॥ २४॥
उशीरं चन्दनं कोष्ठं घनसारं सकुङ्कुमम्। श्वेतार्कमूलं वाराही लक्ष्मीक्षीरमहीरुहम्॥ २५॥
त्वचो बिल्वतरोर्मूलं शोषयित्वा सुचूर्णये। चूर्णं व्योम्नि गृहे तेन गोमयेन विमिश्रितम्॥ २६॥
कृत्वा पिण्डानि संशोध्य संस्कृते हव्यवाहने। मूलेन दग्ध्वा तद्भस्म शुद्धपात्रे विनिक्षिपेत्॥ २७॥
केतकीमालतीपुष्पैर्वासयेद्भस्म शोधितम्। अयुतं प्रजपेन्मन्त्रं स्पृष्ट्वा भस्म सुपूजितम्॥ २८॥
एतदादाय दिनशः प्रातः पुण्ड्रं करोति यः। तस्य रोगाः प्रणश्यन्ति कृत्याद्रोहमहाग्रहाः॥ २९॥
रिपुचौरमृगादिभ्यो भयमस्य न जायते। वर्द्धन्ते सम्पदः सर्वाः पूज्यते सकलैर्जनैः॥ ३०॥
राजा वश्यो भवेत्तस्य सामात्यः सपरिच्छदः।

चमत्कारी भस्म त्रिपुण्ड्र बनाने की विधि—मनुष्य को चाहिये कि वह आगे वर्णित विधि के अनुसार भस्म का निर्माण करे; यह सर्वार्थसिद्धिप्रद भस्म होता है। उशीर (गण्डदूर्वा=खस), चन्दन सफेद, चन्दन लाल, कूठ, घनसार (अगर), केसर, सफेद आक की जड़, वाराही कन्द, लक्ष्मी (श्वेत तुलसी), गूलर की छाल, सागौनकाष्ठ, बेल के जड़ की छाल—इन सबको सुखा करके चूर्ण बना ले। इस चूर्ण के साथ अभ्रक का चूर्ण भी मिला दे, फिर इसमें गाय का गोबर मिलाकर उसके पिण्ड बनाकर सुखा ले। आपदुद्धारक वटुकभैरव के मूल मन्त्र को जपते हुए इन पिण्डों को अग्नि में जला दे। उस राख को शुद्ध पात्र में रखकर उसमें केतकी तथा मालती के पुष्पों के स्वरस की भावना दे। फिर उस पवित्र भस्म को स्पर्श करते हुए अयुत सङ्ख्या में सिद्ध मन्त्र का जप करे। इस भस्म को लाकर जो प्रतिदिन स्नानोपरान्त प्रातःकाल पुण्ड्र के रूप में धारण करता है, उसको रोग, कृत्या (मूठ) द्रोह, महाग्रह, शत्रु, चोर, डाकू, हिंसक पशुओं आदि का भय नहीं होता। उसकी सभी सम्पत्तियाँ बढ़ती हैं तथा सभी लोगों से वह पूजा जाता है। उसके वश में शासक एवं मन्त्री आदि सभी हो जाते हैं॥ २४-३०॥

अभिषेकं प्रकुर्वीत राज्ञो विजयकाङ्क्षिणः॥ ३१॥
पूर्वोक्तमण्डपे क्लृप्ते वितानध्वजशोभिते। सर्वतोभद्रमालिख्य कर्णिकां तस्य पूरयेत्॥ ३२॥
अष्टद्रोणप्रमाणेन शालिभिः शोधितैः शुभैः। तदर्द्धां तण्डुलांस्तस्मिन्न्यस्य दूर्वाङ्कुरान्वितान्॥ ३३॥
हेमादिविहितं कुम्भं नवरत्नसमन्वितम्। संस्थाप्य विमलैस्तोयैरापूयास्मिन्विनिःक्षिपेत्॥ ३४॥
क्षीरद्रुमप्रवालानि लक्ष्मीदूर्वां सहां पुनः। कर्पूरं चन्दनं बिल्वमुशीरं कुङ्कुमं पुनः॥ ३५॥
कङ्कोलमगुरुं जातिं मल्लिकां चम्पकोत्पलैः। गोमेदं दाडिमं पश्चात्पट्टयुग्मेन वेष्टयेत्॥ ३६॥

तस्मिन्नावाह्य वटुकं राजसं सम्प्रपूजयेत्। बहिरष्टसु कुम्भेषु भैरवानष्ट पूजयेत्॥ ३७॥
त्रयोदशसु कुम्भेषु त्रयोदश गणान्यजेत्। बाह्ये दशसु कुम्भेषु लोकेशानर्चयेत्सुधीः॥ ३८॥
तद्बहिर्द्व्यष्टकुम्भेषु श्रीकण्ठादीन्सुरेश्वरान्। पञ्चत्रिंशद्वटेष्वर्चेत्कादिवर्णेश्वरान् क्रमात्॥ ३९॥
इति गन्धादिभिः सम्यक् पञ्चावरणमर्चयेत्। अयुतं प्रजपेत्स्पृष्ट्वा तान्घटान्देशिकोत्तमः॥ ४०॥
पायसैः सर्पिषा शुद्धैः तिलैर्दशशतं पृथक्। जुहुयात्तान्घटान्स्पृष्ट्वा प्रत्यहं बलिमाहरेत्॥ ४१॥
राजसोक्तप्रकारेण रात्रौ देशिकसत्तमः।

राज्याभिषेक-विधि—पूर्वोक्त (पद्धतिकाण्ड में वर्णित) विधि से वितानध्वजशोभित मण्डप बनाकर उसमें सर्वतोभद्रमण्डल की रचना करे। उसकी कर्णिका में आठ द्रोण प्रमाण में शुद्ध चावल पूरित करे अथवा चार द्रोण की तौल में चावलों को दूर्वाङ्कुर कर्णिका पूरित करे। उस पर स्वर्णादि धातु तथा नवरत्नयुक्त कलश को निर्मल जल से पूरित कर रखे। कलश में क्षीरीवृक्षों के पत्ते, तुलसी, दूर्वा, कपूर, चन्दन, बेल, उशीर, केसर, कङ्कोल, अगर, मल्लिका, चम्पा, कमल—इनके फूल, गोमेद तथा अनार डाले। फिर उस कलश को एक जोड़ी वस्त्रों से लपेट दे। उस कलश के बाहर राजस वटुक की पूजा करे। बाहर के आठ कुम्भों पर आठ भैरवों की पूजा करे। इसी प्रकार तेरह कुम्भों पर तेरह गणों की पूजा करे। फिर बाहर के दश कुम्भों पर लोकपालों की पूजा करे। उनके बाहर के आठ कलशों पर श्रीकण्ठादि देवताओं तथा पैंतीस वटेश्वरों की पूजा आदि वर्णों से क्रमशः करे। इस प्रकार पाँच आवरणों में गन्धादि से पूजन करे। श्रेष्ठ आचार्य को उन घटों का स्पर्श करके अयुत की सङ्ख्या में जप करना चाहिये। पायस तथा शुद्ध तिलों से एक सहस्र आहुतियाँ देकर फिर उन घटों को बलि प्रदान करे। ऐसा प्रतिदिन करे। यह बलि राजस विधान से करनी चाहिये॥ ३१-४१॥

सुदिने शोभने लग्ने वाचयित्वा द्विजन्मभिः॥ ४२॥
स्वस्तिमङ्गलवाक्यानि विशुद्धैर्वेदपारगैः। नदत्सु पञ्चवाद्येषु प्रणम्य वटुकेश्वरम्॥ ४३॥
जितेन्द्रियं शुद्धकायं राजानं ब्राह्मणप्रियम्। आस्तिकं सत्यवचनमभिषिञ्चेत्प्रसन्नधीः॥ ४४॥
अभिषिक्तो नरपतिः प्रणिपत्य गुरुं परम्। भूयसीं दक्षिणां दद्यात्प्रसीदति यथा गुरुः॥ ४५॥
राजाभिषिक्तो भवति साक्षाद्भूमिपुरन्दरः। परान् विजयते भूपान्स्तूयते सकलैर्नरैः॥ ४६॥
कृताभिषेकः षण्मासं प्रतिमासं महीपतिः। चतुरम्भोधिवेलायां शास्ति सर्वां वसुन्धराम्॥ ४७॥

फिर शुभ दिन शुभ लग्न में ब्राह्मणों द्वारा स्वस्तिवाचन, मङ्गलवाक्य का पाठ कराते हुए पाँच प्रकार के वाद्यों को बजाते हुए वटुकेश्वर को प्रणाम करके जितेन्द्रिय, शुद्ध शरीर तथा ब्राह्मणों को प्रिय हो—ऐसे सत्यवादी तथा निर्मल बुद्धि राजा का अभिषेक करना चाहिये। अभिषेक के उपरान्त उस राजा को अपने गुरु (आचार्य) को प्रणाम करके पुष्कल दक्षिणा देनी चाहिये, जिससे गुरु प्रसन्न हो जायँ। इस प्रकार से जिस राजा का अभिषेक होता है, वह इन्द्र के समान होकर दूसरे राजाओं को जीत लेता है तथा लोकप्रिय हो जाता है। इस प्रकार से प्रतिमास अभिषेक होने पर वह शासक समुद्र-पर्यन्त भूमि पर अपना शासन करता है॥ ४२-४७॥

गजाश्वशान्तिविधये तेषां शालासु साधकः। कुण्डं कृत्वा विधानेन होमं कुर्याद्यथाविधि॥ ४८॥
पायसाज्यैस्तिलैर्विद्वानयुतत्रितयावधि। ब्राह्मणान्भोजयेन्नित्यं भक्ष्यभोज्यफलादिभिः॥ ४९॥
प्राक्प्रोक्तविधिना कुम्भान् स्थापयित्वात्र देशिकः। अभ्यर्च्य गन्धपुष्पाद्यैस्तज्जलैः प्रोक्षयेद्गजान्॥ ५०॥

अश्वशालामनेनैव वर्द्धन्ते ते दिने-दिने। युद्धेषु महती शक्तिर्जायते पूर्वतोऽधिका॥५१॥
सर्वे रोगाः प्रणश्यन्ति कृत्याद्रोहाः परैः कृताः। अस्मात्परतरा रक्षा नास्ति तेषां महीतले॥५२॥

गजाश्वादि शान्ति-विधान—गजाश्वादि की शान्ति के लिये उनकी शालाओं में कुण्ड बनाकर विधिपूर्वक होम करना चाहिये। पायस, गोघृत आदि से तीन अयुत (३० सहस्र) की सङ्ख्या में होम करे। पूर्वोक्त विधि से कुम्भों को स्थापित कर उनके गन्धाक्षत पत्रयुक्त जल से हाथी, घोड़ों का प्रोक्षण करना चाहिये। इससे वे प्रतिदिन वृद्धि को प्राप्त होते हैं। युद्धों में पूर्वापेक्षया अधिक शक्ति प्रकट होती है। सभी रोग नष्ट होते हैं तथा कृत्याद्रोह एवं परकृत अभिचार नष्ट होते हैं। हाथी, घोड़ों की इस विधि से उत्तम रक्षा होती है; अन्य कोई दूसरा उपाय इस पृथ्वीतल पर नहीं है॥ ४८-५२॥

अभिषिच्य महीपालं गरेषां विजयोद्यतम्। उक्तेन विधिना मन्त्री यामिन्यां बलिमाहरेत्॥५३॥
अन्यूनाङ्गमजं हत्वा राजसं प्रागुदाहृतम्। बलिप्रदानसमये रिपूणां सर्वसैन्यकम्॥५४॥
निवेदयेद्बलित्वेन वटुकाय विशिष्टधीः। विदर्भयेच्छत्रुनाम्ना बलिमन्त्रं तथा सुधीः॥५५॥
शत्रुपक्षस्य रुधिरं पिशितं च दिने दिने। भक्षयस्व गणैः सार्द्धं सारमेयमसमन्वितः॥५६॥
बलिमन्त्रोऽयमाख्यातः सर्वेषां विजयप्रदः। अनेन बलिना हृष्टो वटुकः परसैन्यकम्॥५७॥
सर्वं गणेभ्यो विभजेदामिषं क्रुद्धमानसः। एवं कृते परबलं क्षीयते नात्र संशयः।
विजयश्रियमेतेन राजा प्राप्नोत्ययत्नतः॥५८॥

बलिविधान—जो राजा दूसरों पर विजय प्राप्त करना चाहता हो, वह उक्त विधि से अभिषेक को करके रात्रि में बलिदान करे। सर्वाङ्गपूर्ण बकरे का बलिदान करे। बलिदान के समय पर वटुकभैरव से इस प्रकार निवेदन करे—हे देव! शत्रु एवं उनकी सेना का प्रतिदिन उन्मूलन करते हुए उनका रक्तपान करो। अमुक नाम के शत्रु का दलन करो। अपने गणों सारमेयों के साथ प्रतिदिन उनका भक्षण करो।


यह बलिदान मन्त्र सभी को विजय देने वाला है। इस बलि से प्रसन्न होकर वटुकभैरव शत्रुसेना को फाड़कर उसकी बोटी-बोटी अलग कर देते हैं। इस प्रकार से शत्रु का बल निश्चित रूप से क्षीण हो जाता है। इससे बिना प्रयास राजा विजयी हो जाता है॥ ५३-५८॥

श्रीमायास्मरकूटमत्र विलिखेन्मध्ये दलेष्वष्टसु द्विः प्रोक्तं वटुकाय शब्दमपरान्मन्त्रस्य वर्णान् बहिः।
अष्टद्वन्द्वदलेषु तद्बहिरधस्तत्सङ्ख्यपत्रेष्वथ द्वात्रिंशद्दलकादिसान्तसहितं यन्त्रं लिखेद्भूपुरे॥५९॥
आपदुद्धारणं यन्त्रमपमृत्युभयापहम्। सर्वसम्पत्प्रदं नित्यं सर्वसौभाग्यदायकम्॥६०॥
रक्षाकरं ग्रहार्तानां राज्ञां विजयवर्द्धनम्। आपदुद्धारणादस्मादापदुद्धारणक्षमः ॥६१॥
तन्त्रेषु नास्ति मन्त्रोऽस्य इत्याहुर्मन्त्रवेदिनः।

इति रुद्रयामलशारदातिलकोक्तमापदुद्धारणवटुकभैरवविधानम्।

आपदुद्धारण यन्त्र-विधान—अष्टदल के मध्य में श्री मायास्मर कूट का लेखन करना चाहिये (चित्र देखें)। इसके बाहर बत्तीस अक्षरों (मन्त्राक्षरों को) दलों में लिखे। यह आपदुद्धारण वटुकभैरव यन्त्र मृत्यु एवं भय को दूर करने वाला है। यह नित्यप्रति सभी प्रकार की सम्पत्ति बढ़ाने वाला है। यह सभी प्रकार के सौभाग्य को देता है। यह ग्रहों से पीड़ितों की रक्षा करता है तथा राजाओं को विजय देता है। इस यन्त्र से बढ़कर अन्य कोई उपाय आपदाओं को दूर करने वाला नहीं है—ऐसा तन्त्रविदों का मन्तव्य है॥ ५९-६२॥

श्रीवटुकभैरवयन्त्रम्



विशेष—इसके पूर्व में बड़ा चित्र दिया गया है, उसमें यन्त्र का स्वरूप स्पष्ट है। आवश्यकतानुसार उसका उपयोग करे। यहाँ दिया गया चित्र सामान्य है।

वटुकभैरवब्रह्मकवचम्

अथ वटुकभैरवब्रह्मकवचं रुद्रयामले—

श्रीदेव्युवाच—

भगवन् सर्ववेत्ता त्वं देवानां प्रीतिदायकम्। भैरवं कवचं ब्रूहि यदि चास्ति कृपा मयि॥ १॥
प्राणत्यागं करिष्यामि यदि नो कथयिष्यति। सत्यं सत्यं पुनः सत्यं सत्यमेव न संशयः॥ २॥
इत्थं देव्या वचः श्रुत्वा प्रहस्याति स्वयं प्रभुः। उवाच वचनं तत्र देवदेवो महेश्वरः॥ ३॥

वटुकभैरव ब्रह्मकवच (रुद्रयामलोक्त)—श्री देवी ने कहा—भगवन्! आप सर्वज्ञ तथा देवों के प्रिय हैं; अतः आप यदि मुझ पर कृपा करें तो मुझे भैरवकवच सुनायें। यदि आप इस कवच को नहीं सुनायेंगे तो मैं प्राणत्याग कर दूँगी। यह मैं बार-बार सत्य कह रही हूँ; इसमें सन्देह नहीं है। देवी के इस प्रकार के वचन सुनकर स्वयं श्री शङ्कर भगवान् जोर से हंस पड़े तथा उन्होंने इस प्रकार के वचन कहे॥ १-३॥

ईश्वर उवाच—

वटुकस्य कवचं दिव्यं शृणु यत्प्राणल्लभे। चण्डिकातन्त्रसर्वस्वं वटुकस्य विशेषतः॥ ४॥
तत्र मन्त्राद्यक्षरं तु वासुदेवस्वरूपकम्। शङ्खवर्णद्वयो ब्रह्मा वटुकं चन्द्रशेखरः॥ ५॥
आपदुद्धारणो देवो भैरवः परिकीर्तितः। प्रवक्ष्यामि समासेन चतुर्वर्गप्रसिद्धये॥ ६॥

चाहिये। जैसे या तो प्रत्येक अङ्गुष्ठ प्रमाण का बने, यदि अधिक नाप का बनता है तो सभी लिङ्ग उस नाप के बनाने चाहिये तथा एक बित्ती से अधिक मान पार्थिव लिङ्ग का नहीं रखना चाहिये।

लिङ्गमाहात्म्यं नन्दिभविष्ययोः—

आयुष्मान्बलवाञ्छ्रीमान्पुत्रवान्धनवान्सुखी । वरमिष्टं लभेल्लिङ्गं पार्थिवं यः समाचरेत्॥

मृद्भस्मगोशकृत्पिण्डं ताम्रकांस्यमयं तथा। कृत्वा लिङ्गं सकृत्पूज्य वसेत्कल्पायुतं दिवि॥

इति पार्थिवलिङ्गपूजनप्रयोगः समाप्तः।

नन्दीश्वर तथा **भविष्यपुराण** के अनुसार—जो पार्थिव लिङ्ग बनाकर अर्चना करता है, वह आयुष्मान्, श्रीमान्, बलवान्, पुत्रवान्, धनवान् तथा सुखी होता है एवं मनोवाञ्छित फल प्राप्त करता है। जो मिट्टी, भस्म, गोबर, ताम्र, कांस्यमय लिङ्ग बनाकर पूजा करता है, वह अयुत कल्प-पर्यन्त स्वर्ग में निवास करता है।

दक्षिणामूर्तिशिवमन्त्रपुरश्चरणम्

शारदातिलके मूलमन्त्रो यथा—

ॐ ह्रीं दक्षिणामूर्त्तये तुभ्यं वटमूलनिवासिने। ध्यानैकनिरताङ्गाय नमो रुद्राय शम्भवे ह्रीं ॐ॥

षट्त्रिंशदक्षरो मन्त्रः सर्वकामफलप्रदः। अस्य श्रीदक्षिणामूर्तिशम्भुमन्त्रस्य शुकऋषिः। अनुष्टुप्छन्दः। दक्षिणामूर्तिशम्भुर्देवता। सर्वेष्टसिद्ध्यर्थे जपे विनियोगः। ॐ शुकऋषये नमः शिरसि॥ १ ॥ ॐ अनुष्टुपछन्दसे नमः मुखे॥ २॥ ॐ दक्षिणामूर्तिशम्भुर्देवतायै नमः हृदये॥ ३॥ इति ऋष्यादिन्यासः। ॐ ह्रीं दक्षिणामूर्तये ह्रीं अङ्गुष्ठाभ्यां नमः॥ १॥ ॐ ह्रीं तुभ्यं ह्रीं तर्जनीभ्यां नमः॥ २॥ ॐ ह्रीं वटमूलनिवासिने ह्रीं मध्यमाभ्यां नमः॥ ३॥ ॐ ह्रीं ध्यानैकनिरताङ्गाय ह्रीं अनामिकाभ्यां नमः॥ ४॥ ॐ ह्रीं नमो रुद्राय ह्रीं कनिष्ठिकाभ्यां नमः॥ ५॥ ॐ ह्रीं शम्भवे ह्रीं करतलकरपृष्ठाभ्यां नमः॥ ६॥ इति करन्यासः। एवं हृदयादिन्यासं कृत्वा अङ्गन्यासं कुर्यात्। ॐ ह्रीं नमः मूर्ध्नि॥ १॥ ॐ दं नमः भाले॥ २॥ ॐ क्षिं नमः नेत्रयोः॥ ३॥ ॐ णां नमः श्रोत्रयोः॥ ४॥ ॐ मूं नमः गण्डयोः॥ ५॥ ॐ र्तं नमः नासिकयोः॥ ६॥ ॐ यं नमः मुखे॥ ७॥ ॐ तुं नमः दक्षिणबाहुमूले॥ ८॥ ॐ भ्यं नमः दक्षिणकूर्परे॥ ९॥ ॐ वं नमः दक्षिणमणिबन्धे॥ १०॥ ॐ टं नमः दक्षिणहस्ताङ्गुलीमूले॥ ११॥ ॐ मूं नमः दक्षहस्ताङ्गुल्यग्रे॥ १२॥ ॐ लं नमः वामबाहुमूले॥ १२॥ ॐ निं नमः वामकूर्परे॥ १४॥ ॐ वां नमः वाममणिबन्धे॥ १५॥ ॐ सिं नमः वामहस्ताङ्गुलीमूले॥ १६॥ ॐ नें नमः वामहस्ताङ्गुल्यग्रे॥ १७॥ ॐ ध्यां नमः गले॥ १८॥ ॐ नैं नमः स्तनयोः॥ १९॥ ॐ कं नमः हृदये॥ २०॥ ॐ निं नमः नाभिमण्डले॥ २१॥ ॐ रं नमः कट्योः॥ २२॥ ॐ तां नमः गुह्ये॥ २३॥ ॐ गां नमः दक्षपादमूले॥ २४॥ ॐ यं नमः दक्षिणजानुनि॥ २५॥ ॐ नं नमः दक्षिणगुल्फे॥ २६॥ ॐ मं नमः दक्षपादाङ्गुलीमूले॥ २७॥ ॐ रुं नमः दक्षपादाङ्गुल्यग्रे॥ २८॥ ॐ द्रां नमः वामपादमूले॥ २९॥ ॐ यं नमः वामजानुनि॥ ३०॥ ॐ शं नमः वामगुल्फे॥ ३१॥ ॐ भं नमः वामपादाङ्गुलीमूले॥ ३२॥ ॐ वें नमः वामपादाङ्गुल्यग्रे॥ ३३॥ ॐ ह्रीं नमः इति व्यापकेन सर्वाङ्गे न्यसेत्॥ ३४॥ एवमङ्गन्यासं कृत्वा ध्यायेत्—

हेमाचलतटे रम्ये सिद्धकिन्नरसेविते। विविधद्रुमशाखाभिः सर्वतोवारितातपे॥

सुपुष्पितैर्लताजालैराश्लिष्टकुसुमद्रुमैः । शिलाविवरनिर्गच्छन्निर्झरानिलसेविते ॥

गायद्भृङ्गाङ्गनासङ्घे नृत्यद्बर्हिकदम्बके। कूजत्कोकिलसङ्घेन मुखरीतकृदिङ्मुखे॥

परस्परविनिर्मुक्तमात्सर्यमृगसेविते । आद्यैः शुकाद्यैर्मुनिभिरजस्त्रं समुपस्थितम्॥

पुरन्दरमुखैर्देवैः सेवायातैर्विलोकितम्। वटवृक्षं महोच्छ्रायं पद्मरागफलोज्ज्वलम्॥

गारुत्मतमयैः पत्रैर्निबिडैरुपशोभितम्। नवरत्नमयाकल्पैर्लम्बमानैरलङ्कृतम् ॥
स्थलजैर्जलजैः पुष्पैरामोदितमलङ्कृतम्। शृण्वद्भिर्वेदशास्त्राणि शुकवृन्दैर्निषेवितम्॥
संसारतापविच्छेदकुशलच्छायमद्भुतम् । विचिन्त्य तस्य मूलस्थे रत्नसिंहासने शुभे॥
आसीनममिताकल्पं शरच्चन्द्रनिभाननम्। स्तूयमानं मुनिगणैर्दिव्यज्ञानाभिलाषिभिः॥
संस्मरेज्जगतामाद्यं दक्षिणामूर्तिमव्ययम्।

इति विचिन्त्य—

कैलासाद्रिनिभं शशाङ्कशकलस्फूर्जज्जटामण्डितं नासालोकनतत्परं त्रिनयनं वीरासनाध्यासितम्।
मुद्राटङ्ककुरङ्गजानुविलसत्पाणिं प्रसन्नाननं कक्षाबद्धभुजङ्गमं मुनिवृतं वन्दे महेशं परम्॥

इति ध्यायेत्। एवं धात्वा पूर्वोक्ते शिवपञ्चाक्षरोदिते पीठे पाद्याद्यैः षोडशोपचारैर्यथाविधि दक्षिणामूर्त्याख्यं शिवं सम्पूज्य जपं कुर्य्यात्। अस्य मन्त्रस्य सिद्ध्यर्थं विंशतिसहस्राधिकं लक्षत्रयात्मकं जपपुरश्चरणं कार्यम्। ततो जपान्ते दशांशेन क्षीरसंयुतैः शुद्धैस्तिलैर्होमं कृत्वा तत्तदशांशेन तर्पणमार्जनब्राह्मणभोजनानि कुर्यात्।

तथा च शारदातिलके—

अयुतद्वयसंयुक्तं गुणलक्षं जपेन्मनुम्। तद्दशांशं तिलैः शुद्धैर्जुहुयात्क्षीरसंयुतैः॥
एवं कृतपुरश्चर्यः सिद्धमन्त्रो भवेत्सुधीः। भिक्षाहारो जपेन्मासं मनुमेनं जितेन्द्रियः॥
नित्यं सहस्रमष्टार्द्धं परं विन्दति वाङ्मयम्। त्रिवारं जप्तमेतेन मनुना सलिलं पिबेत्॥
नित्यशो दक्षिणामूर्तिं ध्यायन्साधकसत्तमः। शास्त्रव्याख्यानसामर्थ्यं लभते वत्सरान्तरे॥
ब्राह्मीसैन्धवसिद्धार्थवचाकुष्ठकणोत्पलैः । सुगन्धिसंयुतैः कल्कैः शृतं ब्राह्मीरसे घृतम्॥
मनुनानेन सञ्जप्तमयुतं साधु साधितम्। निपीतं कविताकान्तिरक्षायुःश्रीधृतिप्रदम्॥

इति दक्षिणामूर्तिशिवमन्त्रपुरश्चरणं समाप्तम्।

श्री दक्षिणामूर्ति शिवमन्त्र का पुरश्चरण—'दक्षिणा अनुकूला मूर्ति यस्य स दक्षिणामूर्तिः' अर्थात् शिव की जो मूर्ति साधकों के लिये सर्वाधिक अनुकूल एवं शीघ्र फलप्रद हो, उसे दक्षिणामूर्ति कहते हैं। दक्षिणामूर्ति शिव की आराधना दक्षिण भारत में अधिक होती है।

दक्षिणामूर्ति मन्त्र (प्रथम)—'ॐ ह्रीं दक्षिणामूर्त्तये तुभ्यं वटमूलनिवासिने ध्यानैकनिरताङ्गाय नमो रुद्राय शम्भवे ह्रीं ॐ।' यह छत्तीस अक्षरों का मन्त्र है, जो सभी कामनाओं को पूर्ण करने वाला है।

विनियोग—अस्य श्रीदक्षिणामूर्तिशम्भुमन्त्रस्य शुकऋषिः अनुष्टुप् छन्दः, दक्षिणामूर्तिशम्भुर्देवता सर्वेष्टसिद्ध्यर्थे जपे विनियोगः' कहकर विनियोग का जल छोड़ना चाहिये।

ऋष्यादिन्यास मूल में लिखे 'ॐ शुकऋषये नमः शिरसि' इत्यादि तीन मन्त्रों से करे। फिर मूलोक्त 'ॐ ह्रीं दक्षिणामूर्त्तये ह्रीं अङ्गुष्ठाभ्यां नमः' इत्यादि छः मन्त्रों से करन्यास करे। इन्हीं छः मन्त्रों से हृदयादि न्यास भी कर ले। फिर 'ॐ ह्रीं नमः मूर्ध्नि' इत्यादि मूलपाठ में लिखित चौंतीस मन्त्रों से शरीर के विभिन्न अङ्गों में न्यास करे। फिर देव का इस प्रकार ध्यान करे—

हेमाचल पर्वत के रम्य तट पर सिद्ध तथा किन्नरों से सेवित, विविध वृक्षों की शाखाओं से जहाँ वर्षा एवं घाम का निवारण होता है, जहाँ सुपुष्पित लताजालों से पुष्प वाले वृक्ष वेष्टित हैं, जहाँ शिलाविवरों से झरने निकलते हैं, जिनके स्पर्श से शीतल वायु के प्रवाह का सेवन होता है, जहाँ पर भृङ्गों की अङ्गनायें गाती हैं तथा मयूर नाचते हैं,

इस कवच को शान्त, प्रियवक्ता, कार्पण्य दोष से रहित, वटुक-भक्ति में रत पुत्र अथवा शिष्य को ही प्रदान करना चाहिये। निश्चित ही यह कवच शीघ्रातिशीघ्र उपराग प्रदान करने वाला है। यह कवच आयु, विद्या, यश, धर्म एवं बल प्रदान करने वाला है। हे देवि! इस प्रकार तुमसे मैंने यह कवच कहा, इसे अपनी योनि के समान गुप्त रखना चाहिये॥ २२-३२॥

वटुकभैरवस्तवराजः

अथ वटुकभैरवस्तवराजो लिख्यते; रुद्रयामले—

मेरुपृष्ठे सुखासीनं देवदेवं त्रिलोचनम्। शङ्करं परिपप्रच्छ पार्वती परमेश्वरम्॥

(रुद्रयामलोक्त) **वटुकभैरवस्तवराज**—एक बार जब भगवान् देवाधिदेव त्रिलोचन शङ्कर मेरुपर्वत पर बैठे हुए थे तब श्री पार्वती ने उन परमेश्वर से इस प्रकार पूछा।

श्रीपार्वत्युवाच—

य एष भैरवो नाम आपदुद्धारको मतः। त्वया च कथितो देव भैरवः कल्प उत्तमः॥
तस्य नामसहस्राणि प्रयुतान्यर्बुदानि च। सारमुद्धृत्य तेषां वै नामाष्टशतकं वद॥
यानि सङ्कीर्तयन्मर्त्यः सर्वदुःखविवर्जितः। सर्वान्कामानवाप्नोति साधकः सिद्धिमेव च॥

अभी आपने आपदुद्धारक जिन भैरव का उत्तम कल्प कहा है, उसके नाम सहस्रों, प्रयुतों, अर्बुदों की सङ्ख्या में हैं; अतः उनके सारस्वरूप केवल एक सौ आठ नामों को कहो, जिनके जपने से मनुष्य सभी दुःखों से मुक्त हो जाता है एवं जिनके जपने से साधक की सभी कामनाएँ पूर्ण हो जाती हैं।

ईश्वर उवाच—

शृणु देवि प्रवक्ष्यामि भैरवस्य महात्मनः। आपदुद्धारणस्येह नामाष्टशतमुत्तमम्॥
सर्वपापहरं पुण्यं सर्वापद्विनिवारणम्। सर्वकामार्थदं देवि साधकानां सुखावहम्॥
सर्वमङ्गलमाङ्गल्यं सर्वोपद्रवनाशनम्। आयुःकरं पुष्टिकरं श्रीकरं च यशस्करम्॥

श्री शङ्कर ने कहा—हे देवि! अब मैं आपदुद्धारक भैरव के एक सौ आठ नाम कहता हूँ, जो कि सर्वपापनाशक, पुण्यप्रद, सभी आपदाओं के निवारक, सभी काम तथा अर्थों को देने वाले तथा साधकों के लिये सुखप्रद हैं। ये सभी मङ्गलों के भी मङ्गल हैं तथा सभी उपद्रवों के नाशक हैं। साथ ही आयुकारक, पुष्टिकारक, लक्ष्मीकारक तथा यशस्कर हैं।

तत्र प्रयोगः—ॐ अस्य श्रीवटुकभैरवनामाष्टशतस्तोत्रमन्त्रस्य बृहदारण्यक ऋषिः। अनुष्टुप् छन्दः। श्रीवटुकभैरवो देवता। अष्टबाहुमिति बीजम्। त्रिनयनमिति शक्तिः। प्रणवः कीलकम्। ममाभीष्टसिद्ध्यर्थे जपे विनियोगः। ॐ बृहदारण्यकऋषये नमः शिरसि॥ १॥ ॐ अनुष्टुपछन्दसे नमः मुखे॥ २॥ ॐ श्रीवटुकभैरवदेवतायै नमः हृदये॥ ३॥ ॐ अष्टबाहुमिति बीजाय नमः गुह्ये॥ ४॥ ॐ त्रिनयनेति शक्तये नमः पादयोः॥ ५॥ ॐ कीलकाय नमः नाभौ॥ ६॥ ॐ विनियोगाय नमः सर्वाङ्गे॥ ७॥ इति ऋष्यादिन्यासः। ॐ ह्रां वां ईशानः सर्व विद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम् अङ्गुष्ठाभ्यां नमः॥ १॥ ॐ ह्रीं वीं तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात् तर्जनीभ्यां नमः॥ २॥ ॐ ह्रूं वूं अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः मध्यमाभ्यां नमः॥ ३॥ ॐ ह्रैं वैं वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमः बलाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो

मनोन्मनाय नमः अनामिकाभ्यां नमः॥ ४॥ ॐ ह्रौं वौं सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः। भवेभवे नातिभवे भवस्व मां भवोद्भवाय नमः कनिष्ठिकाभ्यां नमः॥ ५॥ ॐ ह्रः वः पञ्चवक्त्राय महादेवाय नमः करतलकरपृष्ठाभ्यां नमः॥ ६॥ इति करन्यासः। एवं हृदयादिन्यासं कृत्वा देहन्यासं कुर्यात्। ॐ ह्रीं भैरवाय नमः मूर्ध्नि॥ १॥ ॐ ह्रीं भीमदर्शनाय नमः ललाटे॥ २॥ ॐ ह्रीं भूताश्रयाय नमः। नेत्रयोः॥ ३॥ ॐ ह्रीं भूतनायकाय नमः कर्णयोः॥ ४॥ ॐ ह्रीं त्रिशूलाय नमः नासिकायाम्॥ ५॥ ॐ ह्रीं रक्तपाय नमः जिह्वायाम्॥ ६॥ ॐ ह्रीं नागहारनामयज्ञोपवीतिकाय नमः कण्ठमध्ये॥ ७॥ ॐ ह्रीं क्षेत्रज्ञाय नमः करयोः॥ ८॥ ॐ ह्रीं क्षेत्रपालाय नमः हृदये॥ ९॥ ॐ ह्रीं क्षेत्रदाय नमः नाभौ॥ १०॥ ॐ ह्रीं सर्वौघनाशनाय नमः कट्याम्॥ ११॥ ॐ ह्रीं त्रिनेत्राय नमः ऊर्वोः॥ १२॥ ॐ ह्रीं रक्तपायिने नमः जङ्घयोः॥ १३॥ ॐ ह्रीं देवदेवेशाय नमः पादयोः॥ १४॥ ॐ ह्रीं वटुकाय नमः सर्वाङ्गे॥ १५॥ इति देहन्यासः। ॐ ह्रीं भैरवाय नमः अङ्गुष्ठाभ्यां नमः॥ १॥ ॐ ह्रीं भीमदर्शनाय नमः तर्जनीभ्यां नमः॥ २॥ ॐ ह्रीं भूतश्रेष्ठाय नमः मध्यमाभ्यां नमः॥ ३॥ ॐ ह्रीं भूतनायकाय नमः अनामिकाभ्यां नमः॥ ४॥ ॐ ह्रीं क्षत्रियाय नमः कनिष्ठिकाभ्यां नमः॥ ५॥ ॐ ह्रीं क्षेत्रपालाय नमः करतलकरपृष्ठाभ्यां नमः॥ ६॥ ॐ ह्रीं क्षेत्रज्ञाय नमः दिग्दिशायाम्॥ ७॥ ॐ भैरवाय नमः सर्वाङ्गे॥ ८॥ इति करन्यासः। ॐ ह्रीं भैरवाय नमः शिरसि॥ १॥ ॐ ह्रीं भीमदर्शनाय नमः ललाटे॥ २॥ ॐ ह्रीं भूतहननाय नमः नेत्रयोः॥ ३॥ ॐ ह्रीं सारमेयानुगाय नमः भ्रुवोः॥ ४॥ ॐ ह्रीं भूतनाथाय नमः कर्णयोः॥ ५॥ ॐ ह्रीं प्रेतवाहकाय नमः कपोलयोः॥ ६॥ ॐ ह्रीं भस्माङ्गाय नमः नासापुटे॥ ७॥ ॐ ह्रीं सर्पभूषणाय नमः ओष्ठयोः॥ ८॥ ॐ ह्रीं आदिनाथाय नमः मुखे॥ ९॥ ह्रीं शक्तिहस्ताय नमः गले॥ १०॥ ॐ ह्रीं दैत्यशमनाय नमः स्कन्धयोः॥ ११॥ ॐ ह्रीं अतुलतेजसे नमः बाह्वोः॥ १२॥ ॐ ह्रीं कपालिने नमः करयोः॥ १३॥ ॐ ह्रीं मुण्डमालिने नमः हृदये॥ १४॥ ॐ ह्रीं शान्ताय नमः वक्षःस्थले॥ १५॥ ॐ ह्रीं कामचारिणे नमः स्तनयोः॥ १६॥ ॐ ह्रीं सदातुष्टाय नमः उदरे॥ १७॥ ॐ ह्रीं क्षेत्रेशाय नमः पार्श्वयोः॥ १८॥ ॐ ह्रीं क्षेत्रपालाय नमः पृष्ठे॥ १९॥ ॐ ह्रीं क्षेत्रज्ञाय नमः नाभौ॥ २०॥ ॐ ह्रीं पापौघनाशनाय नमः कट्याम्॥ २१॥ ॐ ह्रीं वटुकाय नमः लिङ्गे॥ २२॥ ॐ ह्रीं रक्षाकराय नमः गुदे॥ २३॥ ॐ ह्रीं रक्तलोचनाय नमः ऊर्वोः॥ २४॥ ॐ ह्रीं घुर्घुराय नमः जानुनोः॥ २५॥ ॐ ह्रीं रक्तपायिने नमः जङ्घयोः॥ २६॥ ॐ ह्रीं सिद्धपादुकाय नमः गुल्फयोः॥ २७॥ ॐ ह्रीं सुरेश्वराय नमः पादपृष्ठे॥ २८॥ ॐ ह्रीं आपदुद्धारकाय नमः आपादतलमस्तकपर्यन्तम्॥ २९॥ ॐ ह्रीं क्ष्प्रौं ब्लौं ह्रीं ॐ स्वाहा आपदुद्धारणभैरवाय नमः सर्वाङ्गे॥ ३०॥ इति व्यापकं कुर्यात्। इत्यङ्गन्यासः।

प्रयोग—इस वटुकभैरव अष्टशतनाम स्तोत्र के बृहदारण्यक ऋषि, अनुष्टुप् छन्द, श्री वटुकभैरव देवता, अष्टबाहु बीज, त्रिनयन शक्ति तथा प्रणव कीलक हैं। मैं अपने अभीष्ट-सिद्धि के लिये जपार्थ विनियोग करता हूँ। इस भावार्थ को प्रकट करने वाले विनियोग का मूल संस्कृत में पाठ करके पृथ्वी पर जल छोड़ना चाहिये।

फिर मूलपाठ में लिखित 'ॐ बृहदारण्यकऋषये नमः शिरसि' इत्यादि १ से लेकर ७ तक मन्त्रों के द्वारा ऋष्यादि न्यास करे। फिर 'ॐ ह्रां वां ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम् अङ्गुष्ठाभ्यां नमः' इत्यादि मूलोक्त छः मन्त्रों से करन्यास करे। इन्हीं मन्त्रों से हृदयादि न्यास करके 'ॐ ह्रीं भैरवाय नमः मूर्ध्नि' इत्यादि १५ मन्त्र देहादि न्यास के हैं, इनसे देहादि न्यास करे।

पुनः 'ॐ ह्रीं भैरवाय नमः अङ्गुष्ठाभ्यां नमः' इत्यादि आठ मन्त्रों से करन्यास करे। फिर 'ॐ ह्रीं भैरवाय नमः शिरसि' इत्यादि मूलपाठ में लिखित कुल तीन मन्त्रों से व्यापक करे। यह अङ्गन्यास हुआ।

अथ दिङ्न्यासः—ॐ ह्रीं डमरुहस्ताय नमः पूर्वे॥ १॥ ॐ ह्रीं दण्डधारिणे नमः दक्षिणे॥ २॥ ॐ ह्रीं खड्गहस्ताय नमः पश्चिमे॥ ३॥ ॐ ह्रीं घण्टावादिने नमः उत्तरे॥ ४॥ ॐ ह्रीं अग्निवर्णाय नमः आग्नेय्याम्॥ ५॥ ॐ ह्रीं दिगम्बराय नमः नैर्ऋत्याम्॥ ६॥ ॐ ह्रीं सर्वभूतस्थाय नमः वायव्याम्॥ ७॥ ॐ ह्रीं अष्टसिद्धिदाय नमः ऐशान्याम्॥ ८॥ ॐ ह्रीं खेचारिणे

नमः ऊर्ध्वे ॥ ९ ॥ ॐ ह्रीं रौद्ररूपिणे नमः पाताले ॥ १० ॥ इति दिङ्न्यासः। **ॐ ह्रीं रुद्राय नमः। ॐ अङ्गुष्ठाभ्यां नमः ॥ १ ॥ ॐ ह्रीं शिखीसखाय नमः ॐ तर्जनीभ्यां नमः ॥ २ ॥ ॐ ह्रीं शिवाय नमः म० ॥ ३ ॥ ॐ ह्रीं त्रिशूलिने० अना० ॥ ४ ॥ ॐ ह्रीं ब्रह्मणे० कनि० ॥ ५ ॥ ॐ ह्रीं त्रिपुरान्तकाय नमः करतलयोः ॥ ६ ॥ ॐ ह्रीं मांसाशिने० कराग्रेषु ॥ ७ ॥ ॐ ह्रीं दिगम्बराय नमः करपृष्ठयोः ॥ ८ ॥** इति करन्यासः। **ॐ ह्रीं भूतनाथाय नमः हृदये ॥ १ ॥ ॐ ह्रीं आदिनाथाय नमः मूर्ध्नि ॥ २ ॥ ॐ ह्रीं आनन्दनाथाय नमः शिखायाम् ॥ ३ ॥ ॐ ह्रीं सिद्धशावरनाथाय नमः कवचाय हुं ॥ ४ ॥ ॐ ह्रीं सहजानन्दनाथाय नमः नेत्रयोः ॥ ५ ॥ ॐ ह्रीं श्रीआनन्दनाथाय नमः अस्त्राय फट्।** इति षडङ्गन्यासः। **ॐ अस्य श्रीवटुकभैरवमन्त्रस्य बृहदारण्यक ऋषिः। अनुष्टुप् छन्दः। श्रीवटुकभैरवो देवता। वं बीजम्। ह्रीं शक्तिः। ॐ कीलकम्। श्रीवटुकभैरवप्रसादसिद्ध्यर्थे स्तोत्रादौ अष्टोत्तरशतमूलमन्त्रजपे विनियोगः।**

अथ मन्त्रन्यासः—ॐ ह्रीं अङ्गु० ॥ १ ॥ ॐ वटुकाय० तर्ज० ॥ २ ॥ ॐ आपदुद्धारणाय मध्य० ॥ ३ ॥ ॐ कुरुकुरु अना० ॥ ४ ॥ ॐ ह्रीं कनिष्ठिकाभ्यां नमः ॥ ५ ॥ एवं न्यासविधिं कृत्वा ध्यायेत्।

दिङ्न्यास—ॐ ह्रीं डमरुहस्ताय नमः' कहकर पूर्व दिशा का न्यास करे। इस प्रकार दश मन्त्रों से दिङ्न्यास करे। फिर 'ॐ ह्रीं रुद्राय नमः, ॐ अङ्गुष्ठाभ्यां नमः' इत्यादि मूलोक्त आठ मन्त्रों से पुनः करन्यास करना चाहिये। फिर 'ॐ ह्रीं भूतनाथाय नमः हृदये' इत्यादि मूलोक्त छः मन्त्रों से षडङ्ग न्यास करना चाहिये। पुनः इसके आगे लिखे मन्त्र से विनियोग का जल छोड़ देना चाहिये।

मन्त्रन्यास—फिर 'ॐ ह्रीं अङ्गुष्ठाभ्यां नमः' इत्यादि मूल में लिखित पाँच मन्त्रों से क्रमशः अङ्गुष्ठ, तर्जनी, मध्यमा, अनामिका तथा कनिष्ठा में न्यास करके फिर आगे लिखित विधि से ध्यान करना चाहिये।

अथ ध्यानम्—

शुद्धस्फटिकसङ्काशं सहस्रादित्यवर्चसम्। नीलजीमूतसङ्काशं नीलाञ्जनसमप्रभम्।
अष्टबाहुं त्रिनयनं चतुर्बाहुं द्विबाहुकम् ॥
दंष्ट्राकरालवदनं नूपुरारावसङ्कुलम्। भुजङ्गमखिलं देवमग्निवर्णशिरोरुहम् ॥ २ ॥
दिगम्बरं कुमारेशं वटुकाख्यं महाबलम्। खट्वाङ्गमसिपाशं च शूलं दक्षिणभागतः ॥ ३ ॥
डमरुं च कपालं च वरदं भुजगं तथा। आत्मवर्णसमोपेतं सारमेयसमन्वितम् ॥ ४ ॥

एवं ध्यात्वा 'ॐ ह्रीं भैरवभैरवभयकरहरमांरक्षरक्षहुंफट्स्वाहा' इति मन्त्रेण प्रार्थयित्वा पूर्वोक्तयन्त्रपीठे आवाहनादिमुद्रां प्रदर्शयेत्। षोडशोपचारैरभ्यर्च्य बलिदानं कुर्य्यात्।

ध्यान—शुद्ध स्फटिक के सदृश आभा वाले, सहस्रों सूर्य के समान कान्ति वाले, नील मेघ के सदृश तथा नीलाञ्जन के समान प्रभा वाले, अष्टभुज, त्रिनेत्र, चतुर्बाहु, द्विबाहु, कराल दाँतों से युक्त मुख वाले, नूपुरों की ध्वनि से कोलाहल करने वाले, सम्पूर्ण भुजङ्गों के देव अग्निवर्ण को शिर पर धारण करने वाले, दिगम्बर, कुमारेश, वटुक, महाबली, खट्वाङ्ग, असि तथा शूल को दक्षिण भाग में धारण करने वाले, डमरू, कपाल, वरदमुद्रा तथा भुजग से युक्त अपने ही समान वर्ण वाले कुत्ते के साथ जो विराजमान हैं, उन भैरव का ध्यान करता हूँ। इस प्रकार के भाव से ध्यान करके 'ॐ ह्रीं भैरव-भैरवभयकरहर मां रक्ष-रक्ष हुं फट् स्वाहा' इस मन्त्र से प्रार्थना कर पूर्वोक्त यन्त्रपीठ पर आवाहनादि मुद्राओं का प्रदर्शन करे। फिर षोडशोपचारों से पूजा करके बलिदान करे।

तद्यथा—'श्रीवटुकप्रीतये बलिदानमहं करिष्ये' इति सङ्कल्प्य गणपतिं दुर्गां रक्तैश्चन्दनाक्षतपुष्पैरभ्यर्च्य देवस्याग्रे त्रिकोणं चतुरस्रं मण्डलं कृत्वा तत्र गन्धाद्यैरभ्यर्च्य बलिपात्रे माषभक्तं पायसान्नं मोदकं चणकादीनि च कवलाकारं

सम्पादितं निधाय गन्धपुष्पाभ्यां मूलान्ते बलिरूपाय नमः इति बलिं सम्पूज्य देवं तत्र सञ्चिन्त्य हस्ते जलमादाय मूलमन्त्रमुच्चार्य भूमौ निक्षिप्य स्वहस्ते बलिमादाय देवाय समर्पयेत्। इति बलिदानम्।

बलिदान—देश-कालादि का उच्चारण करके 'श्रीवटुकप्रीतये बलिदानमहं करिष्ये' कहकर बलिदान का सङ्कल्प करके श्री गणपति तथा दुर्गा को रक्तवर्ण के चन्दन, अक्षत तथा पुष्पों से पूजित करके श्रीभैरव के आगे त्रिकोण मण्डल अथवा चतुरस्र मण्डल बनाकर उसमें गन्धादि से पूजन करके उस पर एक बलिपात्र (पत्तल या बाँस आदि की टोकरी) में उड़द की कोंहरी, खीर, लड्डू, उबले चने आदि के कौर बनाकर रख दे तथा मूल मन्त्र के अन्त में 'बलिरूपाय नमः' जोड़कर गन्ध एवं पुष्पादि से बलि की पूजा करके देव (भैरव) का स्मरण करके हाथ में जल लेकर मूल मन्त्र (आपदुद्धारक वटुकभैरवमन्त्र) का उच्चारण करके भूमि पर छोड़ दे। फिर अपने हाथ में बलिपात्र लेकर देव को समर्पित करे।

अथ पाठप्रकारः—तत आचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य मम सकलकामनासिद्ध्यर्थे श्रीवटुकभैरवस्तोत्रस्यैकादशसहस्रपुरश्चरणाङ्गत्वेन प्रतिस्तोत्रं मूलमन्त्रस्याष्टोत्तरशतसङ्ख्यजपसम्पुटितपञ्चाशत्सङ्ख्यपाठमहं करिष्ये वा यथाशक्त्येकप्रभृतिपाठमहं करिष्ये इति सङ्कल्प्य ततः मूलमन्त्रमष्टोत्तरशतं जपेत्।

मूलमन्त्रः—ॐ ह्रीं वटुकाय आपदुद्धारणाय कुरुकुरु वटुकाय ह्रीं ॐ। एवमष्टोत्तर१०८शतमूलमन्त्रजपं कृत्वा जपान्ते अनेन कृतजपेन श्रीवटुकभैरवः प्रीयतामिति जपं निवेद्य वटुकाय नमस्कृत्य पञ्चोपचारैः सम्पूज्य स्तोत्रं पठेत्।

पाठविधि—आचमन तथा प्राणायाम करके देश-काल का उच्चारण कर 'मम सकलकामनासिद्ध्यर्थे श्रीवटुकभैरवस्तोत्रस्यैकादशसहस्रपुरश्चरणाङ्गत्वेन प्रतिस्तोत्रं मूलमन्त्रस्य अष्टोत्तरशतसंख्यजपसम्पुटितपञ्चाशत्संख्यपाठमहं करिष्ये' ऐसा सङ्कल्प करके अथवा 'यथाशक्ति एकप्रभृतिपाठमहं करिष्ये' यह सङ्कल्प करके फिर मूल मन्त्र का एक सौ आठ की सङ्ख्या में जप करना चाहिये।

मूल मन्त्र—'ॐ ह्रीं वटुकाय आपदुद्धरणाय कुरु-कुरु वटुकाय ह्रीं ॐ।' इसका १०८ जप करके जप के अन्त में 'अनेन कृतजपेन श्रीवटुकभैरवः प्रीयताम्' ऐसा कहकर जप को निवेदित करके वटुक को नमस्कार कर पञ्चोपचारों से पूजित कर स्तोत्र का पाठ करना चाहिये।

अथ स्तोत्रम्—

ॐ ह्रीं भैरवो भूतनाथश्च भूतात्मा भूतभावनः। क्षेत्रदः क्षेत्रपालश्च क्षेत्रज्ञः क्षत्रियो विराट्॥ १॥
श्मशानवासी मांसाशी खर्पराशी स्मरान्तकृत्। रक्तपः पानपः सिद्धः सिद्धिदः सिद्धसेवितः॥ २॥
कङ्कालः कालशमनः कलाः काष्ठातनुः कविः। त्रिनेत्रो बहुनेत्रश्च तथा पिङ्गललोचनः॥ ३॥
शूलपाणिः खड्गपाणिः कङ्काली धूम्रलोचनः। अभीरुर्भैरवीनाथो भूतपो योगिनीपतिः॥ ४॥
धनदो धनहारी च धनवान्प्रीतिभावनः। नागहारो नागपाशो व्योमकेशः कपालभृत्॥ ५॥
कालः कपालमाली च कमनीयःकलानिधिः। त्रिलोचनोज्ज्वलन्नेत्रस्त्रिशिखी च त्रिलोकपः॥ ६॥
त्रिनेत्रतनयो डिम्भः शान्तः शान्तजनप्रियः। वटुको बटुवेशश्च खट्वाङ्गवरधारकः॥ ७॥
भूताध्यक्षः पशुपतिः भिक्षुकः परिचारकः। धूर्तो दिगम्बरः शूरो हरिणः पाण्डुलोचनः॥ ८॥
प्रशान्तः शान्तिदः सिद्धः शङ्करः प्रियबान्धवः। अष्टमूर्तिर्निधीशश्च ज्ञानचक्षुस्तपोमयः॥ ९॥
अष्टाधारः षडाधारः सर्पयुक्तः शिखीसखः। भूधरो भूधराधीशो भूपतिर्भूधरात्मजः॥ १०॥
कङ्कालधारी मुण्डी च नागयज्ञोपवीतवान्। जृम्भणो मोहनस्तम्भी मारणः क्षोभणस्तथा॥ ११॥

शुद्धनीलाञ्जनप्रख्यो दैत्यहा मुण्डभूषितः। बलिभुग्बलिभुङ्नाथो बालो बालपराक्रमः॥ १२॥
सर्वापत्तारणो दुर्गो दुष्टभूतनिषेवितः। कामी कलानिधिः कान्तः कामिनीवशकृद्वशी॥ १३॥
सर्वसिद्धिप्रदो वैद्यः प्रभुर्विष्णुरितीव हि। अष्टोत्तरशतं नाम्नां भैरवस्य महात्मनः॥ १४॥

स्तोत्रपाठ—मूल में 'ॐ ह्रीं भैरवो भूतनाथश्च भूतात्मा भूतभावनः। क्षेत्रदः क्षेत्रपालश्च क्षेत्रज्ञः क्षत्रियो विराट्' इस श्लोक से प्रारम्भ कर कुल चालीस श्लोकों में 'श्रीवटुकभैरवस्तवराज' नामक स्तोत्र लिखा है, उसका पाठ करना चाहिये (आगे मूल पाठ का भावार्थ दिया जा रहा है)।

स्तोत्र-भावार्थ—१. भैरव, २. भूतनाथ, ३. भूतात्मा, ४. भूतभावन, ५. क्षेत्रद, ६. क्षेत्रपाल, ७. क्षेत्रज्ञ, ८. क्षत्रिय, ९. विराट्, १०. श्मशानवासी, ११. मांसाशी, १२. खर्पराशि, १३. स्मरान्तकृत्, १४. रक्तप, १५. पानप, १६. सिद्ध, १७. सिद्धिद, १८. सिद्धसेवित, १९. कङ्काल, २०. कालशमन, २१. कलाकाष्ठातनु, २२. कवि, २३. त्रिनेत्र, २४. बहुनेत्र, २५. पिङ्गललोचन, २६. शूलपाणि, २७. खड्गपाणि, २८. कङ्काली, २९. धूम्रलोचन, ३०. अभीरु, ३१. भैरवीनाथ, ३२. भूतप, ३३. योगिनीपति, ३४. धनद, ३५. धनहारि, ३६. धनवान्, ३७. प्रीतिभावन, ३८. नागहार, ३९. नागपाश, ४०. व्योमकेश, ४१. कपालभृत्, ४२. काल, ४३. कपालमालि, ४४. कमनीय, ४५. कलानिधि, ४६. त्रिलोचन, ४७. ज्वलन्नेत्र, ४८. त्रिशिखि, ४९. त्रिलोकप, ५०. त्रिनेत्रतनय, ५१. डिम्भ, ५२. शान्त, ५३. शान्तजनप्रिय, ५४. वटुक, ५५. वटुवेश, ५६. खट्वाङ्गवरधारक, ५७. भूताध्यक्ष, ५८. पशुपति, ५९. भिक्षुक, ६०. परिचारक, ६१. धूर्त, ६२. दिगम्बर, ६३. शूर, ६४. हरिण, ६५. पाण्डुलोचन, ६६. प्रशान्त, ६७. शान्तिद, ६८. सिद्ध, ६९. शङ्कर, ७०. प्रियबान्धव, ७१. अष्टमूर्ति, ७२. निधीश, ७३. ज्ञानचक्षु, ७४. तपोमय, ७५. अष्टाधार, ७६. षडाधार, ७७. सर्पयुक्त, ७८. शिखिसख, ७९. भूधर, ८०. भूधराधीश, ८१. भूपति, ८२. भूधरात्मज, ८३. कङ्कालधारी, ८४. मुण्डि, ८५. नागयज्ञोपवीतवान, ८६. जृम्भण, ८७. मोहनस्तम्भी, ८८. मारण, ८९. क्षोभण, ९०. शुद्धनीलाञ्जनप्रख्य, ९१. दैत्यहा, ९२. मुण्डभूषित, ९३. बलिभुक्, ९४. बलिभुङ्नाथ, ८५. बाल, ९६. बालपराक्रम, ९७. सर्वापत्तारण, ९८. दुर्ग, ९९. दुष्टभूतनिषेवित, १००. कामी, १०१. कलानिधि, १०२. कान्त, १०३. कामिनीवशकृत्, १०४. वशी, १०५. सर्वसिद्धिप्रद, १०६. वैद्य, १०७. प्रभु तथा १०८. विष्णु। ये भैरव के १०८ नाम हैं॥ १-१४॥

मया ते कथितं देवि रहस्यं सर्वकामदम्। य इदं पठति स्तोत्रं नामाष्टशतमुत्तमम्॥ १५॥
न तस्य दुरितं किञ्चिन्न च भूतभयं तथा। न च मारीभयं तस्य महाराजभयं तथा॥ १६॥
न शत्रुभ्यो भयं क्वापि प्राप्नुयान्मानवः क्वचित्। पातकानां भयं चैव पठेत्स्तोत्रमनुत्तमम्॥ १७॥
मारीभये राजभये तथा चौराग्निजे भये। औत्पातिके महाघोरे तथा दुःस्वप्नदर्शने॥ १८॥
बन्धने च तथा घोरे पठेत्स्तोत्रमनन्यधीः। सर्वं प्रशमनं याति भयं भैरवकीर्तनात्॥ १९॥
एकादशसहस्रं तु पुरश्चरणमुच्यते। यस्त्रिसन्ध्यं पठेद्देवि संवत्सरमतन्द्रितः॥ २०॥
स सिद्धिं प्राप्नुयादिष्टां दुर्लभामपि मानवः। षण्मासं भूमिकामस्तु जपित्वा प्राप्नुयान्महीम्॥ २१॥
राजशत्रुविनाशार्थं जपेन्मासाष्टकं पुनः। रात्रौ वारत्रयं चैव नाशयत्येव शात्रवान्॥ २२॥
जपेन्मासत्रयं मर्त्यो राजानं वशमानयेत्। धनार्थी च सुतार्थी च दारार्थी यस्तु मानवः॥ २३॥
जपेन्मासत्रयं देवि वारमेकं तथा निशि। धनं पुत्रं तथा दारान्प्राप्नुयान्नात्र संशयः॥ २४॥
रोगी रोगात्प्रमुच्येत बद्धो मुच्येत बन्धनात्। भीतो भयात्प्रमुच्येत देवि सत्यं न संशयः॥ २५॥

फलश्रुति—हे देवि! मैंने तुमसे यह सम्पूर्ण कामनाओं को सिद्ध करने वाला रहस्य कह दिया है। जो इस उत्तम अष्टोत्तरशतनाम को पढ़ता है; उसके सामने कोई दुर्भाग्य नहीं आता तथा उसको किसी भी भूत या प्राणी से भय नहीं रहता। न उसे महामारी का भय होता है, न उसे ग्रहों का भय, न शासन ही से भय होता है। उसे शत्रु का भी किञ्चिन्मात्र भय नहीं होता है। उसे पातकों (लाञ्छनों, आरोपों आदि) का भी भय नहीं रहता है; अतः इस उत्तम स्तोत्र को पढ़ना चाहिये। महामारी के भय में, राजभय में, चौरभय में, अग्निभय में, महाघोर उत्पातों में, दुःस्वप्न-दर्शन होने पर, बन्धन (जेल) आदि में, घोर स्थिति में (अपहरण हो जाने पर) इस स्तोत्र को अनन्य भक्ति से पाठ करे तो भैरव के कीर्तन से सम्पूर्ण भय नष्ट हो जाते हैं। इसका ग्यारह हजार का पुरश्चरण कहा गया है। हे देवि! जो व्यक्ति तीनों सन्ध्याकालों में ध्यानपूर्वक एक वर्ष तक निरन्तर इसका पाठ करता है, उसे अभीष्ट तथा दुर्लभ सिद्धि प्राप्त होती है। छः मास तक निरन्तर जप करने पर जापक को पृथ्वी की प्राप्ति होती है। शत्रु के विनाश के लिये आठ मासों तक रात्रि में तीन बार जप करने से शत्रुओं का नाश होता है। यदि मनुष्य तीन माह तक इसका जप करता रहे तो वह राजा को भी वश में कर लेता है। जो मनुष्य धनार्थी, पुत्रार्थी तथा दारार्थी हो, उसे हे देवि! तीन माह तक रात्रि में प्रतिदिन एक बार इसका जप करने से धन, पुत्र तथा स्त्री की प्राप्ति होती है। इसमें कोई संशय नहीं है। रोगी रोग से मुक्त होता है तथा ज़ेल या बन्धन में पड़ा व्यक्ति बन्धन से मुक्त हो जाता है। जो भयभीत होता है, वह भय से मुक्त हो जाता है; इसमें कोई संशय नहीं है॥ १५-२५॥

निगडैश्चापि बद्धो यः कारागृहे निपातितः। शृङ्खलाबन्धनं प्राप्तः पठेच्चैव दिवा निशि॥ २६॥
यं यं चिन्तयते कामं तं तं प्राप्नोति निश्चितम्। अप्रकाशं परं गुह्यं न देयं यस्य कस्यचित्॥ २७॥
सुकुलीनाय शान्ताय ऋजवे दम्भवर्जिते। दद्यात्स्तोत्रमिमं पुण्यं सर्वकामफलप्रदम्॥ २८॥
इति श्रुत्वा ततो देवी नामाष्टशतमुत्तमम्। जजाप परया भक्त्या सदा सर्वेश्वरेश्वरी॥ २९॥
भैरवोऽपि प्रहृष्टोऽभूत्सर्वलोकमहेश्वरः। वरं ददाति भक्तेभ्यः पठत्स्तोत्रमनन्यधीः॥ ३०॥
सन्तोषं परमं प्राप्य भैरवस्य महात्मनः॥ ३१॥

वारंवारं भुवनजननी प्रोच्य ते साधुवादः सत्यं सत्यं जगति सकले भैरवो देव एकः।
यां यां सिद्धिं भुवनजठरे कामयेन्मानवो यस्तान्तां सिद्धिं वितरति सदा भैरवः सुप्रसन्नः॥ ३२॥

जो रस्सियों से बँधा हो या बेड़ियों से जकड़ा हो, कारागार में पड़ा हो अथवा सांकलों से बँधा हो, उसे इस स्तोत्र का पाठ रात-दिन करना चाहिये। इसका पाठ करने से जो-जो इच्छा होती है, वह निश्चित ही पूरी होती है। यह गोपनीय स्तोत्र है; अतः इसे किसी ऐरे-गैरे को नहीं बताना चाहिये। इसे सुन्दर कुल में जन्म लेने वाले, शान्त, ऋत (ईमानदार), दम्भरहित व्यक्ति को ही बताना चाहिये। यह स्तोत्र पुण्यफलप्रद तथा सभी कामनाओं को पूरा करने वाला है—यह बात समझकर देवी ने परम भक्तिपूर्वक इस स्तोत्र का जप किया और भैरव भी प्रसन्न होकर सर्वलोक महेश्वर बनकर भक्तों को वर देते हैं। अतः इस स्तोत्र का अनन्य भक्ति से पाठ करना चाहिये। इससे भैरव को परम सन्तोष प्राप्त होता है। यह सुनकर भुवनजननी ने साधुवाद देकर कहा कि इस जगत् में एकमात्र भैरव देव ही सच्चे हैं। पृथ्वीलोक में जिस-जिस सिद्धि को मनुष्य चाहता है, भैरव सुप्रसन्न होकर सदैव उस-उस सिद्धि का वितरण करते हैं॥ २६-३२॥

पाणिभ्यां परितः प्रपीड्य सुदृढं निश्चोत्यनिश्चोत्य च ब्रह्माण्डे सकलं प्रचालितरसालोच्चैः फलाभं मुहुः।
पायंपायमपाययत्त्रिजगतीमुन्मत्तवत्तैरसैर्नृत्यंस्ताण्डवमम्बरेण शिरसा पायान्महाभैरवः॥ ३३॥
बिभ्राणः शुभ्रवर्णं द्विगुणनवभुजं पञ्चवक्त्रं त्रिनेत्रं शङ्खं भैषज्यचापं सविषममृतकं ज्ञानमुद्रेन्द्रशस्त्रम्।
शूलं खट्वाङ्गबाणान् डमरुमसिगदावह्निमारोग्यमालामिष्टाभीतिं च दोर्भिर्जयति खलु महाभैरवः सर्वसिद्ध्यै॥ ३४॥

क्काकाशः क्व समीरणः क्व दहनः क्वापश्च विश्वम्भरः क्व ब्रह्मा क्व जनार्दनः क्व तरणिः क्वेन्दुश्च देवासुराः। कल्पान्तारभटीनटप्रमुदितः श्रीसिद्धयोगीश्वरो क्रीडानाटकनायको विजयते देवो महाभैरवः॥ ३५॥

श्री महाभैरव हाथों से चारो ओर प्रपीडन करके सम्पूर्ण ब्रह्माण्ड को दृढ़तापूर्वक निचोड़-निचोड़ कर जैसे कोई ऊँचे आम्र वृक्ष के फलों को झकझोर कर बार-बार टपकाता है, उसी प्रकार से इस पृथ्वी पर भी वह उन्मत्त की भाँति ताण्डव नृत्य करके अशुभ को शुभ तथा शुभ को अशुभ कर डालते हैं। घूमते हुए शुभ्र वर्ण वाले, अठारह भुजाओं वाले, पाँच मुखों वाले, तीन नेत्रों वाले, शङ्ख, भैषज्य, चाप, विष-अमृत, ज्ञानमुद्रा, वज्र, शूल, खट्वाङ्ग, बाण, डमरू, असि, गदा, अग्नि, आरोग्यमाला, अभय मुद्रा धारण करने वाले महाभैरव की सर्वसिद्धियों के लिये जप किया जाता है। क्या आकाश? क्या वायु? क्या अग्नि? क्या विश्वम्भर? क्या ब्रह्मा? क्या विष्णु? क्या सूर्य? क्या चन्द्रमा? क्या देवासुर? कल्पान्त-पर्यन्त सिद्ध योगीश्वर क्रीडा-नाटकनायक महाभैरव विजयी रहते हैं॥ ३३-३५॥

लिखित्वा परया भक्त्या भैरवस्तोत्रमुत्तमम्। अष्टानां ब्राह्मणानां च देयं पुस्तकमादरात्॥ ३६॥
यान्यान् समीहते कामांस्तांस्तान्प्राप्नोत्यसंशयम्॥ ३७॥
इह लोके सुखं प्राप्य पुस्तकस्य प्रसादतः। शिवलोकमनुप्राप्य शिवेन सह मोदते॥ ३८॥
लिखित्वा भूर्जपत्रे तु त्रिलोहपरिवेष्टितम्। सौम्ये च वस्तुवसने कर्पटे च सुशोभने॥ ३९॥
करे बाहौ गले कट्यां मूर्ध्नि त्रिलोहगोपितम्। यस्तु धारयते स्तोत्रं सर्वत्र जयमाप्नुयात्॥ ४०॥

इति श्रीरुद्रयामले तन्त्रे पार्वतीश्वरसंवादे आपदुद्धारकश्रीवटुकभैरवाष्टोत्तरशतनामस्तवराजः समाप्तः।

इस भैरवस्तोत्र को भक्तिपूर्वक लिखकर पुस्तक बनाकर (अथवा छपी पुस्तक लेकर) जो साधकर आठ ब्राह्मणों को आदरपूर्वक दान करने से जिन-जिन कामनाओं को करता है, वे-वे निःसन्देह पूरी हो जाती हैं। पुस्तक-दान के प्रसाद से उसे इस लोक में सुख मिलता है तथा मृत्यु के उपरान्त शिवलोक में जाकर श्री शिव जी के समीप सुख प्राप्त करता है। भोजपत्र पर इस स्तोत्र को लिखकर त्रिलोह के ताबीज में उसे बन्द कर किसी सुन्दर कपड़े में बाँधकर कलाई में, बाहु में, गले में अथवा कमर में अथवा शिर पर बाँधकर जो इसको धारण करता है, उसकी सदैव जीत होती है अर्थात् उसे सफलता प्राप्त होती है॥ ३६-४०॥

कुबेरमन्त्रप्रयोगः

'ॐ यक्षाय कुबेराय वैश्रवणाय धनधान्याधिपतये धनधान्यसमृद्धिं मे देहि दापय स्वाहा' इति पञ्चत्रिंशद्वर्णात्मको मन्त्रः। अस्य मन्त्रस्य विश्रवा ऋषिः। बृहती छन्दः। कुबेरो देवता सर्वेष्टसिद्धये जपे विनियोगः॥ ॐ विश्रव ऋषये नमः शिरसि॥ १॥ ॐ बृहतीछन्दसे नमः मुखे॥ २॥ ॐ कुबेरदेवतायै नमः हृदि॥ ३॥ इति ऋष्यादिन्यासः। ॐ यक्षाय अङ्गुष्ठाभ्यां नमः॥ १॥ ॐ कुबेराय तर्जनीभ्यां नमः॥ २॥ ॐ वैश्रवणाय मध्यमाभ्यां नमः॥ ३॥ ॐ धनधान्याधिपतये अनामिकाभ्यां नमः॥ ४॥ ॐ धनधान्यसमृद्धिं मे कनिष्ठिकाभ्यां नमः॥ ५॥ ॐ देहि दापय स्वाहा करतलकरपृष्ठाभ्यां नमः॥ ६॥ इति करन्यासः। एवं हृदयादि षडङ्गन्यासं कुर्यात्। एवं न्यासविधिं कृत्वा ध्यायेत्—

मनुजवाह्यविमानवरस्थितं गरुडरत्ननिभं निधिनायकम्।
शिवसखं मुकुटादिविभूषितं वरगदे दधतं भज तुन्दिलम्॥

इति ध्यात्वा पीठधर्मादिपरत्त्वान्तपीठदेवताः सम्पूज्य तद्देशे मूलेन मूर्तिं प्रकल्प्य पाद्यादिपुष्पान्तैरुपचारैः सम्पूज्य आवरणपूजां कुर्यात्। तद्यथा—षट्कोणे आग्नेयादिकोणकेसरेषु मध्ये दिक्षु च ॐ यक्षाय हृदयाय नमः॥ १॥ ॐ कुबेराय शिरसे स्वाहा॥ २॥ ॐ वैश्रवणाय शिखायै वषट्॥ ३॥ ॐ धनधान्याधिपतये कवचाय हुं॥ ४॥ ॐ धनधान्यसमृद्धिं


नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ देहि दापय स्वाहा अस्त्राय फट् ॥ ६ ॥ इति षडङ्गानि पूजयेत्। ततो भूपुरे इन्द्रादिदशदिक्पालान् तद्बाह्ये वज्राद्यायुधानि च पूजयेत्। इत्यावरणपूजां कृत्वा धूपादिनीराजनान्तं सम्पूज्य जपं कुर्यात्। अस्य पुरश्चरणं लक्षजपः। तथा चोक्तम्—

लक्षमेकं जपेन्मन्त्रं दशांशं जुहुयात्तिलैः। शिवालये जपेन्मन्त्रमयुतं धनवृद्धये॥
बिल्वमूलोपविष्टेन जपतो लक्षं धनर्द्धिदम्।

इति पञ्चत्रिंशद्वर्णात्मककुबेरमन्त्रप्रयोगः।

कुबेर मन्त्रप्रयोग—'ॐ यक्षाय कुबेराय वैश्रवणाय धनधान्याधिपतये धनधान्यसमृद्धिं मे देहि दापय स्वाहा' यह पैंतीस अक्षरों का मन्त्र है। विनियोग हेतु 'अस्य मन्त्रस्य विश्रवा ऋषिः। बृहती छन्दः। कुबेरो देवता। सर्वेष्टसिद्धये जपे विनियोगः' कहकर जल छोड़े। फिर मूल में लिखित 'ॐ विश्रवऋषये नमः शिरसि' इत्यादि तीन मन्त्रों से ऋष्यादि न्यास करे। फिर 'ॐ यक्षाय अङ्गुष्ठाभ्यां नमः' इत्यादि मूलोक्त छः मन्त्रों से करन्यास कर पुनः उन्हीं छः मन्त्रों से हृदयादि न्यास कर ध्यान-हेतु मूल में लिखित 'मनुजवाह्य०' इत्यादि एक श्लोक का प्रयोग करे (ध्यान का भावार्थ इस प्रकार है—नरवाहन = पालकी में स्थित, पन्नारत्न के समान कान्ति वाले, निधियों के नायक, शिवसखा, मुकुटादि से विभूषित, वरमुद्रा एवं गदाधारी तथा तोंद वाले की सेवा करो)। इस प्रकार ध्यान करके किसी पीठ पर पीठधर्मादि परतत्वान्त देवताओं को पूज कर मूल मन्त्र से मूर्ति की कल्पना करके कुबेरयन्त्र पर षट्कोण में षडङ्ग पूजन, भूपुर में वज्रादि आयुध पूजन तथा दिक्पाल-पूजन कर एक लाख मंत्रजप का पुरश्चरण किसी शिवालय या बिल्ववृक्ष के नीचे बैठकर करे। मन्त्र मूल पाठ में दिये हैं।

कुबेरयन्त्रम्



षोडशाक्षरकुबेरमन्त्रप्रयोगः

मन्त्रो यथा—'ॐ श्रीं ॐ ह्रीं श्रीं ह्रीं क्लीं श्रीं क्लीं वित्तेश्वराय नमः'। अस्य मन्त्रस्य विश्रवा ऋषिः। बृहती छन्दः। कुबेरो देवता। ममाभीष्टसिद्ध्यर्थे जपे विनियोगः। ॐ विश्रवऋषये नमः शिरसि॥ १॥ ॐ बृहतीछन्दसे नमः मुखे॥ २॥ ॐ कुबेरदेवतायै नमः हृदि॥ ३॥ इति ऋष्यादिन्यासः। **ॐ श्रीं अङ्गुष्ठाभ्यां नमः॥ १॥ ह्रीं श्रीं तर्जनीभ्यां नमः॥ २॥ ह्रीं क्लीं मध्यमाभ्यां नमः॥ ३॥ श्रीं क्लीं अनामिकाभ्यां नमः॥ ४॥ वित्तेश्वराय कनिष्ठिकाभ्यां नमः॥ ५॥ नमो नमः कतलकरपृष्ठाभ्यां नमः॥ ६॥** इति करन्यासः। **एवं हृदयादिषडङ्गन्यासं कुर्यात्। ध्यानार्चनादिकं सर्वमस्य पूर्ववदाचरेत्। इति षोडशाक्षरकुबेरमन्त्रप्रयोगः।**

षोडशाक्षर कुबेर मन्त्र-प्रयोग—'ॐ श्रीं ॐ ह्रीं श्रीं ह्रीं क्लीं वित्तेश्वराय नमः' यह सोलह अक्षरों का मन्त्र है। इसके विश्रवा ऋषि हैं, बृहती छन्द है, कुबेर देवता हैं—इस भाव से युक्तमूल में लिखित विनियोग मन्त्र पढ़कर जल छोड़े। फिर मूल में लिखित 'ॐ विश्रवऋषये नमः शिरसि' इत्यादि तीन मन्त्रों से ऋष्यादि न्यास कर 'ॐ श्रीं अङ्गुष्ठाभ्यां नमः' इत्यादि छः मन्त्रों से क्रमशः अङ्गुष्ठ, तर्जनी, मध्यमा, अनामिका, कनिष्ठा तथा करतल में न्यास करना चाहिये। फिर इन्हीं मन्त्रों से हृदयादि षडङ्ग न्यास भी करे। इसके ध्यान एवं पूजन आदि ऊपर लिखे पैंतीस अक्षर वाले मन्त्र के समान ही करने चाहिये। (परन्तु यन्त्र के मध्य में षोडशाक्षरी मन्त्र ही लिखना चाहिये)।

शिवाथर्वशीर्षम्

शिवउपनिषदि 'ॐ देवाह वै स्वर्गलोकमयंस्ते रुद्रमपृच्छन्। कोभवानिति। सोऽब्रवीदहमेकः प्रथममासोद्वर्तामि च भविष्यामि च नान्यः कश्चिन्मत्तो व्यतिरिक्त इति। सोऽन्तरादन्तरं प्राविशद्दिशश्चान्तरं प्राविशत्सोहं नित्यानित्यो व्यक्ताव्यक्तो ब्रह्माब्रह्माहं प्राञ्चः प्रत्यञ्चोऽहं दक्षिणाञ्च उदञ्चोहमधश्चोर्ध्वश्चाहं दिशश्चाहं पुमान्पुमान् स्त्रियश्चाहं सावित्र्यहं गायत्र्यहं त्रिष्टुब्जगत्यनुष्टुप्चाहं छन्दोऽहं सत्योऽहं गार्हपत्यो दक्षिणाभिराहवनीयोऽहं गौरहङ्गौर्यहमृगहं यजुरहं सामाहमथर्वाङ्गिरसोऽहं ज्येष्ठोऽहं श्रेष्ठोऽहं वरिष्ठोऽहमापोऽहं तेजोऽहं गुह्योऽहमरण्योऽहमक्षरमहं क्षरमहं पुष्करमहं पवित्रमहमुग्रञ्च बलिश्च पुरस्ताज्योतिरित्यहमेव सर्वेभ्यो मामेव स सर्वः समायोमां वेदसदेवान् वेद सर्वांश्च वेदान् साङ्गानपि ब्रह्मब्रह्माणैश्च गाङ्गोभिर्ब्राह्मणेन हविर्हविषा आयुरायुषासत्यं सत्येन धर्मेण धर्मं तर्पयामि स्वेन तेजसा।

शिवाथर्वशीर्ष (शिव उपनिषद के अनुसार)—मूल में लिखित शिवाथर्वशीर्ष० का पाठ करना चाहिये। इसका भावार्थ निम्न प्रकार है—

स्वर्ग लोकमय उन रुद्र भगवान् से देवताओं ने इस प्रकार पूछा—आप कौन हैं? वह बोले—मैं एक हूँ। मैं आदि में था, वर्तमान में हूँ तथा रहूँगा। मेरे अतिरिक्त अन्य कोई नहीं है। वह अन्तर से अन्तर में प्रविष्ट होता है। दिशाओं से दिशान्तर में प्रविष्ट होता है। नित्य-अनित्य, व्यक्त-अव्यक्त, ब्रह्मा-अब्रह्मा, पूर्वी-पश्चिमी, उत्तरी-दक्षिणी, निचली-ऊपरी, दिशा-प्रतिदिशा में वह मैं ही हूँ। मैं ही पुरुष-स्त्री, सावित्री, गायत्री, त्रिष्टुप्, जगती, अनुष्टुप् छन्द हूँ। मैं सत्य हूँ। मैं ही गार्हपत्य, दक्षिणा नामक अग्नि तथा आहवनीय हूँ। मैं ही गौ, गौरी, ऋक्, यजुः, साम तथा अथर्वाङ्गिरस हूँ। ज्येष्ठ हूँ, श्रेष्ठ हूँ, वरिष्ठ हूँ, आप हूँ, तेज हूँ, गुह्य हूँ, अक्षर हूँ, क्षर हूँ, पुष्कर हूँ, पवित्र हूँ, उग्र हूँ, बलि हूँ, सामने की ज्योति हूँ; मैं ही सबमें हूँ, वह समस्त मुझको जानता है। वही सभी वेदों को साङ्गतापूर्वक, ब्रह्म-ब्रह्माओं, गाय-गायों, ब्राह्मण के द्वारा हवि, हविष्य के द्वारा आयु से आयुष्य, सत्य से सत्य, धर्म से धर्म इत्यादि को अपने तेज से तृप्त करता है।

ततो ह वै ते देवा रुद्रमपृच्छन्। ते देवा रुद्रमपश्यन् ते देवा रुद्रमध्यायन् ते देवा ऊर्ध्वबाहवो रुद्रं स्तुवन्ति। ॐ यो वै रुद्र स भगवान् यश्च ब्रह्मा तस्मै वै नमो नमः॥ १॥ यो वै रुद्रः स भगवान् यश्च विष्णुस्तस्मै वै नमो नमः॥ २॥ यो वै रुद्रः

स भगवान् यश्च स्कन्दस्तस्मै० ॥ ३ ॥ यो वै रुद्रः स भगवान् यश्चेन्द्रस्तस्मै० ॥ ४ ॥ यो वै रुद्रः स भगवान्यश्चाग्निस्तस्मै० ॥ ५ ॥ यो वै रुद्रः स भगवान् यश्च वायुस्त० ॥ ६ ॥ ॐ यो वै रुद्रः स भगवान् यश्च सूर्यस्तस्मै० ॥ ७ ॥ यो वै रुद्रः स भगवान् यश्च सोमस्तस्मै० ॥ ८ ॥ यो वै रुद्रः स भगवान् येऽष्टौ ग्रहास्तस्मै० ॥ ९ ॥ यो वै रुद्रः स भगवान् ये चाष्टौ प्रतिग्रहास्तस्मै० ॥ १० ॥ यो वै रुद्रः स भगवान् यच्च भूस्तस्मै० ॥ ११ ॥ यो वै रुद्रः स भगवान् यच्च भुवस्तस्मै० ॥ १२ ॥ यो वै रुद्रः स भगवान् यच्च स्वस्तस्मै० ॥ १३ ॥ यो वै रुद्रः स भगवान् यच्च महस्तस्मै० ॥ १४ ॥ यो वै रुद्रः स भगवान् या च पृथिवी तस्मै० ॥ १५ ॥ यो वै रुद्रः स भगवान् यच्चान्तरिक्षं तस्मै० ॥ १६ ॥ यो वै रुद्रः स भगवान् यो च द्यौस्तस्मै० ॥ १७ ॥ यो वै रुद्रः स भगवान् याश्चापस्तस्मै० ॥ १८ ॥ यो वै रुद्रः स भगवान् यच्च तेजस्तस्मै० ॥ १९ ॥ यो वै रुद्रः स भगवान् यश्च कालस्तस्मै० ॥ २० ॥ यो वै रुद्रः स भगवान् यमस्तस्मै० ॥ २१ ॥ यो वै रुद्रः स भगवान् यश्च मृत्युस्तस्मै० ॥ २२ ॥ यो वै रुद्रः स भगवान् यच्चामृतं तस्मै० ॥ २३ ॥ यो वै रुद्रः स भगवान् यच्चाकाशं तस्मै० ॥ २४ ॥ यो वै रुद्रः स भगवान् यच्च विश्वं तस्मै० ॥ २५ ॥ यो वै रुद्रः स भगवान् यच्च स्थूलं तस्मै० ॥ २६ ॥ यो वै रुद्रः स भगवान् यच्च सूक्ष्मं तस्मै० ॥ २७ ॥ यो वै रुद्रः स भगवान् यच्च शुक्लं तस्मै० ॥ २८ ॥ यो वै रुद्रः स भगवान् यच्च कृष्णस्तस्मै० ॥ २९ ॥ यो वै रुद्रः स भगवान् यच्च कृत्स्नं तस्मै० ॥ ३० ॥ यो वै रुद्रः स भगवान् यच्च सत्यं तस्मै० ॥ ३१ ॥ यो वै रुद्रः स भगवान् यच्च सर्वं तस्मै० ॥ ३२ ॥

तब उन देवों ने रुद्र से पूछा। उन देवों ने रुद्र को देखा, रुद्र का अध्ययन किया तथा ऊर्ध्वबाहु होकर रुद्र की स्तुति की। वह जो रुद्र है, वह ब्रह्मा है, इसलिये उसे नमस्कार है ॥ १ ॥ वह जो रुद्र भगवान् हैं, वही विष्णु हैं, इसलिये उनको नमस्कार है, नमस्कार है ॥ २ ॥ वह जो रुद्र भगवान् हैं, वह स्कन्ध हैं; अतः उन्हें नमस्कार है ॥ ३ ॥ वह जो रुद्र भगवान् है, वह इन्द्र है; अतः उसे नमस्कार है ॥ ४ ॥ वह जो रुद्र भगवान् है, वह अग्नि है; अतः उसे नमस्कार है ॥ ५ ॥ वह जो रुद्र भगवान् है, वह वायु है; अतः उसे नमस्कार है ॥ ६ ॥ वह जो रुद्र भगवान् है, वह सूर्य है; अतः उसे नमस्कार है ॥ ७ ॥ वह जो रुद्र भगवान् है, वह सोम है; अतः उसे नमस्कार है ॥ ८ ॥ वह जो रुद्र भगवान् है, वह अष्टग्रहों के रूप में है; अतः उसे नमस्कार है ॥ ९ ॥ वह जो रुद्र भगवान् है, वह आठ प्रतिग्रहों के रूप में है; अतः उसे नमस्कार है ॥ १० ॥ वह जो रुद्र भगवान् है, वह भूलोक है; अतः उसे नमस्कार है ॥ ११ ॥ वह जो रुद्र भगवान् है, वह भुवःलोक है; अतः उसे नमस्कार है ॥ १२ ॥ वह जो रुद्र भगवान् है, वह स्वःलोक है; अतः उसे नमस्कार है ॥ १३ ॥ वह जो रुद्र भगवान् है, वह महः लोक है; अतः उसे नमस्कार है ॥ १४ ॥ वह जो रुद्र भगवान् है, वह पृथ्वी है; अतः उसे नमस्कार है ॥ १५ ॥ वह जो रुद्र भगवान् है, वह अन्तरिक्ष है; अतः उसे नमस्कार है ॥ १६ ॥ वह जो रुद्र भगवान् है, वह द्यौः है; उसे नमस्कार है ॥ १७ ॥ वह जो रुद्र भगवान् है, वह आप है; अतः उसे नमस्कार है ॥ १८ ॥ वह जो रुद्र भगवान् है, वह तेज है; उसे नमस्कार है ॥ १९ ॥ वह जो रुद्र भगवान् है, वह काल है; उसे नमस्कार है ॥ २० ॥ वह जो रुद्र भगवान् है, वह यम है; उसे नमस्कार है ॥ २१ ॥ वह जो रुद्र भगवान् है, वह मृत्यु है; उसे नमस्कार है ॥ २२ ॥ वह जो रुद्र भगवान् है, वह अमृत है; उसे नमस्कार है ॥ २३ ॥ वह जो रुद्र भगवान् है, वह आकाश है; उसे नमस्कार है ॥ २४ ॥ वह जो रुद्र भगवान् है, वह विश्व है; उसे नमस्कार है ॥ २५ ॥ वह जो रुद्र भगवान् है, वह स्थूल है; उसे नमस्कार है ॥ २६ ॥ वह जो रुद्र भगवान् है, वह सूक्ष्म है; उसे नमस्कार है ॥ २७ ॥ वह जो रुद्र भगवान् है, वह शुक्ल है; उसे नमस्कार है ॥ २८ ॥ वह जो रुद्र भगवान् है, वह कृष्ण है; उसे नमस्कार है ॥ २९ ॥ वह जो रुद्र भगवान् है, वह कृत्स्न है; उसे नमस्कार है ॥ ३० ॥ वह जो रुद्र भगवान् है, वह सत्य है; उसे नमस्कार है ॥ ३१ ॥ वह जो रुद्र भगवान् है, वह सर्व है; उसे नमस्कार है ॥ ३२ ॥

भूस्ते आदिर्मध्यभुवस्ते शीर्षं विश्वरूपोऽसि ब्रह्मैकस्त्वं द्विधा त्रिधा वृद्धिस्त्वं शान्तिस्त्वं पुष्टिस्त्वं हुतमहुतं दत्तमदत्तं सर्वमसर्वं विश्वमविश्वं कृतमकृतं परमपरं परायणञ्च त्वं अपामसोममृता अभूमागन्मे ज्योतिरविदामदेवान्। किं नूनमस्मान्

कृणवदरातिः। किमु धूर्त्तिरमृतं मर्त्यस्य सोमसूर्यपुरस्तात्सूक्ष्मः पुरुषः। सर्वञ्जगद्धितं वा एतदक्षरं प्राजापत्यं सौम्यं सूक्ष्मं पुरुषं ग्राह्यमग्राह्येण भावम्भावेन सौम्यं सौम्येन सूक्ष्मं सूक्ष्मेण वायव्यं वायव्येन ग्रसति तस्मै महाग्रासाय वै नमो नमः।

हृदिस्था देवताः सर्वा हृदि प्राणाः प्रतिष्ठिता। हृदि त्वमसि यो नित्यं तिस्रो मात्राः परस्तु सः॥

तस्योत्तरतः शिरो दक्षिणतः पादौ य उत्तरतः स ओङ्कारः य ओङ्कारः स प्रणवः यः प्रणवः स सर्वव्यापी यः सर्वव्यापी सोऽनन्तः योऽनन्तस्तत्तारं यत्तारन्तच्छुक्लं यच्छुक्लं तत्सूक्ष्मं यत्सूक्ष्मं तद्वैद्युतं तत्परं ब्रह्म। यत् परं ब्रह्म स एकः य एकः स रुद्रः यो रुद्रः स ईशानः य ईशानः स भगवान् महेश्वरः॥ ३॥

भूः आपका आदि है, भुवः आपका मध्य है, श्वः आपका शीर्ष है। आप विश्वरूप हैं, एकमात्र ब्रह्म हैं, आप द्विधा, त्रिधा वृद्धि हैं, आप शान्ति हैं, पुष्टि हैं, हुत हैं, अहुत हैं, दत्त हैं, अदत्त हैं, सर्व हैं, असर्व हैं, विश्व हैं, अविश्व हैं, कृत-अकृत हैं, परम-अपरम हैं, परायण हैं।

अपों में सोम तथा अमृत हैं, अविदों और अदेवों में ज्योति हैं, आप निश्चय ही मरणशील को अमरत्व देने वाले हैं। आप ही मित्र एवं शत्रु हैं। यह सोम एवं सूर्य से भी बढ़कर सूक्ष्म पुरुष है। यहाँ प्राजापत्य सोम सूक्ष्म ग्राह्य-अग्राह्य भाव से भाव को, सूक्ष्म को सूक्ष्म से, वायव्य को वायव्य से जो ग्रसित करता है, उस महाग्रास को नमस्कार है।

आपके हृदय में सभी देवता तथा प्राण प्रतिष्ठित हैं। आप हृदय में प्रतिष्ठित हैं। नित्य ही तीन मात्रा के रूप में हैं, उनसे परे वह ब्रह्म है। उसके उत्तर की ओर सिर एवं दक्षिण की ओर पैर हैं। जो उत्तर की ओर है, वह ओंकार है। जो ओंकार है, वही प्रणव है। जो प्रणव है, वह सर्वव्यापी है। जो सर्वव्यापी है, वह अनन्त है। जो अनन्त है, वह तार है। जो तार है, वह शुक्ल है। जो शुक्ल है, वह सूक्ष्म है। जो सूक्ष्म है, वह वैद्युत् है। जो वैद्युत् है, वह परब्रह्म है। जो परब्रह्म है, वह एक है। जो एक है, वह रुद्र है। जो रुद्र है, वह ईशान है। जो ईशान है, वह महेश्वर (शिव) है॥ ३॥

अथ कस्मादुच्यते ओङ्कारः यस्मादुच्चार्यमाण एव प्राणानूर्ध्वमुत्क्रामयति तस्मादुच्यते ओङ्कारः। अथ कस्मादुच्यते प्रणवः यस्मादुच्चार्यमाण एव ऋग्यजुःसामाथर्वाङ्गिरसं ब्रह्म ब्राह्मणेभ्यः प्रणामयति नामयति च तस्मादुच्यते प्रणवः। अथ कस्मादुच्यते सर्वव्यापी यस्मादुच्चार्यमाण एव यथा स्नेहेन पलालपिण्डमिव शान्तरूपमोतप्रोतमनुप्राप्तो व्यतिषक्तश्च तस्मादुच्यते सर्वव्यापी। अथ कस्मादुच्यतेऽनन्तः यस्मादुच्चार्यमाण एव तिर्यगूर्ध्वमधस्ताच्चास्यान्तो नोपलभ्यते तस्मादुच्यतेऽनन्तः। अथ कस्मादुच्यते तारं यस्मादुच्चार्यमाण एव गर्भजन्मव्याधिजरामरणसंसारमहाभयात्तारयति त्रायते च तस्मादुच्यते तारम्। अथ कस्मादुच्यते शुक्लं यस्मादुच्चार्यमाण एव क्रन्दते क्लामयति च तस्मादुच्यते शुक्लम्। अथ कस्मादुच्यते सूक्ष्मं यस्मादुच्चार्यमाण एव सूक्ष्मो भूत्वा शरीराण्यधितिष्ठति सर्वाणि चाङ्गान्यभिमृश्यति तस्मादुच्यते सूक्ष्मम्। अथ कस्मादुच्यते वैद्युतं यस्मादुच्चार्यमाण एव व्यक्ते महति तपसि द्योतयति तस्मादुच्यते वैद्युतम्। अथ कस्मादुच्यते परंब्रह्म यस्मात्परमपरं परायणञ्च बृहद्बृहत्या बृंहयति तस्मादुच्यते परंब्रह्म। अथ कस्मादुच्यते एकः यः सर्वान्प्राणान् संभक्ष्य सम्भक्षणेनाजः संसृजति विसृजति तीर्थमेके व्रजन्ति तीर्थमेके दक्षिणः प्रत्यञ्च उदञ्चप्राच्योऽभिव्रजन्त्येके तेषां सर्वेषामिह सङ्गतिः साकं स एकोऽभूदन्तश्चरति प्रजानां तस्मादुच्यते एकः। अथ कस्मादुच्यते रुद्रः यस्मादृषिभिर्नान्यैर्भवतैर्द्रुतमस्य रूपमुपलभ्यते तस्मादुच्यते रुद्रः।

वह ओङ्कार क्यों कहलाता है? जिसके उच्चारित होने पर प्राण ऊर्ध्वगमन करता है; अतः उसे ओंकार कहते हैं। उसे प्रणव क्यों कहते हैं? जिसके उच्चारित करते ही ऋक्-युजः-साम-अथर्व-अङ्गिरस तथा ब्राह्मणों को प्रणाम करता है (होता है), उनको नमन करता है; अतः 'प्रणव' कहा जाता है। सर्वव्यापी क्यों कहते हैं? जिसके उच्चारित होते ही जिस प्रकार स्नेह के मिश्रण से पलाल (मोटा आटा) का पिण्ड ओत-प्रोत होकर शान्तरूप हो

जाता है, उसी प्रकार इसके उच्चारण से शरीर-मन-प्राण एकाकार हो जाते हैं तथा पिण्ड-ब्रह्माण्ड भी एक रूप भासते हैं; अतः उसे सर्वव्यापी कहते हैं। इसे अनन्त क्यों कहते हैं ? जिसके उच्चारण करते ही तिरछे में, ऊर्ध्व में तथा अधः में ध्वनि के विस्तार का अन्त नहीं मिलता है; अतः उसे अनन्त कहते हैं। ॐ को तार क्यों कहते हैं ? क्योंकि यह उच्चारणमात्र से ही गर्भ, जन्म, व्याधि, जरा-मरण, संसार, महाभय से तार देता है, छुटकारा दिला देता है; अतः तार कहते हैं। इसे शुक्ल क्यों कहा जाता है ? क्योंकि इसके उच्चरित होते ही क्रन्दन होता है, क्लम होता है; अतः इसे शुक्ल कहते हैं। यह सूक्ष्म क्यों कहा जाता है ? क्योंकि यही सभी अङ्गों में व्याप्त होकर स्थित है; अतः सूक्ष्म कहलाता है। इसे वैद्युत् क्यों कहते हैं ? क्योंकि इसके उच्चारण करते ही महत् तत्त्व व्यक्त होता है, तप प्रकाशित होता है; अतः इसे वैद्युत् कहा जाता है। इसे परंब्रह्म किस कारण से कहते हैं ? क्योंकि यह परं, अपरं, परायण, बृहद् बृहती का बृंहण करता है; अतः परंब्रह्म कहलाता है। इसे एक क्यों कहा जाता है ? क्योंकि यह सभी प्राणों का संभक्षण करके उससे अज को उत्पन्न करता है, विसर्जित करता है, कुछ साधक तीर्थ (साधन) में गमन करते हैं; उनमें दक्षिण, पश्चिम, उत्तर-पूर्व को (अपनी रुचि अनुसार) जाते हैं; उन सबकी यह सङ्गति बिठाता है। यह प्राणियों में एक होकर उनके अन्तःकरण में संचरित होता है; अतः एक कहा जाता है। यह रुद्र क्यों कहा जाता है ? क्योंकि इसके रूप को केवल ऋषियों के द्वारा ही शीघ्र देखा जाता है, अन्यों के द्वारा नहीं; अतः रुद्र कहा जाता है।

अथ कस्मादुच्यते ईशानः यः सर्वान्देवानीशते ईशानीभिर्जनीभिश्च शक्तिभिः। अभित्वा शूरणोनुमो दुग्धा इव धेनवः। ईशानमस्य जगतः स्वदर्शमीशानमिन्द्रतस्थुष इति तस्मादुच्यते ईशानः।

इसे ईशान क्यों कहते हैं ? क्योंकि वह सभी देवों पर स्वामित्व रखता है, वह ईशानी जनियों (स्वामित्वकारक शक्तियों) के द्वारा सभी देवों पर शासन करता है। (देवता इसी ॐ के द्वारा प्रदत्त शक्तियों से ही अपने कार्यों को करते हैं।) ठीक उसी प्रकार से जैसे कि कन्द-मूल, घास, तृण आदि गायों के दूध को उनमें प्रविष्ट होकर उत्पन्न करते हैं।

विमर्श—

ईशानमेनं कवयः पुराणाश्चराचरस्याधिपतिर्ब्रुवन्ति।
तमाह्वयन्ते स हि सर्वशास्ता स एव रक्षां कुरुते विपत्सु॥

(विष्णुकाव्ये ६४ श्लोक)

ऐश्वर्यभावेन जगत्समग्रमीष्टे स्वभावादत ईश्वरः सः।
सर्वं समावास्य स विष्णुरास्ते तस्मिन् हतस्युर्भुवनानि विश्वाः॥

(विष्णुकाव्ये १०० श्लोक)

ईष्टे जगत्येन स ईश्वरोऽस्ति विश्वं तदावास्यमिदं स्वभावात्।
हृदन्तराले संस्थितो महात्मा समीक्षते विश्वमिदं तपत् सः॥
तस्यार्द्रदृष्ट्या भवतीश्वरोना स एव रंको न यदेक्षते सः।
तस्मान्नरः पुण्यतमानि कुर्वन् ध्यायेत् सदा तं सकलेशमाद्यम्॥

(विष्णुकाव्ये ४८-४९)

यः सर्वलोकानुगतस्य विष्णोर्विधानमाद्यं जगतो भनक्ति।
तं रोदयत्येव स रुद्रकर्मा विधानभंगोद्भवदुःखजालैः॥

दु:खस्य च सारमित्वा प्रज्ञापराधाच्च भयं विमृष्य।
नूनं नरो सत्त्वगुणप्रसूतान् क्रियाकलापान् विदधीत भूयः॥
प्रबुद्धसत्त्वस्य महाशयस्य दु:खानशेषानपहन्ति रुद्रः।
भूयो यथा तुष्टमना विधिज्ञं दु:खैरशेषै रहितं विधत्ते॥

स तारणो रुद्र अनन्तशक्तिः सदा जराजन्मनिबद्धजीवम्। परादिदं दृश्यतटं तथास्मत् तटात् स जीवं नयते परञ्च॥
यथात्र लोके कवयः पुराणा नवं नवंपारमवाप्तुकामाः। वाञ्छन्ति नित्यं गहनानुकूल्यं तितीर्षुरिवञ्च सदात्र जीवः॥

तारो हि रुद्रो स च वास्ति विष्णुः द्वेषांसि तारो तरते हि शश्वत्।
द्वेषस्तमोऽतो जगतस्य तारो दीपो यथा हस्तगतोऽस्ति तारः॥
स एव नूनं प्रणवोऽत्र रुद्रो यो व्याप्य विश्वं कुरुते विचित्रम्।
तमेव वेदास्तमु विश्वदेवाः स्तुवन्ति गायन्ति नमन्ति यान्ति॥
रुद्रो हि मन्ये प्रणवः प्रसिद्धः स एव वा व्योंपरमेश्वरोऽस्ति।
स एव विष्णुः स हि सूर्य वेन्द्रः नमन्ति तं वा प्रणमोऽप्यतः सः॥

(रुद्रकाव्ये)

अथ कस्मादुच्यते भगवान् महेश्वरः यस्माद्भक्तान् ज्ञानेन भजत्यनुगृह्णाति च वाचं संसृजति च सर्वान् भावान् परित्यज्यात्मज्ञानेन योगैश्वर्येण महति महीयते तस्मादुच्यते स भगवान् महेश्वरः तदेतद्रुद्रचरितम्॥ ४॥

एषो ह देवः प्रदिशोऽनुसर्वाः पूर्वो ह जातः स उ गर्भे अन्तः।
स एव जातः स जनिष्यमाणः प्रत्यङ् जनांस्तिष्ठति सर्वतोमुखः।
एको रुद्रो न द्वितीयाय तस्मै य इमाँल्लोकानीशत ईशानीभिः।
प्रत्यङ् जनास्तिष्ठति चान्तकाले संसृज्य विश्वाभुवनानि गोप्ता॥
यो योनिं योनिमधितिष्ठत्येको येनेदं सर्वं विचरति सर्वम्।
तमीशानं वरदं देवमीड्यं निचाय्येमां शान्तिमत्यन्तमेति।
क्षमां हित्वा हेतुजालस्य मूलं बुद्ध्या सञ्चितं स्थापयित्वा तु रुद्रे।
रुद्रमेकत्वमाहुः शाश्वतं वै पुराणमिषमूर्जेण पशवो नानुमायन्तम्मृत्युपाशान्।
तदेतेनात्मन्नेते नार्धचतुर्थेन मात्रेण शान्तिं संसृजति॥

पशुपाशविमोक्षणं या सा प्रथममात्रा ब्रह्मदेवत्या रक्ता वर्णेन यस्तां ध्यायते नित्यं स गच्छेत् ब्रह्मपदम्। या सा द्वितीया मात्रा विष्णुदेवत्या कृष्णा वर्णेन यस्तां ध्यायते नित्यं स गच्छेद्वैष्णवं पदम्। या सा तृतीया मात्रा ईशानदेवत्या कपिला वर्णेन यस्तां ध्यायते नित्यं स गच्छेदीशानं परम्। या सार्धचतुर्थी मात्रा सर्वदेवत्याऽव्यक्तीभूता खं विचरति शुद्धा स्फटिकसन्निभा वर्णेन यस्तां ध्यायते नित्यं स गच्छेत्पदमनामयम्। तदेतदुपासीत मुनयो वाग्वदन्ति न तस्य ग्रहणमयं पन्थाविहित उत्तरेण येन देवा यान्ति येन पितरो येन ऋषयः परमपरं परायणञ्चेति।

बालाग्रमात्रं हृदयस्य मध्ये विश्वेदेवं जातरूपं वरेण्यम्। तमात्मस्थं ये तु पश्यन्ति धीरास्तेषां शान्तिर्भवति नोत्तरेषाम्।

यस्मिन् क्रोधं याञ्च तृष्णां क्षमाञ्चाक्षमां हित्वा हेतुजालस्य मूलं बुद्ध्या सञ्चितं स्थापयित्वा तु रुद्रे रुद्रमेकत्वमाहुः रुद्रो हि शाश्वतेन वै पुराणेनेषमूर्जेण तपसा नियन्ताग्निरिति भस्म वायुरिति भस्म जलमिति भस्म सर्वं ह वा इदं भस्म मन एतानि चक्षूंषि यस्मादव्रतमिदं पाशुपतं यद्भस्म नाङ्गानि संस्पृशेत् तस्माद् ब्रह्म तदेतत्पाशुपतं पशुपाशविमोक्षणाय॥ ५॥

उसे महेश्वर क्यों कहते हैं ? क्योंकि वह भक्तों को ज्ञान देकर अनुग्रह करता है, वाणी देता है। सभी भावों को छोड़कर वह महान् ऐश्वर्य से प्रतिष्ठित है, अतः वह भगवान् महेश्वर है। यह रुद्र का चरित्र है॥ ४॥

यह वह देव है, जो सर्वत्र सबसे पूर्व उत्पन्न तथा सबके भीतर है। वही जात है, वही जनिष्यमाण है, वही लोगों के आगे-पीछे सब ओर है। रुद्र एक ही है; अन्य दूसरा कोई नहीं है; जो इस लोक पर ईशानी शक्तियों के द्वारा शासन करता है। यह लोगों के पीछे रहता है तथा अन्त काल में विश्व एवं भुवनों को गुप्त करके रखता है। जो प्रत्येक योनि में स्थित रहता है तथा प्रत्येक में है, इससे यह सम्पूर्ण जगत् रचित है। उस ईशान, वरदायक देव को, जो कि पूजने योग्य है, पूजने से निश्चित ही परम शान्ति प्राप्त होती है। इस पृथ्वी को छोड़कर, संसार के मूल कारण को बुद्धि द्वारा विनिश्चित करके एकमात्र रुद्र को अर्पित करे तो रुद्र के साथ एकत्व को प्राप्त होकर यह जीव (बद्ध पशु) मृत्यु के पाश से मुक्त हो जाता है। इसके सम्पूर्ण ज्ञान से शान्ति प्राप्त होती है, किन्तु इसके आधे-अधूरे ज्ञान से शान्ति नहीं मिलती है।

(१) पशु (जीव) को पाश से मुक्त करने वाली जो प्रथम मात्रा है, उसके ब्रह्म देवता हैं, वह रक्तवर्ण वाली है। उसका नित्य ध्यान करने से ब्रह्मपद को प्राप्त होता है। (२) और जो द्वितीय मात्रा है, उसके विष्णु देवता हैं, वह कृष्ण वर्ण की है, जो उसका नित्य ध्यान करता है, वह विष्णुपद को प्राप्त होता है। (३) जो तृतीय मात्रा है, उसके देवता ईशान हैं तथा वह कपिल वर्ण की है। जो उसे नित्य ध्यान में ध्याता है, उसे ईशान पद प्राप्त होता है। (४) जो सार्ध चतुर्थ मात्रा है, वह सर्वदेवमयी है तथा अव्यक्त होकर आकाश में विचरती है। उसका वर्ण शुद्ध स्फटिक के समान है। जो उसका नित्य ध्यान करता है, वह अनामय (दुःखरहित) पद को प्राप्त होता है। इसकी उपासना करके मुनि लोग वाणी द्वारा अपने अनुभव प्रकट करते हैं। अमुनियों के मार्ग से न जायँ। उत्तरमार्ग जिसमें देवता, पितर तथा ऋषि परम्परापूर्वक गमन करते रहे हैं, उसी से चलें तथा अपने हृदय (शिरोहृदय) के मध्य में बालाग्र के प्रमाण वाले जातरूप के समान श्रेष्ठ विश्वेदेव का ध्यान करें। जो धीर पुरुष स्वयं में स्थित उन रुद्र का ध्यान करते हैं, उन्हें शान्ति प्राप्त होती है, अन्यों को नहीं। जिसमें क्रोध, तृष्णा, क्षमा, अक्षमा को त्यागकर इस मायाजाल को काटकर सबको रुद्र को समर्पित करने की क्षमता है, उसके लिये रुद्र ऊर्जा प्रदान कर अग्नि, वायु, जल सब कुछ को भस्मस्वरूप कर देते हैं। यह भस्म मेरे अङ्गों, नेत्रों आदि में स्पर्श करे तथा मेरे बन्धनों को काटने वाला हो॥ ५॥

योऽग्नौ रुद्रो योऽश्वन्तर्य रुध आविवेश। यो रुद्र इमा विश्वा भुवनानि च क्लृपे तस्मै रुद्राय वै नमो नमः। यो रुद्रोऽप्सु यो रुद्रो ओषधीषु यो रुद्रो वनस्पतिषु येन रुद्रेण जगदूर्ध्वं धारितं पृथिवी द्विधा त्रिधा धर्त्ता धारिता नागायेन्तरिक्षे तस्मै रुद्राय वै नमः। मूर्धानमस्य संसेव्याप्यथर्वा हृदयञ्च यत्। मस्तिष्कादूर्ध्वं प्रेरयत्यवमानोऽधिशीर्षतः। तद्वा अथर्वणः शिरोदेवकोशः समुज्झितः तत् प्राणोऽभिरक्षति शिरोऽन्तमथो मनः। न च दिवो देवजनेन गुप्ता न चान्तरिक्षाणि न च भूम इमाः। यस्मिन्निदं सर्वमोतप्रोतं तस्मादन्यन्नपरं किञ्चनास्ति। न तस्मात्पूर्वं न परं तदस्ति न भूतं नोत भव्यं यदासीत्। सहस्रपादेकमूर्धा व्याप्तं स एवेदमा वरीवर्तिभूतम्। अक्षरात् सञ्जायते कालः कालाद् व्यापक उच्यते। व्यापको हि भगवान् रुद्रो भोगायमानो यदा शेते रुद्रास्तदा संहार्यते प्रजाः। उच्छ्वसिते तमो भवति तमस आपोऽश्वङ्गुल्या मथिते मथितं शिशिरे शिशिरं मथ्यमानं फेनं भवति फेनादण्डं भवत्यण्डाद्ब्रह्मा भवति ब्रह्मणो वायुः वायोरोङ्कार ओङ्कारात् सावित्री सावित्र्या गायत्री गायत्र्या लोका भवन्ति अर्चयति तपः सत्यं मधु रक्षन्ति यद्धुवम्। एतद्धि परमं तपः। आपो ज्योतीरसोमृतं ब्रह्मभूर्भुवः स्वरोन्नम इति॥ ६॥

जो रुद्र अग्नि में, विद्युत् में, औषधियों में, वीरुधों में प्रविष्ट है; जो इस विश्व एवं भुवनों को क्लृप्त (निर्गत) या कल्पित करता है, उस रुद्र को नमस्कार है, अग्नि को नमस्कार है। जो रुद्र जल में, जो औषधियों में, जो रुद्र

वनस्पतियों में है, जिस रुद्र के द्वारा जगत् को ऊर्ध्व में टिकाया गया है, पृथ्वी को द्विधा त्रिधा धर्त्त तथा आधारित किया गया है, जो नागरूप में अन्तरिक्ष में है; उस रुद्र को नमस्कार है, नमस्कार है। अथर्वा ने इस रुद्र के मूर्धा अथवा हृदय का संसेवन कर मस्तिष्क से ऊर्ध्व में प्रेरित करता लगता है। जो भी अथर्वण का शिर देवकोश से समुज्झित है, वह प्राणों की अभिरक्षा करता है, शिर तथा मन की रक्षा करता है। देवजनों के द्वारा, यह दिव गुप्त है, न अन्तरिक्ष गुप्त है और न ही यह पृथ्वी गुप्त है। जिसमें ये सब ओत-प्रोत है, उस रुद्र से परतर अन्य कोई पदार्थ नहीं है। न उससे पूर्व में हुआ और न पश्चात् होगा, न भूत है, न भव्य है, न वर्तमान में (उस अन्न रुद्र के समान) है। वह सहस्र पैरों वाला तथा एक शिर से इस सम्पूर्ण विश्व को व्याप्त किये हुए है। अक्षर ब्रह्म (रुद्र) से काल उत्पन्न होता है, काल से व्यापक कहा जाता है। भगवान् रुद्र व्यापक हैं, जब वह भोगायमान होकर शयन करते हैं, तब प्राणियों का संहार करते हैं। उनके उच्छ्वास से तम उत्पन्न होता है, तम से आप (जल) उत्पन्न होता है, आपके अश्वङ्गुली से मथित करने से शिशिर, शिशिर के मथने से फेन होता है। फेन से अण्ड बनता है। अण्ड से ब्रह्मा उत्पन्न होता है; ब्रह्मा से वायु होती है; वायु से ओङ्कार होता है। ओङ्कार से सावित्री, सावित्री से गायत्री तथा गायत्री से लोक उत्पन्न होते हैं। तप का अर्चन, सत्य तथा मधु का रक्षण होता है। यही परंतप है। आप ज्योति है, रस अमृत है। ब्रह्म भू: भुव: स्व: है। ॐ ॥ ६ ॥

य इदमथर्वशिरो ब्राह्मणोऽधीते। अश्रोत्रिय: श्रोत्रियो भवति। अनुपनीत उपनीतो भवति। सोऽग्निपूतो भवति। स वायुपूतो भवति। स सूर्यपूतो भवति। स सोमपूते भवति। स सत्यपूतो भवति। स सर्वैर्देवैर्ज्ञातो भवति। स सर्वैर्वेदैरनुध्यातो भवति। स सर्वेषु तीर्थेषु स्नातो भवति। तेन सर्वैः क्रतुभिरिष्टं भवति। गायत्र्याः षष्टिसहस्राणि जप्तानि भवन्ति। प्रणवानामयुतं जप्तं भवति। स चक्षुषः पङ्क्तिं पुनाति। आसप्तमात् पुरुषयुगान्पुनातीत्याह भगवानथर्वशिरः। सकृज्जप्त्वैव शुचिः स पूतः कर्मण्यो भवति। द्वितीयं जप्त्वा गणाधिपत्यमाप्नोति। तृतीयं जप्त्वैवमेवानूप्रविशन्त्यो सत्यमों सत्यमों सत्यम्। इत्यथर्ववेदे शिवाथर्वशीर्षम्। इति शिरउपनिषत्॥ ७॥

इति श्रीवीकानेरराज्यान्तर्गतश्रीरत्नगढ़नगरनिवासिना गौडवंशोद्भवश्रीवसिष्ठगोत्रश्रीरामकृष्णपौत्रेण श्रीकस्तूरीचन्द्रसूनुना श्रीमहादेवभक्तशुक्लयजुर्वेदीयमाध्यन्दिनवाजसनेयीशाखानुयायिना वैद्यपण्डितश्रीचतुर्थीलालशर्मणा विरचिते अनुष्ठानप्रकाशे महानिबन्धे पुरश्चरण(प्रयोग)काण्डे शिवमन्त्रानुष्ठानप्रकरणं द्वितीयं समाप्तम्।

जो ब्राह्मण इस अथर्वशीर्ष का अध्ययन करता है, वह यदि अश्रोत्रिय है तो श्रोत्रिय हो जाता है। यदि अनुपनीत है, तो उपनीत हो जाता है। वह अग्निपूत हो जाता है। वह वायुपूत हो जाता है। वह सूर्यपूत हो जाता है। वह सोमपूत हो जाता है। वह सत्यपूत हो जाता है। वह समस्त देवों के द्वारा ज्ञात हो जाता है। वह सभी देवों द्वारा अनुज्ञात हो जाता है। वह समस्त तीर्थों में स्नात हो जाता है। उसके द्वारा सभी यज्ञ सम्पन्न हो जाते हैं। उसे साठ सहस्र गायत्री मन्त्र जपने का फल प्राप्त हो जाता है। उसे अयुत सङ्ख्या में प्रणवजप का फल मिल जाता है। वह अपनी दृष्टि से पङ्क्ति को पावन कर देता है। उनके सात पीढ़ी के पुरुषयुगल (पुरखों के सपत्नीक जोड़े) पवित्र हो जाते हैं। ऐसा भगवान् अथर्वशिरा ने कहा है। एक बार जपने से शुचि, कर्मण्य तथा पूत हो जाता है। दूसरी बार जपने से गणाधिपत्य (नेतृत्व) को प्राप्त हो जाता है। तीसरी बार जपने से सत्य में अनुप्रविष्ट हो जाता है। ओम् सत्य। ओम् सत्य। ओम्॥ ७॥

इस प्रकार पं० चतुर्थीलाल-विरचित अनुष्ठानप्रकाश-महानिबन्ध के तृतीय काण्ड पुरश्चरणकाण्ड के द्वितीय प्रकरण शिवमन्त्रानुष्ठान प्रकरण की महर्षि अभय कात्यायन-विरचित हिन्दी टीका पूर्ण हुई॥ २॥